# umAsahasram

# ઉમાસહસ્રમ્

## Document Information

Text title : umAsahasram

File name : uma1000.itx

Category : sahasranAma, devii, pArvatI, stotra, gaNapati-muni, devI

Location : doc_devii

Author : Ganapati Muni, disciple of Ramana Maharshi

Transliterated by : Various volunteers listed at http://surasa.net/uma/

Proofread by : Daksha, Sunder Hattangadi

Latest update : April 15, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

umAsahasram

# ઉમાસહસ્રમ્

## પ્રથમં શતકમ્

### પ્રથમઃ સ્તબકઃ

વ્યોમશરીરા, સ્ત્રીરૂપા ચ (આર્યાવૃત્તમ્)

અખિલજગન્માતોમા તમસા તાપેન ચાકુલાનસ્માન્ ।
અનુગૃહ્ણાત્વનુકમ્પાસુધાર્દ્રયા હસિતચન્દ્રિકયા ॥ ૧.૧॥

નિખિલેષુ પ્રવહન્તીં નિરુપાધિવિમર્શયોગદૃશ્યોર્મિમ્ ।
અજરામજામમેયાં કામપિ વન્દે મહાશક્તિમ્ ॥ ૧.૨॥

સા તત્ત્વતઃ સમન્તાત્સત્યસ્ય વિભોસ્તતા તપશ્શક્તિઃ ।
લીલામહિલાવપુષા હૈમવતી તનુષુ કુણ્ડલિની ॥ ૧.૩॥

પરમઃ પુરુષો નાભિર્લોકાનાં સત્ય ઉચ્યતે લોકઃ ।
પરિતસ્તતઃ સરન્તી સૂક્ષ્મા શક્તિસ્તપો લોકઃ ॥ ૧.૪॥

અન્તર્ગૂઢાર્થાનાં પુરુષાગ્નેર્ધૂમકલ્પ ઉદ્ગારઃ ।
શક્તિજ્વાલાઃ પરિતઃ પ્રાન્તેષ્વભવજ્જનો લોકઃ ॥ ૧.૫॥

અતિસૂક્ષ્મધૂમકલ્પં લોકં તતમાખ્્યયાઽન્યયા નાકમ્ ।
એતં તતોઽપિ સૂક્ષ્મા વ્યાપ્તાઽન્તરતઃ પરા શક્તિઃ ॥ ૧.૬॥

ધૂમાન્તરોષ્મકલ્પા શુદ્ધજ્વાલોપમા ચ યા શક્તિઃ ।
તાં દિવમાહુઃ કેચન પરમં વ્યોમાપરે પ્રાહુઃ ॥ ૧.૭॥

ઉદ્ગીર્ણધૂમકલ્પો યોઽયમપારો મહાઞ્જનો લોકઃ ।
વ્યોમાન્તરિક્ષગગનપ્રભૃતિભિરભિધાભિરાહુસ્તમ્ ॥ ૧.૮॥

પ્રાન્તેષુ કોઽપિ શક્તેઃ પૃથગાત્મા વિયદુપાધિસઙ્ગેન ।
પરમાત્મનો વિભક્તઃ સ્વયમભિમન્તા વિનિષ્પેદે ॥ ૧.૯॥

દક્ષઃ પરોક્ષમુદિતઃ પન્થા એષ ત્વિષાં જનો લોકઃ ।

તદ્ગર્ભે લબ્ધાત્મા કથિતા દાક્ષાયણી શક્તિઃ ॥ ૧.૧૦॥

સત્યાઃ પ્રાગપિ શક્તેઃ પ્રાદુર્ભાવઃ સ કીર્ત્યતે પ્રથમઃ ।
ઈશાભિમાનમય્યાઃ પૃથગભિમાનિત્વનિષ્પત્ત્યા ॥ ૧.૧૧॥

આકાશસ્ય સુતૈવં લક્ષણયા વસ્તુતઃ પ્રસૂઃ શક્તિઃ ।
અદિતેર્દક્ષો દક્ષાદદિતિરિતિ શ્રુતિરબાધૈવમ્ ॥ ૧.૧૨॥

જગતાં માતાપિતરૌ સતીભવૌ કેઽપિ પણ્ડિતાઃ પ્રાહુઃ ।
અદિતિપ્રજાપતી તાવપરેષાં ભાષયા વિદુષામ્ ॥ ૧.૧૩॥

દિવ્યપુમાકૃતિમીશે બિભ્રતિ લીલાર્થમસ્ય રમણાય ।
દિવ્યવનિતાકૃતિં સા બભાર માતા ચ ભુવનાનામ્ ॥ ૧.૧૪॥

ભાસુરહેમાભરણાં બહુશોભામીશ્વરપ્રમોદકલામ્ ।
મૂર્તિં પાવનકીર્તિં તાં હૈમવતીમુમામાહુઃ ॥ ૧.૧૫॥

તસ્ય પ્રથમઃ સાક્ષી ભુવનજુષાં નયનશાલિનાં મધ્યે ।
વપુષઃ કીલાદિસુદૃશો નિરુપમપુણ્યો નિલિમ્પપતિઃ ॥ ૧.૧૬॥

પલ્લવમૃદુ વેદિગતજ્વલનપવિત્રં મહાર્ઘમણિકાન્તમ્ ।
નવચન્દ્રખણ્ડસૌમ્યં શિવસુદૃશસ્તત્સ્મરામિ વપુઃ ॥ ૧.૧૭॥

કેચન ગૌરીં દેવીં શીતાદ્રેર્દૈવતાત્મનો જાતામ્ ।
કથયન્તિ સ્ત્રિયમુત્તમલાવણ્યાસ્વાદિતો ગણ્યામ્ ॥ ૧.૧૮॥

સત્યૈવ ભવતુ સેયં કથા તથાઽપિ પ્રભાષિતાં ભક્તૈઃ ।
તાં મૂર્તિમાદિસુદૃશો જાનીયાત્કમપિ તેજોંશમ્ ॥ ૧.૧૯॥

મન્યન્તે કેઽપિ ઘનં પર્વતમુક્તં નિગૂઢયા વાચા ।
પ્રાદુર્ભવતિ ગભીરધ્વનિરવિષહ્યા યતઃ શક્તિઃ ॥ ૧.૨૦॥

આકાશો ગોલેભ્યો યદ્વિતરતિ નિજરજશ્ચયાદન્નમ્ ।
નેશાય કીર્ત્યતે સા સંસારે દક્ષયાગકથા ॥ ૧.૨૧॥

વ્યાપ્તાઽપિ યન્નિગૂઢા બહિરીક્ષકબુદ્ધ્યપેક્ષયા નષ્ટા ।
શક્તિર્યાગે તસ્મિન્નવસાનં તદુદિતં સત્યાઃ ॥ ૧.૨૨॥

પર્વતનામ્નો વૈદિકભાષાયાં યદિયમતિબલા શક્તિઃ ।
ઘનતો ભવતિ વ્યક્તા તદભિહિતં પાર્વતીજનનમ્ ॥ ૧.૨૩॥

તેજોંશતઃ શિવાવિહ હિમાચલેઽનુગ્રહાય ભૂમિજુષામ્ ।
દત્તો યત્સાન્નિધ્યં લીલાચારિત્રમન્યદિદમ્ ॥ ૧.૨૪॥

એતાસામાર્યાણાં જાનન્તઃ શાસ્ત્રસમ્મતં ભાવમ્ ।
જાનીયુર્ભવમહિષીં ભુવનાનામમ્બિકાં દેવીમ્ ॥ ૧.૨૫॥ 25

---

દ્વિતીયઃ સ્તબકઃ

સર્ગાદિવર્ણનમ્ (પઞ્ચચામરવૃત્તમ્)

સહાદરેણ યો વલક્ષપારિજાતમાલયા
ગલસ્થલીવિભૂષયા ધ્વનિં વિનૈવ ભાષતે ।
મહેશપુણ્યયોષિતો મનોજ્ઞહાસ એષ મે
વિભૂતયે પ્રકલ્પતાં વિધૂતયે ચ પાપ્મનામ્ ॥ ૨.૧॥

નિરન્તરશ્રિતે સદા કૃપારસપ્રવાહિની
વિલાસિનીતનુર્વિભોઃ પુમાકૃતેર્વિમોહિની ।
સુધાતરઙ્ગકલ્પહાસભાસુરાનના શિવા
પદાબ્જલમ્બિનો ધુનોતુ પાપ્મનઃ ફલં મમ ॥ ૨.૨॥

કરોતિ યા બિભર્તિ યા નિહન્તિ યા જગત્રયં
સમન્તતો વિભાતિ યા ન દૃશ્યતે ક્વચિચ્ચ યા ।
અતીવ ગુપ્તરૂપિણી ગુરૂપદેશમન્તરા
ન શક્યતે બુધૈશ્ચ બોદ્ધુમન્ધકારિસુન્દરી ॥ ૨.૩॥

મહાન્ધકારબન્ધુરસ્ય ભૂતસઞ્ચયસ્ય યા
વિનિદ્રિતસ્ય સર્વબીજધામ્નિ મૌનમુદ્રિતે ।
સમન્તતો વિજૃમ્ભણાય ભાસનાય ચાભવન્
મહદ્વિધાય ચેષ્ટિતં મમેયમિષ્ટદેવતા ॥ ૨.૪॥

મહેશગર્ભતઃ સમસ્તભૂતબીજકોશતઃ
કિરન્ત્યશેષવિશ્વમપ્યપારદિવ્યવૈભવા ।
વિચિત્રચેષ્ટયાઽઽદ્યયા વિધૂતનાથનિદ્રયા
જગન્નુતા જયત્યસાવનાદિશક્તિરદ્ભુતા ॥ ૨.૫॥

ભવં ભણન્તિ તાન્ત્રિકાસ્ત્વદાશ્રયં તમવ્યયં
સમામનન્તિ વૈદિકાઃ સદર્ચિતે સદાહ્વયમ્ ।

ન કશ્ચિદર્થભેદ એતદાખ્યયોર્દ્વયોર્ભવે-
દ્ભિદેયમાદિમં પદં પુમાન્પરં નપુંસકમ્ ॥ ૨.૬॥

સ ચેદ્ભવોઽભિધાનતો ભવાન્યસિ ત્વમવ્યયે
સમીર્યતે સ સદ્યદિ ત્વમમ્બ ભણ્યસે સતી ।
ન તેઽસ્તિ ભાવતા ન શક્તિરૂપિણી હિ વિદ્યસે
ન વેદ્મિ કાલિકે કથં સતોઽસતશ્ચ ભિદ્યસે ॥ ૨.૭॥

જગદ્વિધાનકાર્યતઃ પુરા સુરાસુરસ્તુતે
ત્વમમ્બ જીવિતં ભવસ્યભાવમૂલવાદિનામ્ ।
વિકલ્પવર્જિતા મતિઃ પ્રબોધમૂલવાદિનાં
રસોઽનપેક્ષ ઉત્તમઃ પ્રમોદમૂલવાદિનામ્ ॥ ૨.૮॥

ભવત્યસાવતો ભવાન્યનાદિરન્તવર્જિતા
જગન્તિ માતિ નિત્યમોરસૌ તદભ્યુધાય્યુમા ।
રસાત્મિકોશ્યતેઽખિલૈરસૌ તતઃ શિવોચ્યતે
પરૈવમીશિતુશ્ચિતિસ્ત્રિધા બુધૈરુદીર્યતે ॥ ૨.૯॥

ચિતિઃ પરૈવ કામના રસેન કેનચિદ્યુતા
ચિતિઃ પરૈવ સર્વદાઽપ્યનસ્ત્યજસ્ય તુ ક્રિયા ।
ચિતિઃ પરૈવ ગોચરાવભાસિકા મતિઃ સ્મૃતા
ત્રિતૈવમન્યથા ચિતેશ્ચિરન્તનૈરુદીર્યતે ॥ ૨.૧૦॥

ચિકીર્ષતિ પ્રભૌ જ્વલત્ત્વદીયકીલસન્તતેર્-
વિકીર્ણધૂમજાલમેતદમ્બરસ્થલં તતમ્ ।
વિસૃષ્ટિતઃ પુરાઽસિ યા શિવપ્રભુત્વરૂપિણી
પૃથક્પ્રભુશ્ચ લક્ષિતાઽસિ સા સવિત્રિ પુષ્કરે ॥ ૨.૧૧॥

પુનર્વિપાકતો ઘનીભવદ્ભિરક્ષિગોચરૈ-
સ્તતસ્તતઃ સમુજ્જ્વલૈઃ ખસૂક્ષ્મરેણુગોલકૈઃ ।
અજાણ્ડવૃક્ષકોટિકન્દવૃન્દવદ્વ્યધાઃ પુરા
મહેશદૃષ્ટિમય્યુમેઽમ્બ મણ્ડલાનિ ભાસ્વતામ્ ॥ ૨.૧૨॥

તપોઽગ્નિધૂમજાલકે ભવન્તિ તૈજસાણવો
ભવન્તિ જીવનાણવો ભવન્તિ પાર્થિવાણવઃ ।
ક્રમેણ તદ્વિસૃષ્ટિરીશશક્તિપાકવૈભવે
સહસ્રભાનુમણ્ડલં તુ ગોચરાદિ ગૃહ્યતામ્ ॥ ૨.૧૩॥

મયૂખમાલિમણ્ડલે નિધાય પાદમુગ્રયા
મયૂખશક્તિરૂપયા ત્વયાઽમ્બ ચેષ્ટમાનયા ।
ખકોશતઃ સમાહૃતૈઃ પુનસ્ત્રિરૂપરેણુભિર્-
વ્યધાયિ મઙ્ગલાદિભિઃ સહ ગ્રહૈરિયં મહી ॥ ૨.૧૪॥

વિસર્જનેન ભૂયસાઽપિ દેવ્યતૃપ્તયેયતા
વિચેષ્ટિતં વિલક્ષણં પુનર્વ્યધીયત ત્વયા ।
ઇહાન્તરે વસુન્ધરામયૂખમાલિબિમ્બયોર્-
અમુષ્ય કર્મણઃ સવિત્રિ ચન્દ્રમણ્ડલં ફલમ્ ॥ ૨.૧૫॥

વધૂપુમાકૃતી તતો બભૂવથુર્યુવાં શિવે
ત્વમીશ્વરશ્ચ લીલયા વિહર્તુમત્ર વિષ્ટપે ।
અહો પ્રભું નભસ્તનું ત્વદીયગર્ભસમ્ભવા-
દ્ભણન્તિ કાલિ તત્ર ચિત્રભાષણાસ્ત્વદાત્મજમ્ ॥ ૨.૧૬॥

પુમાનથો સ બિમ્બતો હિરણ્મયો દિવાકરે
ધિયાઽપિ નૈવ કેવલં હિરણ્મયેન વર્ષ્મણા ।
ઇદં તુ કાર્યરૂપમન્યદુચ્યતે બુધૈઃ પ્રભો-
રિહાન્તરે નૃણાં પુનર્વપુસ્તદમ્બ બિમ્બિતમ્ ॥ ૨.૧૭॥

સ્વયં ચ કાઞ્ચનપ્રકાશવર્ષ્મણા પ્રભાકરે
તથાઽન્તરે નૃણાં ચ તસ્ય બિમ્બિતાઽસિ સન્નિધૌ ।
રસસ્ય દેવતાઽસિ દેવિ પુષ્કરે દિવાકરે
મયૂખદેવતાઽસિ ભોગદેવતાઽસિ દેહિષુ ॥ ૨.૧૮॥

વિસર્જનેન ભૂયસા નભસ્યમુત્ર ભાસ્કરે
મહીષુ ચામ્બિકે યુવાં વિધાય દેહિનો બહૂન્ ।
ક્ષિતેઃ સુધાકરં ગતાન્ પિતૄન્ વિનેતુમવ્યયે
તનૂ ચ તત્ર બભ્રથુઃ પ્રપઞ્ચરાજ્ઞિ માયયા ॥ ૨.૧૯॥

નભોઽન્તરે હિરણ્મયં વિભું પ્રચક્ષતે હરં
દિનેશબિમ્બબિમ્બિતં ભણન્તિ પઙ્કજાસનમ્ ।
ઇહાસ્મદન્તરાલયં વદન્તિ વિષ્ણુમચ્યુતં
સવિત્રિ જન્મિનામિયં ત્રિમૂર્તિવાદિધોરણિ ॥ ૨.૨૦॥

નભોઽન્તરે પ્રચક્ષતે હિરણ્મયાઙ્ગમીશ્વરં

દિનેશબિમ્બપૂરુષં હિરણ્યગર્ભમાખ્યયા ।
વિરાજમાનમક્ષરં વિરાજમન્તરે નૃણાં
સવિત્રિ તત્ત્વવેદિનામિયં તુ નામકલ્પના ॥ ૨.૨૧॥

હિરણ્મયાઙ્ગમમ્બરે વદન્તિ સોમમમ્બિકે
દિવાકરસ્ય મણ્ડલે તુ બિમ્બિતં પુરન્દરમ્ ।
શરીરિણામિહાન્તરેઽગ્નિમાલપન્તિ ભાસુરં
ચિરન્તનોક્તિદર્શિનામિયં શિવે પ્રણાલિકા ॥ ૨.૨૨॥

સરોરુહાક્ષવાગ્વધૂમનોહરૌ તુ પૂર્વવ-
ત્સુધાંશુબિમ્બપૂરુષસ્તુ રુદ્રસંજ્ઞકઃ શિવે ।
હિરણ્મયોઽન્તરિક્ષજાત ઈશ્વરઃ સદાશિવઃ
સદેવ વસ્તુ કાઞ્ચનાઙ્ગિ પઞ્ચમૂર્તિવાદિનામ્ ॥ ૨.૨૩॥

પ્રભોઃ પ્રમાઽઽદિતસ્તતઃ પ્રમાવતી સ્વયં પૃથગ્
વિહાયસા શરીરિણી પ્રભૌ તતો હિરણ્મયે
હિરણ્મયાઙ્ગનાકૃતિર્નભોઽન્તરે ચ ભાસ્કરે
તથાઽન્તરેષુ દેહિનાં મહેશ્વરી જયત્યુમા ॥ ૨.૨૪॥

મદીયમમ્બિકાઽખિલસ્ય વિષ્ટપસ્ય દુષ્ટધી-
દવિષ્ઠપાદપઙ્કજા ધુનોતુ કષ્ટજાલકમ્ ।
ઇમે ચ કોમલૈઃ પદૈરમૂલ્યતલ્પશાલિન-
સ્તદીયમઞ્ચરૂપતાં ભજન્તુ પઞ્ચચામરાઃ ॥ ૨.૨૫॥ 50

તૃતીયઃ સ્તબકઃ

સશરીરાયાશ્ચ સાધનમ્ (તનુમધ્યાવૃત્તમ્)

શુભ્રસ્મિતલેશો માતુર્મરુતાન્નઃ ।
અન્તસ્તિમિરાણામન્તં વિદધાતુ ॥ ૩.૧॥

આદ્યૌ ભુવનાનાં માતાપિતરૌ તૌ ।
દેવાસુરમર્ત્યૈર્વન્દ્યાવવિનિન્દ્યૌ ॥ ૩.૨॥

બ્રૂતે પૃથગેકસ્તૌ વિગ્રહવન્તૌ ।
આહૈકશરીરં દ્વન્દ્વં કવિરન્યઃ ॥ ૩.૩॥

શક્તિં તનુશૂન્યામીશં ચ પુમાંસમ્ ।

વક્તિ પ્રમદાયાં સન્દેહયુતોઽન્યઃ ॥ ૩.૪॥

ઈશં ચ તમેકે સન્માત્રમુશન્તિ ।
બ્રહ્મૈકમથાન્યે ગાયન્તિ ન શક્તિમ્ ॥ ૩.૫॥

કેચિત્તનુહીનં પ્રજ્ઞાયુતમીશમ્ ।
શક્તિં વિદુરસ્ય પ્રજ્ઞામવિકુણ્ઠામ્ ॥ ૩.૬॥

ઉક્તં દધતસ્તૈઃ કેચિત્ પુનરાહુઃ ।
માયાતનુબન્ધં નાથસ્ય ન શક્તેઃ ॥ ૩.૭॥

નિત્યં સશરીરૌ યેષાં પિતરૌ તૌ ।
એકોઽપ્યથવા તાન્ પ્રત્યાહ નિસર્ગઃ ॥ ૩.૮॥

માતાપિતરૌ યત્ તાવેકશરીરૌ ।
ચિત્રપ્રથનાર્થા સા કાચન લીલા ॥ ૩.૯॥

સન્માત્રકથાનાં કાર્યે મનુજાદૌ
ધીસ્વાન્તવિકાસઃ સ્યાત્કારણહીનઃ ॥ ૩.૧૦॥

અદ્વૈતિભિરન્યા માયાઽઽશ્રયણીયા ।
શક્તેરતિરિક્તા સા કિં કિમુ વાદૈઃ ॥ ૩.૧૧॥

ન સ્યાત્ પૃથગાત્મા શક્તેઃ કિમુપાધેઃ ।
ચક્ષુઃ શ્રિતચિત્તેર્વિશ્વાકૃતિતા વા ॥ ૩.૧૨॥

એકાન્તવિદેહૌ તૌ ચેદતિસૂક્ષ્મૌ ।
લીલાતનુબન્ધાશક્તાવભિધેયૌ ॥ ૩.૧૩॥

ભક્તાનનુગૃહ્ણન્ દિવ્યાદ્ભુતલીલઃ ।
તદ્વિગ્રહબન્ધો બોધ્યો લસદર્થઃ ॥ ૩.૧૪॥

સ્ત્રીત્વં યદિ નેષ્ટં પુંસ્ત્વં કુત ઇષ્ટમ્ ।
ના વા કિમુ નારી ન સ્યાદનુમેયા ॥ ૩.૧૫॥

તસ્માત્ પિતરૌ તૌ વાચ્યૌ મતિમન્તૌ ।
સૂક્ષ્માવપિ ભૂયો લીલાતનુમન્તૌ ॥ ૩.૧૬॥

નાસ્મત્તનુવત્તે શક્તીશ્વરમૂર્તી ।
એકાઽમૃતરૂપા ત્વન્યા પ્રણવાત્મા ॥ ૩.૧૭॥

દિવ્યં ઘનતેજઃ કુર્વદ્ ધ્વનિમન્તઃ ।
સમ્પશ્યદશેષં મૂર્તિઃ પ્રણવાત્મા ॥ ૩.૧૮॥

દિવ્યો ઘનસોમઃ સ્યંદન્ રસમન્તઃ ।
ભુઞ્જન્ ભુવનૌઘં પીયૂષશરીરમ્ ॥ ૩.૧૯॥

બોધોઽનવલમ્બો દિવ્યં ખલુ તેજઃ ।
મોદઃ પરિશુદ્ધો દિવ્યઃ ખલુ સોમઃ ॥ ૩.૨૦॥

સોમાંશમહોંશૌ યાતો ઘનભાવમ્ ।
પિત્રોર્ભુવનાનાં સઙ્કલ્પમહિમ્ના ॥ ૩.૨૧॥

આરાધયસીશં તં ચિન્મયકાયમ્ ।
આનન્દમયાઙ્ગી ત્વમ્ દેવિ કિલેયમ્ ॥ ૩.૨૨॥

દિવ્યં તવ કાયં દિવ્યે તવ વસ્ત્રે ।
દિવ્યાનિ તવામ્બ સ્વર્ણાભરણાનિ ॥ ૩.૨૩॥

યદ્દેવિ વિલોક્યાઽસ્યપ્રાકૃતકાયા ।
યુક્તીઃ સમતીતા સેયં તવ માયા ॥ ૩.૨૪॥

નવ્યાસ્તનુમધ્યાઃ પ્રત્નાં તનુમધ્યામ્ ।
વિદ્વત્સદસીમાઃ સમ્યક્પ્રથયન્તુ ॥ ૩.૨૫॥ 75

---

ચતુર્થઃ સ્તબકઃ

આધ્યાત્મિકવિભૂતયઃ (ગીતિવૃત્તમ્)

અમૃતાંશુબિંબસારાદ્ ભૂયોઽપિ વિનિર્ગતો ભૃશં સૂક્ષ્મઃ ।
સારો ગૌરીવદનાદ્ દરહાસો હરતુ દુઃખજાલં નઃ ॥ ૪.૧॥

કુલકુણ્ડે પ્રાણવન્તી ચેતન્તી હૃદિ સમસ્તજન્તૂનામ્ ।
મૂર્ધનિ વિચિન્તયન્તી મૃત્યુઞ્જયમહિષિ વિજયતે ભવતી ॥ ૪.૨॥

તેજોજલાન્નસારૈસ્ત્રયોઽણવો મૂલહૃદયમસ્તેષુ
પાકાત્તે નિષ્પન્નાસ્ત્રૈલોક્યવ્યાપિકેઽંબ દેહવતામ્ ॥ ૪.૩॥

પૂર્ણે શરીરશિલ્પે દ્વારેણ બ્રહ્મરન્ધ્રસંજ્ઞેન ।
નાડીપથેન ગત્વા તૈજસમણુમાવિશસ્યમેયબલે ॥ ૪.૪॥

અંશેનાવિશ્યાદૌ યાસિ પુનસ્તં તતશ્ચ નિર્યાસિ ।
માર્ગાભ્યાં દ્વાભ્યાં ત્વં નાડ્યાઃ પશ્ચાત્ પુરશ્ચ સિદ્ધાભ્યામ્ ॥ ૪.૫॥

યાતાયાતવિહારે માતસ્તસ્મિન્ ભવત્યુપાધિસ્તે
આરભ્ય મસ્તકસ્થલમામૂલાધારમસ્થિપઞ્જરિકા ॥ ૪.૬॥

નૃતનુષુ વિહરન્તીં ત્વામ્ ઉપાધિવીણાકૃતેર્જગન્માતઃ ।
સાદૃશ્યાત્ કુણ્ડલિનીં પરોક્ષવાદપ્રિયાઃ પ્રભાષન્તે ॥ ૪.૭॥

નભસઃ શીર્ષદ્વારા પ્રવહન્તીં ય ઇહ વિગ્રહે શક્તિમ્ ।
અનુસન્દધાતિ નિત્યં કૃતિનસ્તસ્યેતરૈરલં યોગૈઃ ॥ ૪.૮॥

સર્વેષુ વિશસિ તુલ્યં નિર્ગચ્છસિ તુલ્યમમ્બ ભુવનાનામ્ ।
જ્ઞાતા ચેદસિ શક્ત્યૈ ન જ્ઞાતા ચેદ્ભવસ્યહઙ્કૃત્યૈ ॥ ૪.૯॥

અવતરણં ધ્યાતં ચેદ્ આરોહણમદ્ભુતં ભવેચ્છક્તેઃ ।
યસ્મિન્નિદં શરીરં ભવતિ મહદ્વૈદ્યુતાગ્નિયન્ત્રમિવ ॥ ૪.૧૦॥

આરોહણમધ્યાતૃષુ હૃદયેઽહઙ્કારમાત્રનિષ્પત્યૈ ।
તદનુ શરીરમિદં સ્યાત્ સુખાય દુઃખાય વા યથાભોગમ્ ॥ ૪.૧૧॥

યા વ્યક્તિતા જનિમતામહઙ્કૃતિઃ સકલભેદધીભૂમિઃ ।
પૃથગિવ તવામ્બિકે સા સત્તૈવોપાધિસંશ્રયાદ્ ભાન્તી ॥ ૪.૧૨॥

એતામાહુરવિદ્યાં બીજં સંસારવૃક્ષરાજસ્ય ।
સર્વરસફલયુતસ્ય પ્રારબ્ધજલેન દેવિ દોહદિનઃ ॥ ૪.૧૩॥

વ્યક્તિત્વાર્પકદેહે નિમ્ને કુલ્યેવ જનિમતાં માતઃ ।
પ્રવહત્યનારતં તે શક્તિશ્ચિત્રાણિ દેવિ તન્વાના ॥ ૪.૧૪॥

સારમપામણુભૂતં હૃદયસ્થં સૂરયો વિદુશ્ચિત્તમ્ ।
શ્રેષ્ઠં પ્રાણં કેચન પઞ્ચાનિલમૂલભૂતમાહુરિમમ્ ॥ ૪.૧૫॥

મન એવ ચિત્તસંજ્ઞં વ્યવહરતાં વિભજનાનભિજ્ઞાનામ્ ।
કવિલોકવ્યવહારસ્તદધીનસ્તત્ત્વધીર્ભવત્યન્યા ॥ ૪.૧૬॥

તદનાહતસ્ય વિલસદ્ દક્ષિણતો દહરનામકગુહાયામ્ ।
ચિત્તં કુલકુણ્ડાન્તે કાઽપ્યનુગૃહ્ણાતિ દેવિ રશ્મિકલા ॥ ૪.૧૭॥

ચિત્તમણુ શ્લિષ્ટં તે કલયાઽઙ્ગુષ્ઠપ્રમાણમિવ ભાસા ।
દર્પણમમલબ્રહ્મપ્રતિબિમ્બાકર્ષકં શિવે ભવતિ ॥ ૪.૧૮॥

અન્તરમાવર્તાભં પ્રતિબિમ્બમકાયમેતદીશસ્ય ।
અંગુષ્ઠાભં પ્રાહુર્માનિનોપાધિચૈત્તભાસસ્તે ॥ ૪.૧૯॥

દમ્પત્યોર્વાં રૂપપ્રતિબિમ્બૌ ચક્ષુષોઃ શિવે ભવતઃ ।
કુલકુણ્ડે હૃદયે ચાપ્યરૂપયોરેવ કશ્ચિદુલ્લાસઃ ॥ ૪.૨૦॥

ચિત્તમણીયો વિત્તં ય ઇદં મૂલ્યે પ્રપઞ્ચતોઽપ્યધિકમ્ ।
હૃદયગુહાયાં નિહિતં જાનીતે સ વિજહાતિ બહિરાશાઃ ॥ ૪.૨૧॥

અપ્રાપ્ય મૂર્ધાનં હૃદયાત્ સમ્પ્રસ્થિતા ધૃતા નાડ્યા ।
ત્વદ્રુચિરુક્તા બુદ્ધિસ્ત્વયિ નિષ્ઠા ભવતિ દેવિ તન્નિષ્ઠા ॥ ૪.૨૨॥

અન્નમયાણું પ્રાપ્ય ધીજ્યોતિશ્ચન્દ્રમાર્કમિવ તેજઃ ।
પરિભાષ્યતે મહેશ્વરિ મન ઇતિ સઙ્કલ્પસમ્ભવસ્થાનમ્ ॥ ૪.૨૩॥

સઙ્કલ્પે સઙ્કલ્પે ચિચ્છક્તિં મનસિ વિસ્ફુરન્તીં ત્વામ્ ।
ય ઉપાસ્તે સ જનસ્તે ગૃહ્ણાતિ મહેશવલ્લભે ચરણમ્ ॥ ૪.૨૪॥

આધારચક્રશયને મમેહ નિદ્રાં વિહાય વિચલન્તીમ્ ।
ગીતય એતાઃ પરમામુપતિષ્ઠન્તાં જગદ્વિભોઃ કાન્તામ્ ॥ ૪.૨૫॥ 100

॥ સમાપ્તં ચ પ્રથમં શતકમ્ ॥

---

દ્વિતીયં શતકમ્

પઞ્ચમઃ સ્તબકઃ

પરિણયઃ (ઉપજાતિવૃત્તમ્)

શ્રીખણ્ડચર્ચામિવ કલ્પયન્ત્યો
મુહુઃ કપોલેષુ સખીજનસ્ય ।
શ્રીકણ્ઠકાન્તાહસિતાઙ્કુરાણાં
શ્રીમન્તિ કુર્વન્તુ જગન્તિ ભાસઃ ॥ ૫.૧॥

કીર્તિર્વિલક્ષ્યા કુસુમાયુધસ્ય
સ્વર્ણાદ્રિકોદણ્ડજયોન્નતસ્ય ।
દરસ્મિતશ્રીર્દ્વિરદાસ્યમાતુર્-
દ્રાઘીયસીં વો વિતનોતુ ભૂતિમ્ ॥ ૫.૨॥

પ્રમથ્યમાનામૃતરાશિવીચિ-
પ્રોદ્ગચ્છદચ્છાચ્છતુષારકલ્પાઃ ।
યુષ્માકમિચ્છાં વિદધત્વમોઘાં
વિઘ્નેશમાતુર્દરહાસલેશાઃ ॥ ૫.૩॥

ચન્દ્રાતપઃ કશ્ચન સમ્પ્રસન્નો
મહેશનેત્રાતિથિતર્પણો નઃ ।
મનોભિલાષં સફલીકરોતુ
મહેશ્વરીહાસલવપ્રકાશઃ ॥ ૫.૪॥

વલક્ષવક્ષોજપટાઞ્ચલેન
ચલેન સાર્ધં કૃતકેલયો નઃ ।
પુરત્રયારાતિકલત્રહાસ-
ભાસો નિરાસં વિપદાં ક્રિયાસુઃ ॥ ૫.૫॥

ભૂયાસુરાયાસહરાણિ તાનિ
સ્મિતાનિ ભૂતેશમૃગીદૃશો નઃ ।
યેષાં ત્વિષો બિભ્રતિ દિગ્વધૂટી-
ગણ્ડેષુ કર્પૂરપરાગલીલામ્ ॥ ૫.૬॥

કુર્વન્તુ કામં સફલં (ત્વ) મદીયં
કુલાદ્રિકન્યાહસિતાનિ તાનિ ।
યેષાં મયૂખૈઃ ક્રિયતે સિતાદ્રેર્-
ઉદ્યાનવાટીષુ નવો વસન્તઃ ॥ ૫.૭॥

આમ્રેડિતં ભૂષણચન્દ્રભાસાં
નાસાવિભૂષામહસાં દ્વિરુક્તિઃ ।
પુરારિનારીસ્મિતકાન્તયો મે
પૂર્ણાનિ કુર્વન્તુ સમીહિતાનિ ॥ ૫.૮॥

નિર્માય વિશ્વાલયમમ્બ શર્વ-
સ્ત્વયા સમં શિલ્પવિદા સ શિલ્પી ।
વિહર્તુમિચ્છન્નયિ વોઢુમૈચ્છ-
ન્નારીં ભવન્તીં પુરુષો ભવંસ્ત્વામ્ ॥ ૫.૯॥

દિવ્યં દુકૂલં ધવલં દધાના
વેણ્યા ફણીન્દ્રોપમયા લસન્તી ।

પ્રફુલ્લરાજીવવિલોચના ત્વં
પ્રપઞ્ચભર્તુર્નયનાન્યહાર્ષીઃ ॥ ૫.૧૦॥

પ્રત્યઙ્ગબન્ધં જ્વલદુત્તમં તે
ભુજઙ્ગરાજોપમવેણિરૂપમ્ ।
આત્મૈકનિષ્ઠસ્ય ચ વિશ્વભર્તુર્-
આરાધયામાસ વિલોચનાનિ ॥ ૫.૧૧॥

અભૂસ્ત્વમાદ્યસ્ય મનોમદાય
સ ચાપિ તે પ્રીતિપદં બભૂવ ।
ન કેવલં વાં સકલસ્ય ચાસી-
દ્દામ્પત્યબન્ધસ્ય તદમ્બ બીજમ્ ॥ ૫.૧૨॥

તવાતિકાન્તા નયાનાન્તવૃત્તિ-
ર્હાસઃ પુરારેશ્ચ નવેન્દુહારી ।
ઉભૌ વિવાહોત્સવપૂર્વરઙ્ગં
નિર્વર્તયામાસતુરાદિરામે ॥ ૫.૧૩॥

દાતું પ્રભુઃ સાન્ત્વયિતું સમર્થઃ
કર્તું ક્ષમસ્તર્જયિતું ચ શક્તઃ ।
સંરક્ષતાન્માં તવ સર્વવન્દ્યે
કરસ્તુષારાંશુભૃતા ગૃહીતઃ ॥ ૫.૧૪॥

સ્પ્રષ્ટું ન શક્યા પરમે પરૈસ્ત્વં
સ ચાન્યયા ચિન્તયિતું ન શક્યઃ ।
ત્વમેવ શર્વસ્ય સ એવ તેઽમ્બ
દામ્પત્યમેવં યુવયોસ્તુ સત્યમ્ ॥ ૫.૧૫॥

નિજાદ્ધતંસેન્દુત ઇન્દુમન્ય-
મુત્પાદ્ય તે શમ્ભુરદાદ્ધતંસમ્ ।
મૂર્તામિવાસૌ શુભગાત્રિ રાત્રિં
પ્રાપ્ય ત્વદીયાં કબરીં ચકાસે ॥ ૫.૧૬॥

બભૂવિથાગેન્દ્રગૃહે યદા ત્વં
સ ચેશ્વરસ્તત્ર ચકાર વાસમ્ ।
વિલોકમાનસ્તવ દેવિ વિદ્યુત્
પાઞ્ચાલિકાયાઃ કમનીયભાવમ્ ॥ ૫.૧૭॥

સિદ્ધં સ વાં સાધયિતું પ્રવૃત્તો
યોગં પ્રદગ્ધો મદનશ્ચ કલ્પે ।
વશીતિ કીર્તિં ગિરિશસ્ય ભર્તું
તુભ્યં ત્વપર્ણેતિ યશશ્ચ કર્તુમ્ ॥ ૫.૧૮॥

ઘોરં તપશ્ચેદ્રચિતં ત્વયાઽપિ
પ્રાગ્રૂપભર્તુઃ સમનુગ્રહાય ।
વિહાય યત્નં ક ઇહાખિલાઽમ્બ
સમ્બદ્ધમપ્યર્થમુપૈતુ જન્તુઃ ॥ ૫.૧૯॥

જ્વલત્કપર્દો દહનાઙ્કભાલઃ
કપાલમાલી કરિકૃત્તિવાસાઃ ।
ભુજઙ્ગભૂષો ભસિતાઙ્ગરાગઃ
પુષ્પેષુ વૈરી પરુષાટ્ટહાસઃ ॥ ૫.૨૦॥

શ્મશાનવાસી પુરુષસ્ત્રિશૂલી
જહાર તે ચેદનઘાઙ્ગિ ચેતઃ ।
દૃષ્ટાન્તમર્થોઽયમવાપ નૈવ
પ્રીતિર્બહિઃકારણમાશ્રિતેતિ ॥ ૫.૨૧॥

રૂપં પુરારેરથવા તદેતત્
સેયં ચ ચેષ્ટા સમયાન્તરેષુ ।
કાન્તં વપુઃ કાન્તતરાશ્ચ લીલા-
સ્ત્વયા સમં ખેલિતુમેષ ધત્તે ॥ ૫.૨૨॥

પ્રહૃષ્ટયક્ષઃ સમવેતસિદ્ધો
નૃત્યદ્ગણેન્દ્રો વિકસન્મુનીન્દ્રઃ ।
ભૂયોઽપિ યોગો યુવયોર્હિમાદ્રૌ
બભાર માતર્મહમદ્વિતીયમ્ ॥ ૫.૨૩॥

મહેશ્વરસ્ત્વાં પરિણીય લેભે
યાવાત્મજૌ દ્વાવનઘાઙ્ગિ મુખ્યૌ ।
એકસ્તયોર્ભ્રામ્યતિ વિશ્વમત્તું
ભૂભૃત્તટીરાશ્રયતે બતાન્યઃ ॥ ૫.૨૪॥

સઙ્કીર્તયન્ત્યો જગતાં જનન્યાઃ

કલ્યાણવાર્તાઃ કમનીયકીર્તેઃ ।
ઇમાઃ પ્રમોદાય સતાં ભવન્તુ
સન્દર્ભશુદ્ધા ઉપજાતયો નઃ ॥ ૫.૨૫॥ 125

---

ષષ્ઠઃ સ્તબકઃ

માહાભાગ્યમ્ (મદલેખાવૃત્તમ્)

હર્તારઃ શશિકીર્તેઃ કર્તારો નવભાસામ્ ।
ભર્તારો મમ સન્તુ સ્કન્દામ્બાદરહાસાઃ ॥ ૬.૧॥

દિગ્વલ્લીષ્વતિશુભ્રાં કુર્વન્તઃ કુસુમર્દ્ધિમ્ ।
ભૂયાસુસ્તવ ભૂત્યૈ મન્માતુઃ સ્મિતલેશાઃ ॥ ૬.૨॥

એકશ્ચેત્તવ શક્તો બ્રહ્માણ્ડસ્ય ભવાય ।
ભર્ગપ્રેયસિ હાસઃ કિં સ્તોત્રં તવ ભૂયઃ ॥ ૬.૩॥

ઉદ્યાને વિયદાખ્યે કાલિ ત્વાં વિહરન્તીમ્ ।
ગોલૈઃ કન્દુકકલ્પૈરલ્પા વાક્કિમુ માતિ ॥ ૬.૪॥

ખં ક્રીડાભવનં તે કઃ કાર્યાલય એષઃ ।
પૃથ્વીયં બહુલાન્ના માતર્ભોજનશાલા ॥ ૬.૫॥

બુદ્ધીનામસિ દાત્રી સિદ્ધીનામસિ નેત્રી ।
વીર્યાણામસિ પેટી કાર્યાણામસિ ધાટી ॥ ૬.૬॥

વિદ્યાનામસિ ભાવો હૃદ્યાનામસિ હાવઃ ।
દેવાનામસિ લીલા દૈત્યાનામસિ હેલા ॥ ૬.૭॥

ગન્તૄણામસિ ચેષ્ટા સ્થાણૂનામસિ નિષ્ઠા ।
લોકાનામસિ મૂલં લોકાદેરસિ જાલમ્ ॥ ૬.૮॥

દેવી વ્યાપકતેજઃ શક્તિસ્તત્ત્વવિચારે ।
અત્યન્તં સુકુમારી નારી મૂર્તિવિચારે ॥ ૬.૯॥

ક્વ જ્યોતિર્મહતોઽસ્માદાકાશાદપિ ભૂયઃ ।
તત્સર્વં વિનયન્તી તન્વઙ્ગી ક્વ નુ નારી ॥ ૬.૧૦॥

દેવેન્દ્રાય વિભુત્વં સૂર્યાયોસ્રસહસ્રમ્ ।
ઊષ્માણં દહનાય જ્યોત્સ્નામોષધિરાજે ॥ ૬.૧૧॥

વાતાયામિતવીર્યં વિસ્તારં ગગનાય ।
સાન્દ્રત્વં વસુધાયૈ તોયાય દ્રવભાવમ્ ॥ ૬.૧૨॥

માહાભાગ્યમપારં કોટિભ્યો વિબુધાનામ્ ।
ચિત્રાઃ કાશ્ચન સિદ્ધીર્લક્ષેભ્યો મનુજાનામ્ ॥ ૬.૧૩॥

સ્થાણુભ્યો ધૃતિશક્તિં ગન્તૃભ્યો ગતિશક્તિમ્ ।
કસ્માચ્ચિન્નિજકોશાદેકા દેવિ દદાના ॥ ૬.૧૪॥

આશ્ચર્યં વિદધાના સર્વં વસ્તુ દધાના ।
હન્ત ત્વં મમ માતઃ કાચિત્કોમલગાત્રી ॥ ૬.૧૫॥

શ્રોણીભારનતાયાં કસ્યાઞ્ચિત્તનુગાત્ર્યામ્ ।
ઈદૃક્ષા યદિ શક્તિઃ કાવેતો નનુ માયા ॥ ૬.૧૬॥

રૂપં તે તનુગાત્રં વાણી તે મૃદુનાદા ।
ચાપં તે મધુરેક્ષુઃ પાણિસ્તે સુકુમારઃ ॥ ૬.૧૭॥

લોલે લોચનયુગ્મે ભીરુત્વં પ્રકટં તે ।
બ્રહ્માણ્ડં ત્વદધીનં શ્રદ્ધત્તામિહ કો વા ॥ ૬.૧૮॥

ભ્રૂભઙ્ગં કુરુષે ચેન્મુગ્ધે ગૌરિ મુખાબ્જે ।
ભૂતાન્યપ્યયિ બિભ્યત્યેજેરન્નપિ તારાઃ ॥ ૬.૧૯॥

શુદ્ધાન્તેશ્વરિ શમ્ભોરિચ્છા ચેત્તવ કાઽપિ ।
ઘોરોઽગ્નિસ્તૃણગર્ભાદ્ઘોરાગ્નેરપિ શૈત્યમ્ ॥ ૬.૨૦॥

દ્રષ્ટું વિશ્વમપારં ભારસ્તે દયિતસ્ય ।
કર્તું કાર્યમશેષં શ્રીમાતસ્તવ ભારઃ ॥ ૬.૨૧॥

સાક્ષી કેવલમીશઃ કર્તું ભર્તુમુતાહો ।
હર્તું વાઽખિલમમ્બ ત્વં સાક્ષાદ્ધૃતદીક્ષા ॥ ૬.૨૨॥

કારઙ્કારમુમે યદ્ બ્રહ્માણ્ડાનિ નિહંસિ ।
તન્મન્યે સુરમાન્યે બાલૈવાઽમ્બ સદા ત્વમ્ ॥ ૬.૨૩॥

લીલોજ્જીવિતકામે રામે શઙ્કરસક્તે ।
ત્વત્પાદાર્ચનસક્તં ભક્તં માં કુરુ શક્તમ્ ॥ ૬.૨૪॥

એતાઃ પાવનગન્ધાઃ સર્વેશપ્રમદે તે ।

હૈરમ્બ્યો મદલેખાઃ સન્તોષાય ભવન્તુ ॥ ૬.૨૫॥ 150

---

સપ્તમઃ સ્તબકઃ

વ્યોમશરીરા, માતૃકાદિવિભૂતયશ્ચ (વસન્તતિલકાવૃત્તમ્)

વાણીસરોરુહદૃશો હયરાજહંસો
વક્ત્રારવિન્દનિલયાદ્બહિરાગતાયાઃ ।
આલાપકાલદરહાસ ઇહ સ્થિતાનાં
ક્ષેમં કરોતુ સુતરાં હરસુન્દરીયઃ ॥ ૭.૧॥

નાદોઽસિ વાગસિ વિભાઽસિ ચિદસ્યખણ્ડા
ખણ્ડીભવન્ત્યપિ ચિદસ્યખિલેન્દ્રકાન્તે ।
તત્તાદૃશીં નિખિલશક્તિસમષ્ટિમીશે
ત્વામન્તરિક્ષપરિક્લૃપ્તતનું નમામિ ॥ ૭.૨॥

વિશ્વપ્રસિદ્ધવિભવાસ્ત્રિષુ વિષ્ટપેષુ
યાઃ શક્તયઃ પ્રવિલસન્તિ પરઃસહસ્રાઃ ।
તાસાં સમષ્ટિરતિચિત્રનિધાનદૃષ્ટિઃ
સૃષ્ટિસ્થિતિપ્રલયકૃદ્ ભુવનેશ્વરિ ત્વમ્ ॥ ૭.૩॥

જાને ન યત્તવ જગજ્જનયિત્રિ રૂપં
સઙ્કુલ્પ્યતે કિમપિ તન્મનસો બલેન ।
સઙ્કુલ્પિતસ્ય વપુષઃ શ્રિતશોકહન્ત્રિ
વિન્યસ્યતે તવ વચોતિગધામ નામ ॥ ૭.૪॥

કામં વદન્તુ વનિતામિતિહાસદક્ષા-
સ્ત્વાં સર્વલોકજનયિત્રિ સદેહબન્ધામ્ ।
સત્યં ચ તદ્ભવતુ સા તવ કાઽપિ લીલા
દિવ્યં રજસ્તુ તવ વાસ્તવિકં શરીરમ્ ॥ ૭.૫॥

ભૂજન્મપાંસુભિરગર્હિતશુદ્ધરૂપા
યા કાઽપિ પાંસુપટલી વિપુલેઽન્તરિક્ષે ।
સા તે તનુઃ સુમહતી વરદે સુસૂક્ષ્મા
તામેવ દેવસરણિં કથયન્તિ ધીરાઃ ॥ ૭.૬॥

યા દેવિ દેવસરણિર્ભવમગ્નદુર્ગા

વૈરોચનીતિ કથિતા તપસા જ્વલન્તી ।
રાજીવબન્ધુમહસા વિહિતાઙ્ગરાગા
સા તે તનુર્ભવતિ સર્વસુપર્વવર્ણ્યે ॥ ૭.૭॥

પ્રાણાસ્તવાત્ર હૃદયં ચ વિરાજતેઽત્ર
નેત્રાણિ ચાત્ર શતશઃ શ્રવણાનિ ચાત્ર ।
ઘ્રાણાનિ ચાત્ર રસનાનિ તથા ત્વચશ્ચ
વાચોઽત્ર દેવિ ચરણાનિ ચ પાણયોઽત્ર ॥ ૭.૮॥

સર્વત્ર પશ્યસિ શ‍ૃણોષિ ચ સર્વતોઽમ્બ
સર્વત્ર ખાદસિ વિજિઘ્રસિ સર્વતોઽપિ ।
સર્વત્ર ચ સ્પૃશસિ માતરભિન્નકાલે
કઃ શક્નુયાન્નિગદિતું તવ દેવિ ભાગ્યમ્ ॥ ૭.૯॥

સર્વત્ર નન્દસિ વિમુઞ્ચસિ સર્વતોઽમ્બ
સર્વત્ર સંસરસિ ગર્જસિ સર્વતોઽપિ ।
સર્વત્રદેવિ કુરુષે તવ કર્મજાલ-
વૈચિત્ર્યમીશ્વરિ નિરૂપયિતું ક્ષમઃ કઃ ॥ ૭.૧૦॥

વિશ્વામ્બિકે ત્વયિ રુચાં પતયઃ કિયન્તો
નાનાવિધાબ્ધિકલિતા ક્ષિતયઃ કિયત્યઃ ।
બિમ્બાનિ શીતમહસાં લસતાં કિયન્તિ
નૈતચ્ચ વેદ યદિ કો વિબુધો બહુજ્ઞઃ ॥ ૭.૧૧॥

અવ્યક્તશબ્દકલયાઽખિલમન્તરિક્ષં
ત્વં વ્યાપ્ય દેવિ સકલાગમસમ્પ્રગીતે ।
નાદોઽસ્યુપાધિવશતોઽથ વચાંસિ ચાસિ
બ્રાહ્મીં વદન્તિ કવયોઽમુકવૈભવાં ત્વામ્ ॥ ૭.૧૨॥

નાનાવિધૈર્ભુવનજાલસવિત્રિ રૂપૈર્-
વ્યાપ્તૈકનિષ્કલગભીરમહસ્તરઙ્ગૈઃ ।
વ્યક્તં વિચિત્રયસિ સર્વમખર્વશક્તે
સા વૈષ્ણવી તવ કલા કથિતા મુનીન્દ્રૈઃ ॥ ૭.૧૩॥

વ્યક્તિત્વમમ્બ હૃદયે હૃદયે દધાસિ
યેન પ્રભિન્ન ઇવ બદ્ધ ઇવાન્તરાત્મા ।
સેયં કલા ભુવનનાટકસૂત્રભર્ત્રિ

માહેશ્વરીતિ કથિતા તવ ચિદ્વિભૂતિઃ ॥ ૭.૧૪॥

આહારશુદ્ધિવશતઃ પરિશુદ્ધસત્ત્વે
નિત્યસ્થિરસ્મૃતિધરે વિકસત્સરોજે ।
પ્રાદુર્ભવસ્યમલતત્ત્વવિભાસિકા યા
સા ત્વં સ્મૃતા ગુરુગુહસ્ય સવિત્રિ શક્તિઃ ॥ ૭.૧૫॥

હવ્યં યયા દિવિષદો મધુરં લભન્તે
કવ્યં યયા રુચિકરં પિતરો ભજન્તે ।
અશ્નાતિ ચાન્નમખિલોઽપિ જનો યયૈવ
સા તે વરાહવદનેતિ કલાઽમ્બ ગીતા ॥ ૭.૧૬॥

દુષ્ટાન્નિહંસિ જગતામવનાય સાક્ષા-
દન્યૈશ્ચ ઘાતયસિ તપ્તબલૈર્મહદ્ભિઃ ।
દમ્ભોલિચેષ્ટિતપરીક્ષ્યબલા બલારેઃ
શક્તિર્ન્યગાદિ તવ દેવિ વિભૂતિરેષા ॥ ૭.૧૭॥

સઙ્કલ્પરક્તકણપાનવિવૃદ્ધશક્ત્યા
જાગ્રત્સમાધિકલયેશ્વરિ તે વિભૂત્યા ।
મૂલાગ્નિચણ્ડશશિમુણ્ડતનુત્રભેત્ર્યા
ચામુણ્ડયા તનુષુ દેવિ ન કિં કૃતં સ્યાત્ ॥ ૭.૧૮॥

ત્વં લોકરાજ્ઞિ પરમાત્મનિ મૂલમાયા
શક્રે સમસ્તસુરભર્તરિ જાલમાયા ।
છાયેશ્વરાન્તરપુમાત્મનિ યોગમાયા
સંસારસક્તહૃદયેષ્વસિ પાશમાયા ॥ ૭.૧૯॥

ત્વં ભૂતભર્તરિ ભવસ્યનુભૂતિનિદ્રા
સોમસ્યપાતરિ બિડૌજસિ મોદનિદ્રા ।
સપ્તાશ્વબિમ્બપુરુષાત્મનિ યોગનિદ્રા
સંસારમગ્નહૃદયેષ્વસિ મોહનિદ્રા ॥ ૭.૨૦॥

વિષ્ણુશ્ચકાર મધુકૈટભનાશનં યન્-
મુક્તઃ સહસ્રદલસમ્ભવસંસ્તુતા સા ।
કાલી ઘનાઞ્જનનિભપ્રભદેહશાલિ-
ન્યુગ્રા તવામ્બ ભુવનેશ્વરિ કોઽપિ ભાગઃ ॥ ૭.૨૧॥

વિદ્યુત્પ્રભામયમધૃષ્યતમં દ્વિષદ્ભિ-
શ્ચણ્ડપ્રચણ્ડમખિલક્ષયકાર્યશક્તમ્ ।
યત્તે સવિત્રિ મહિષસ્ય વધે સ્વરૂપં
તચ્ચિન્તનાદિહ નરસ્ય ન પાપભીતિઃ ॥ ૭.૨૨॥

શુમ્ભં નિશુમ્ભમપિ યા જગદેકવીરૌ
શૂલાગ્રશાન્તમહસૌ મહતી ચકાર ।
સા કૌશિકી ભવતિ કાશયશાઃ કૃશોદ-
ર્યાત્માઙ્ગજા તવ મહેશ્વરિ કશ્ચિદંશઃ ॥ ૭.૨૩॥

માયે શિવે શ્રિતવિપદ્વિનિહન્ત્રિ માતઃ
પશ્ય પ્રસાદભરશીતલયા દૃશા મામ્ ।
એષોઽહમાત્મજકલત્રસુહૃત્સમેતો
દેવિ ત્વદીયચરણં શરણં ગતોઽસ્મિ ॥ ૭.૨૪॥

ધિન્વન્તુ કોમલપદાઃ શિવવલ્લભાયા-
શ્ચેતો વસન્તતિલકાઃ કવિકુઞ્જરસ્ય ।
આનન્દયન્તુ ચ પદાશ્રિતસાધુસઙ્ઘં
કષ્ટં વિધૂય સકલં ચ વિધાય ચેષ્ટમ્ ॥ ૭.૨૫॥ 175

---

અષ્ટમઃ સ્તબકઃ

ચરિત્રત્રયમ્ (અનુષ્ટુબ્વૃત્તમ્)

તમસામભિતો હન્તા ચણ્ડિકાહાસવાસરઃ ।
સતાં હૃદયરાજીવવિકાસાય પ્રકલ્પતામ્ ॥ ૮.૧॥

યા નિદ્રા સર્વભૂતાનાં યોગનિદ્રા રમાપતેઃ ।
ઈડ્યતાં સા મહાકાલી મહાકાલસખી સખે ॥ ૮.૨॥

વિરિઞ્ચિના સ્તુતે માતઃ કાલિ ત્વં ચેન્ન મુઞ્ચસિ ।
મધુકૈટભસંહારં કરોતુ કથમચ્યુતઃ ॥ ૮.૩॥

વાસવઃ કાશનીકાશયશોલઙ્કૃતદિઙ્મુખઃ ।
મહોગ્રવિક્રમાદ્યસ્માદાસીદાજૌ પરાઙ્મુખઃ ॥ ૮.૪॥

યત્પ્રતાપેન સન્તપ્તો મન્યે બાડબરૂપભૃત્ ।
ભગવાનનલોઽદ્યાપિ સિન્ધુવાસં ન મુઞ્ચતિ ॥ ૮.૫॥

કુર્વાણે ભૂતકદનં યસ્મિન્વિસ્મિતચેતસઃ ।
એષ એવાન્તકો નાહમિત્યાસીદન્તકસ્ય ધીઃ ॥ ૮.૬॥

રણે યેનાતિરસ્કૃત્ય ત્યક્તો રાક્ષસ ઇત્યતઃ ।
ચિરાય હરિદીશેષુ કોણેશઃ પ્રાપ્તવાન્યશઃ ॥ ૮.૭॥

યન્નિયન્તુમશક્તસ્ય કુર્વાણમસતીઃ ક્રિયાઃ ।
નિયન્તુરસતામાસીત્પાશિનો મલિનં યશઃ ॥ ૮.૮॥

બાહુવીર્યપરાભૂતો યસ્ય પ્રાયેણ મારુતઃ ।
બભૂવ ક્ષણદાન્તેષુ રતાન્તપરિચારકઃ ॥ ૮.૯॥

નિધીન્યેન જિતો હિત્વા રાજરાજઃ પલાયિતઃ ।
સ્પષ્ટં બભાણ માધુર્યં પ્રાણાનામખિલાદપિ ॥ ૮.૧૦॥

યસ્મિન્નુત્તરપૂર્વસ્યા દિશ એકાદશાધિપાઃ ।
કુણ્ઠા બભૂવુરાત્મીયકણ્ઠોપમિતકીર્તયઃ ॥ ૮.૧૧॥

નિજશુદ્ધાન્તકાન્તાનામાનનૈરેવ નિર્જિતમ્ ।
લલજ્જે યઃ પુનર્જિત્વા શૂરમાની સુધાકરમ્ ॥ ૮.૧૨॥

બાલસ્યેવ ક્રીડનકૈઃ પ્રવીરૈર્યસ્ય ખેલતઃ ।
લીલાકન્દુકધીરાસીદ્દેવે દીધિતિમાલિનિ ॥ ૮.૧૩॥

ત્રિયામાચરશુદ્ધાન્તભ્રૂવિલાસનિવારણમ્ ।
વિષ્ણોઃ સુદર્શનં ચક્રં યસ્ય નાપશ્યદન્તરમ્ ॥ ૮.૧૪॥

મહિષં તં મહાવીર્યં યા સર્વસુરદેહજા ।
અવધીદ્દાનવં તસ્યૈ ચણ્ડિકાયૈ નમો નમઃ ॥ ૮.૧૫॥

મુખં તવાસેચનકં ધ્યાયં ધ્યાયં નિરન્તરમ્ ।
મૃગેન્દ્રવાહે કાલેન મૃડસ્ત્વન્મુખતાં ગતઃ ॥ ૮.૧૬॥

કાર્તિકીચન્દ્રવદના કાલિન્દીવીચિદોર્લતા ।
અરુણામ્ભોજચરણા જયતિ ત્રિરુચિઃ શિવા ॥ ૮.૧૭॥

યત્તે કચભરઃ કાલો યદ્બાહુર્લોકરક્ષકઃ ।
યુક્તં દ્વયં શિવે મધ્યસ્ત્વસન્નાકો ન નાકરાટ્ ॥ ૮.૧૮॥

સ્વદેહાદેવ યા દેવી પ્રદીપાદિવ દીપિકા ।

આવિર્ભભૂવ દેવાનાં સ્તુવતાં હર્તુમાપદઃ ॥ ૮.૧૯॥

ધૈર્યચાતુર્યગામ્ભીર્યવીર્યસૌન્દર્યશાલિનીમ્ ।
રત્નં નિતમ્બિનીજાતૌ મેનિરે યાં સુરાસુરાઃ ॥ ૮.૨૦॥

યદીયહુઙ્કૃત્યનલે ધૂમ્રાક્ષોઽભવદાહુતિઃ ।
સમાપ્તિં ભીષણં યાવન્નૈવાવાપ વિકત્થનમ્ ॥ ૮.૨૧॥

ચામુંડાશિવદૂત્યૌ યત્ કલે દારુણવિક્રમે ।
ભક્ષયામાસતુર્મૂર્તીઃ કીર્તિભિઃ સહ રક્ષસામ્ ॥ ૮.૨૨॥

યસ્યાઃ શૂલે જગામાસ્તં યશઃ શુમ્ભનિશુમ્ભયોઃ ।
નમામિ વિમલશ્લોકાં કૌશિકીં નામ તામુમામ્ ॥ ૮.૨૩॥

યશોદાગર્ભજનનાદ્ યશોદાં ગોકુલસ્ય તામ્ ।
વન્દે ભગવતીં નન્દાં વિન્ધ્યાચલનિવાસિનીમ્ ॥ ૮.૨૪॥

અમ્બિકામુપતિષ્ઠન્તામેતાશ્ચણ્ડીમનુષ્ટુભઃ ।
પ્રસન્નાઃ સાધ્વલઙ્કારાઃ સિદ્ધપદ્મેક્ષણા ઇવ ॥ ૮.૨૫॥ 200

॥ સમાપ્તં ચ દ્વિતીયં શતકમ્ ॥

---

તૃતીયં શતકમ્

નવમઃ સ્તબકઃ

મન્દહાસઃ (આર્યાવૃત્તમ્)

શારદવલક્ષપક્ષક્ષણદાવૈમલ્યશિક્ષકોઽસ્માકમ્ ।
જાગર્તુ રક્ષણાય સ્થાણુપુરન્ધ્રીમુખવિકાસઃ ॥ ૯.૧॥

વ્યાખ્યાનં હર્ષસ્ય પ્રત્યાખ્યાનં શરત્સુધાભાનોઃ ।
દિશતુ હૃદયપ્રસાદં ગૌરીવદનપ્રસાદો નઃ ॥ ૯.૨॥

અન્તર્ગતસ્ય હર્ષક્ષીરસમુદ્રસ્ય કશ્ચન તરઙ્ગઃ ।
હાસો હરહરિણદૃશો ગતપઙ્કં મમ કરોતુ મનઃ ॥ ૯.૩॥

દિશિ દિશિ વિસર્પદંશુપ્રશમિતતાપં પરાસ્તમાલિન્યમ્ ।
કુશલાનિ પ્રદિશતુ નઃ પશુપતિહૃદયેશ્વરીહસિતમ્ ॥ ૯.૪॥

અન્તર્ગતં ચ તિમિરં હરન્તિ વિહસન્તિ રોહિણીકાન્તમ્ ।

હસિતાનિ ગિરિશસુદૃષો મમ પ્રબોધાય કલ્પન્તામ્ ॥ ૯.૫॥

ભાષાતુષારદીધિતિદીધિત્યા સહ વિહાયસો રઙ્ગે ।
વિચરન્ પુરહરતરુણીદરહાસો મે હરત્વેનઃ ॥ ૯.૬॥

રુદ્રાણીદરહસિતાન્યસ્માકં સંહરન્તુ દુરિતાનિ ।
યેષામુદયો દિવસો ભૂષાપીયૂષકિરણસ્ય ॥ ૯.૭॥

સ્કન્દજનનીમુખેન્દોરસ્માન્ પુષ્ણાતુ સુસ્મિતજ્યોત્સ્ના ।
મુનિમતિકૈરવિણીનામુલ્લાસકથા યદાયત્તા ॥ ૯.૮॥

કમનીયકણ્ઠમાલામુક્તામણિતારકાવયસ્યો નઃ ।
કામાન્ વિતરતુ ગૌરીદરહાસો નામ ધવલાંશુઃ ॥ ૯.૯॥

અનવદ્યકણ્ઠમાલામુક્તાવલિકિરણનિવહસહવાસી ।
હરદયિતાદરહાસો હરતુ મમાશેષમજ્ઞાનમ્ ॥ ૯.૧૦॥

ઞ ઇવ જ્ઞાદૃશ્ય ઉત્તમ ઇલાધરાધીશનન્દિનીહાસઃ ।
પૂર્ણં કરોતુ માનસમભિલાષં સર્વમસ્માકમ્ ॥ ૯.૧૧॥

આલોકમાત્રતો યઃ શઙ્કરમસમાસ્ત્રકિઙ્કરં ચક્રે ।
અલ્પોઽપ્યનલ્પકર્મા હાસો નઃ પાતુ સ શિવાયાઃ ॥ ૯.૧૨॥

સ્મરમતરતમીશં યઃ કરોતિ ભાવપ્રસઙ્ગચાતુર્યા ।
દ્વિજગણપુરસ્કૃતોઽવ્યાત્ સ શિવાહાસપ્રવક્તા નઃ ॥ ૯.૧૩॥

રદવાસસા રથી માં શરી કરૈઃ પાતુ પાર્વતીહાસઃ ।
પાવકદૃશં જિગીષોઃ પઞ્ચપૃષત્કસ્ય સેનાનીઃ ॥ ૯.૧૪॥

શિવહૃદયમર્મભેદિ સ્મિતં તદદ્રીશવંશમુક્તાયાઃ ।
દશનદ્યુતિદ્વિગુણિતશ્રીકં શોકં ધુનોતુ મમ ॥ ૯.૧૫॥

બ્રહ્માણ્ડરઙ્ગભાજો નટ્યાઃ શિવસૂત્રધારસહચર્યાઃ ।
શ્રીવર્ધનોઽનુલેપો મુખસ્ય હાસઃ પુનાત્વસ્માન્ ॥ ૯.૧૬॥

અધરપ્રવાલશયને નાસાભરણપ્રભાવિલાસિન્યા ।
રમમાણો હરરમણીહાસયુવા હરતુ નઃ શોકમ્ ॥ ૯.૧૭॥

અધરોષ્ઠવેદિકાયાં નાસાભરણાંશુશાબકૈઃ સાકમ્ ।
કુલમખિલમવતુ ખેલન્નદ્રિસુતાહાસબાલો નઃ ॥ ૯.૧૮॥

અનુલેપનસ્ય વીપ્સા દ્વિર્ભાવઃ કુચતટીદુકૂલસ્ય ।
હરતુ હૃદયવ્યથાં મે હસિતં હરજીવિતેશ્વર્યાઃ ॥ ૯.૧૯॥

ગિરિશાઙ્ગરાગભસિતં સ્વાગતવચસાઽભિનન્દદાદરતઃ ।
ગિરિજાલીલાહસિતં ગરીયસીં મે તનોતુ ધિયમ્ ॥ ૯.૨૦॥

દયિતેન સઁલ્લપન્ત્યાઃ સહ તુહિનમરીચિશિશુકિરીટેન ।
વાગમૃતબુદ્બુદોઽવ્યાદલસો મામગભુવો હાસઃ ॥ ૯.૨૧॥

શુદ્ધઃ કુચાદ્રિનિલયાદપિ મુક્તાહારતો હરપુરન્ધ્ર્યાઃ ।
વદનશ્રીપ્રાસાદે વિલસન્ હાસોઽલસોઽવતુ મામ્ ॥ ૯.૨૨॥

વ્યર્થીભૂતે ચૂતે ગતવતિ પરિભૂતિમસિતજલજાતે ।
અનિતે સિદ્ધિમશોકે કમલેઽપિ ગલજ્જયશ્રીકે ॥ ૯.૨૩॥

બહુધા બિભેદ હૃદયં હરસ્ય બાણેન યેન સુમબાણઃ ।
તદુમાલીલાહસિતં મલ્લીસુમમસ્તુ મે ભૂત્યૈ ॥ ૯.૨૪॥

અમલદરસ્મિતચિહ્નાસ્તા એતાઃ સર્વમઙ્ગલા આર્યાઃ ।
કમનીયતમાસ્વસમામુપતિષ્ઠન્તામુમાં દેવીમ્ ॥ ૯.૨૫॥ 225

---

દશમઃ સ્તબકઃ

કેશાદિપાદાન્તવર્ણનમ્ (લલિતાવૃત્તમ્)

સઙ્ક્ષાલનાય હરિતાં વિભૂતયે
લોકત્રયસ્ય મદનાય ધૂર્જટેઃ ।
કાત્યાયનીવદનતઃ શનૈઃ શનૈર્-
નિર્યન્તિ શુભ્રહસિતાનિ પાન્તુ નઃ ॥ ૧૦.૧॥

સ્વલ્પોઽપિ દિક્ષુ કિરણાન્ પ્રસારયન્
મન્દોઽપિ બોધમમલં દધત્સતામ્ ।
શુભ્રોઽપિ રાગકૃદનઙ્ગવૈરિણો
હાસઃ પુરાણસુદૃશઃ પુનાતુ નઃ ॥ ૧૦.૨॥

ચેતોહરોઽપ્યતિજુગુપ્સિતો ભવેત્
સર્વોઽપિ જીવકલયા યયા વિના ।
સા વર્ણ્યતાં કથમપારચારુતા

પીયૂષસિન્ધુરખિલેન્દ્રસુન્દરી ॥ ૧૦.૩॥

અત્યલ્પદેવવનિતાં ચ પાર્થિવૈર્-
ભાવૈર્વયં તુલયિતું ન શક્નુમઃ
તાં કિં પુનઃ સકલદેવસુન્દરી ।
લોકાક્ષિપારણતનુપ્રભામુમામ્ ॥ ૧૦.૪॥

વર્ષાપયોદપટલસ્ય સાન્દ્રતા
સૂર્યાત્મજોર્મિચયનિમ્નતુઙ્ગતા ।
કાલાહિભૂમિપતિદીર્ઘતા ચ તે
કેશેષુ ભર્ગભવનેશ્વરિ ત્રયમ્ ॥ ૧૦.૫॥

ઈશાનસુન્દરિ તવાસ્યમણ્ડલા-
ન્નીચૈર્નિતાન્તમમૃતાંશુમણ્ડલમ્ ।
કો વા ન કીર્તયતિ લોષ્ટપિણ્ડકં
લોકે નિકૃષ્ટમિહ માનવીમુખાત્ ॥ ૧૦.૬॥

બિભ્રત્યમર્ત્યભુવનસ્થદીર્ઘિકા
પઙ્કેરુહાણિ વદનાય તે બલિમ્ ।
નો ચેત્ કથં ભવતિ સૌરભં મહ-
દ્ભિન્ને સુમેભ્ય ઉરુકેશિ તે મુખે ॥ ૧૦.૭॥

ગીર્વાણલોકતટિનીજલેરુહાં
ગન્ધે શુભે ભવતુ તે મનોરતિઃ ।
લોકાધિરાજ્ઞિ તવ વક્ત્રસૌરભે
લોકાધિરાજમનસસ્તુ સમ્મદઃ ॥ ૧૦.૮॥

કો ભાષતાં તવ સવિત્રિ ચારુતાં
યસ્યાઃ સ્મિતસ્ય ધવલદ્યુતિર્લવઃ ।
યસ્યાઃ શરીરરુચિસિન્ધુવીચયઃ
શમ્પાલતાઃ પૃથુલદીપ્તિભૂમયઃ ॥ ૧૦.૯॥

લોકામ્બિકે ન વિલસન્તિ કે પુરો
મન્દસ્મિતસ્ય તવ રોચિષાં નિધેઃ ।
યે તુ વ્યધાયિષત તેન પૃષ્ઠતો
હન્તૈષુ કાઽપિ તિમિરચ્છટા ભવેત્ ॥ ૧૦.૧૦॥

કિં વા રદાવલિરુચિર્મુખસ્ય કિં
સમ્ફુલ્લતા વરધિયઃ કિમૂર્મિકા ।
સન્તોષપાદપસુમં નુ શઙ્કર-
પ્રેમસ્વરૂપમુત દેવિ તે સ્મિતમ્ ॥ ૧૦.૧૧ ॥

દિક્ષુ પ્રકાશપટલં વિતન્વતા
કોટિપ્રભાકરવિભક્તતેજસા ।
નેત્રેણ તે વિષમનેત્રવલ્લભે
પઙ્કેરુહં ક ઉપમાતિ પણ્ડિતઃ ॥ ૧૦.૧૨ ॥

શ્રીકર્ણ એષ તવ લોચનાઞ્ચલે
ભાન્ત્યા દયાદયિતયા પ્રબોધિતઃ ।
એતં સવિત્રિ મમ કઞ્ચન સ્તવં
શ્રુત્વા તનોતુ ભરતાવનેઃ શ્રિયમ્ ॥ ૧૦.૧૩ ॥

સ્વા નાસિકા ભવતિ યુઞ્જતાં સતાં
સંસ્તમ્ભિની ચલતમસ્ય ચક્ષુષઃ ।
ત્વન્નાસિકા પુરહરસ્ય ચક્ષુષઃ
સંસ્તમ્ભિની ભવતિ ચિત્રમમ્બિકે ॥ ૧૦.૧૪ ॥

બિમ્બપ્રવાલનવપલ્લવાદિતઃ
પીયૂષસારભરણાદ્ ગુણાધિકઃ ।
ગોત્રસ્ય પુત્રિ શિવચિત્તરઞ્જકઃ
શ્રેષ્ઠો નિતાન્તમધરાધરોઽપિ તે ॥ ૧૦.૧૫ ॥

દોર્વલ્લિકે જનનિ તે તટિત્પ્રભા-
મન્દારમાલ્યમૃદુતાપહારિકે ।
નિશ્શેષબન્ધદમનસ્ય ધૂર્જટેર્-
બન્ધાય ભદ્રચરિતે બભૂવતુઃ ॥ ૧૦.૧૬ ॥

હસ્તાબ્જયોસ્તવ મૃદુત્વમદ્ભુતં
ગૃહ્ણાતિ યે સદયમેવ ધૂર્જટિઃ
અત્યદ્ભુતં જનનિ દાઢર્યમેતયોઃ
શુમ્ભાદિદર્પવિલયો યયોરભૂત્ ॥ ૧૦.૧૭ ॥

રાજન્તુ તે કુચસુધાપ્રપાયિનો
લોકસ્ય માતરનઘાઃ સહસ્રશઃ ।

એતેષુ કશ્ચન ગજાનનઃ કૃતી
ગાયન્તિ યં સકલદાયિસત્કરમ્ ॥ ૧૦.૧૮॥

ત્વન્નાભિકૂપપતિતાં દૃશં પ્રભોર્-
નેતું વિનિર્મલગુણે પુનસ્તટમ્ ।
સૌમ્યત્વદીયહૃદયપ્રસારિતઃ
પાશઃ સવિત્રિ તવ રોમરાજિકા ॥ ૧૦.૧૯॥

ત્વન્મધ્યમો ગગનલોક એવ ચેત્
ત્વદ્દિવ્યવૈભવવિદો ન વિસ્મયઃ ।
પ્રાજ્ઞૈર્હિ સુન્દરિ પુરત્રયદ્વિષ-
સ્ત્વં દેહિની ત્રિભુવનેન ગીયસે ॥ ૧૦.૨૦॥

નાભિહૃદાદ્વિગલિતઃ કટીશિલા-
ભઙ્ગાત્ પુનઃ પતતિ કિં દ્વિધાકૃતઃ ।
કાન્તોરુયુગ્મમિષતઃ સવિત્રિ તે
ભાવારિપૂર ઇભશુણ્ડયોઃ સમઃ ॥ ૧૦.૨૧॥

જઙ્ઘાયુગં તવ મહેશનાયિકે
લાવણ્યનિર્ઝરિ જગદ્વિધાયિકે ।
અન્તઃપરિસ્ફુરદગુપ્તસુપ્રભા-
બાણાઢ્યતૂણયુગલં રતીશિતુઃ ॥ ૧૦.૨૨॥

પુષ્પાસ્ત્રશાસનનિશાન્તરાજ્ઞિ તે
લોકત્રયસ્થખલકમ્પનં બલમ્ ।
શ્રોણીભરેણ ગમને કિલ શ્રમં
પ્રાપ્નોષિ કેન તવ તત્ત્વમુચ્યતામ્ ॥ ૧૦.૨૩॥

યત્રૈવ નિત્યવિહૃતેરભૂદ્રમા
રાજીવમન્દિરચરીતિ નામતઃ ।
તન્મે સદા ભણતુ મઙ્ગલં શિવા
પાદામ્બુસમ્ભવમમેયવૈભવમ્ ॥ ૧૦.૨૪॥

કેશાદિપાદકમલાન્તગાયિનીઃ
કન્તુપ્રશાસનનિશાન્તનાયિકા ।
અઙ્ગીકરોતુ લલિતા ઇમાઃ કૃતીર્-
ગૌરી કવેશ્વરણકઞ્જસેવિનઃ ॥ ૧૦.૨૫॥ 250

એકાદશઃ સ્તબકઃ

પાદાદિકેશાન્તવર્ણનમ્ (આર્યાવૃત્તમ્)

ઝષકેતુના પ્રયુક્તઃ સમ્મોહનચૂર્ણમુષ્ટિરીશાને ।
દરહાસો ધરદુહિતુઃ કરોતુ ભુવનં વશેઽસ્માકમ્ ॥ ૧૧.૧॥

ઉપજીવદ્ભિઃ કાન્તેર્લેશાંસ્તે જગતિ સુન્દરૈર્ભાવૈઃ ।
ઉપમિતુમઙ્ગાનિ તવ પ્રાયો લજ્જેઽમ્બ યતમાનઃ ॥ ૧૧.૨॥

અવતંસપલ્લવતુલાં બિભ્રાણં શ્રુતિનતભ્રુવઃ શિરસિ ।
ચરણં વ્રજામિ શરણં વામં કામારિલલનાયાઃ ॥ ૧૧.૩॥

શઙ્કરનયનોન્માદનમતિમધુરં ભાતિ મતિમતા વર્ણ્યે ।
જઙ્ઘાયુગં ભવત્યાઃ કુસુમપૃષત્કસ્ય સર્વસ્વમ્ ॥ ૧૧.૪॥

એકૈકલોકને દ્વયમન્યોન્યસ્મરણહેતુતામેતિ ।
દેવિ ભવસ્ય તવોરુઃ શુણ્ડા ચ ગજેન્દ્રવદનસ્ય ॥ ૧૧.૫॥

નાકોઽવલગ્નમીશ્વરિ કટિરવનિર્ભોગિનાં જગન્નાભિઃ ।
કુક્ષૌ ન કેવલં તે બહિરપિ વપુષિ ત્રયો લોકાઃ ॥ ૧૧.૬॥

મન્યે મહાકૃપાણં તવ વેણીમચલપુત્રિ મદનસ્ય ।
અસિધેનુકાં વિશઙ્કે નિશિતતરાગ્રાં તુ રોમાલિમ્ ॥ ૧૧.૭॥

દ્વિરદવદનેન પીતં ષડ્વદનેનાથ સકલભુવનેન ।
અક્ષય્યક્ષીરામૃતમમ્બાયાઃ કુચયુગં જયતિ ॥ ૧૧.૮॥

જગદમ્બ લમ્બમાના પાર્શ્વદ્વિતયે તવાગલાદ્ભાતિ ।
સાન્દ્રગ્રથિતમનોજ્ઞપ્રસૂનમાલેવ ભુજયુગલી ॥ ૧૧.૯॥

જાનન્તિ શક્તિમસુરાઃ સુષમાં સખ્યો વદાન્યતામૃષયઃ ।
મૃદુતાં તવામ્બ પાણેર્વેદ સ દેવઃ પુરાં ભેત્તા ॥ ૧૧.૧૦॥

કમ્બુસદૃગમ્બ જગતાં મણિવેષોઽસ્રજાકૃતાકલ્પઃ ।
કણ્ઠોઽનઘસ્વરસ્તે ધૂર્જટિદોર્નયનકર્ણહિતઃ ॥ ૧૧.૧૧॥

હરકાન્તે વદનં તે દર્શં દર્શં વતંસશીતાંશુઃ ।
પૂર્ણોઽપ્યવાપ કૃશતાં પ્રાયેણાસૂયયા શુષ્કઃ ॥ ૧૧.૧૨॥

ચન્દ્રં રણાય સકલા ચપલાક્ષીવદનજાતિરાહ્વયતામ્ ।
તં તુ મહસા મુખં તે મહેશકાન્તે જિગાયૈકમ્ ॥ ૧૧.૧૩॥

વદનકમલં તવેશ્વરિ કમલજયાદ્દર્પિતં સુધાભાનુમ્ ।
નિર્જિત્ય કમલજાતેરમલં મહદાજહાર યશઃ ॥ ૧૧.૧૪॥

લાવણ્યમરન્દાશા ભ્રમદ્ભવાલોકબમ્ભરં પરિતઃ ।
મુગ્ધં મુખારવિન્દં જયતિ નગાધીશનન્દિન્યાઃ ॥ ૧૧.૧૫॥

શુદ્ધેન્દુસારનિર્મિતમાસ્યાર્ધં તે ભવાનિ ભાલમયમ્ ।
સકલરમણીયસારૈર્નિર્મિતમર્ધાન્તરં વિધિના ॥ ૧૧.૧૬॥

વદનં તવાદ્રિદુહિતર્વિજિતાય નતાય શીતકિરણાય ।
દ્વારપપદવીં પ્રદદા વયમિહ દરહાસનામધરઃ ॥ ૧૧.૧૭॥

તે તે વદન્તુ સન્તો નયનં તાટઙ્કમાલયં મુકુટમ્ ।
કવયો વયં વદામઃ સિતમહસં દેવિ તે હાસમ્ ॥ ૧૧.૧૮॥

બિમ્બાધરસ્ય શોભામમ્બાયાઃ કો નુ વર્ણયિતુમીષ્ટે ।
અન્તરપિ યા પ્રવિશ્ય પ્રમથપતેર્વિતનુતે રાગમ્ ॥ ૧૧.૧૯॥

ગણપતયે સ્તનઘટયોઃ પદકમલે સપ્તલોકભક્તેભ્યઃ ।
અધરપુટે ત્રિપુરજિતે દધાસિ પિયૂષમમ્બ ત્વમ્ ॥ ૧૧.૨૦॥

દૃક્પીયૂષતટિન્યાં નાસાસેતૌ વિનિર્મિતે વિધિના ।
ભાસાં ભવતિ શિવે તે મુખે વિહારો નિરાતઙ્કઃ ॥ ૧૧.૨૧॥

કમલાવિલાસભવનં કરુણાકેલીગૃહં ચ કમનીયે ।
હરદયિતે તે વિનિતહિતે નયને તે જનનિ વિજયેતે ॥ ૧૧.૨૨॥

સર્વાણ્યપ્યઙ્ગાનિ શ્રીમન્તિ તવેન્દુચૂડકુલકાન્તે ।
કવિનિવહવિનુતિપાત્રે શ્રોત્રે દેવિ શ્રિયાવેવ ॥ ૧૧.૨૩॥

અપિ કુટિલમલિનમુગ્ધસ્તવ કેશઃ પુત્રિ ગોત્રસુત્રામ્ણઃ ।
બિભ્રત્સુમાનિ કાન્યપિ હૃદયં ભુવનપ્રભોર્હરતિ ॥ ૧૧.૨૪॥

ચરણાદિકુન્તલાન્તપ્રકૃષ્ટસૌન્દર્યગાયિનીરેતાઃ ।
અઙ્ગીકરોતુ શમ્ભોરમ્ભોજદૃગાત્મજસ્યાર્યાઃ ॥ ૧૧.૨૫॥ 275

દ્વાદશઃ સ્તબકઃ

શૃઙ્ગારવર્ણનમ્ (રથોદ્ધતાવૃત્તમ્)

શર્વધૈર્યગુણશાતશસ્ત્રિકા શમ્બરારિજયકેતુપટ્ટિકા ।
મન્દહાસિકલિકા મદાપદં પર્વતેન્દ્રદુહિતુર્વ્યપોહતુ ॥ ૧૨.૧॥

મુક્તભોગિકટકેન પાણિના મુગ્ધગાત્રિ પરિગૃહ્ય તે કરમ્ ।
એકદા શશિકિશોરશેખરઃ સઞ્ચચાર રજતાદ્રિભૂમિષુ ॥ ૧૨.૨॥

તસ્ય તત્ર પરિતઃ પરિભ્રમન્ વલ્લભાં વકુલપુષ્પચુમ્બિનીમ્ ।
પાર્વતિ ત્વદલકોપમદ્યુતિઃ ઝ્ચરીકતરુણો મનોઽધુનોત્ ॥ ૧૨.૩॥

પ્રેયસીં ચપલચારુલોચનામુલ્લિખન્ વપુષિ શૃઙ્ગકોટિના ।
ત્વદ્વિલોકિતનિભૈર્વિલોકિતૈઃ ધૂર્જટેરમદયન્મનો મૃગઃ ॥ ૧૨.૪॥

મઞ્જુકુઞ્જભવનાનિ માલતીપુષ્પરેણુસુરભિઃ સમીરણઃ ।
પેશલા ચ પિકબાલકાકલી મોહમીશ્વરિ હરસ્ય તેનિરે ॥ ૧૨.૫॥

અગ્રતઃ કુસુમશોભિતા લતાઃ પાર્શ્વતસ્ત્વમગપાલબાલિકે ।
સર્વતો મદનશિઞ્જિનીધ્વનિર્ધીરતા કથમિવાસ્ય વર્તતામ્ ॥ ૧૨.૬॥

કીરકૂજિતસમાકુલે વને શમ્ભુમમ્બ તવ પાર્શ્વવર્તિનમ્ ।
આજઘાન મકરધ્વજશ્શરૈરર્દયન્ત્યવસરે હિ શત્રવઃ ॥ ૧૨.૭॥

તાડિતો મકરકેતુના શરૈરંસદેશમવલમ્બ્ય પણિના ।
એકહાયનકુરઙ્ગલોચના ત્વામિદં કિલ જગાદ શઙ્કરઃ ॥ ૧૨.૮॥

કાકલીકલકલં કરોત્યસૌ બાલચૂતમધિરુહ્ય કોકિલા ।
વાચમુદ્ગિર સરોજલોચને ગર્વમુન્નતમિયં વિમુઞ્ચતુ ॥ ૧૨.૯॥

ફુલ્લકુન્દમકરન્દવાહિનો મલ્લિકામુકુલધૂલિધારિણઃ ।
કમ્પયન્તિ શિશવઃ સમીરણાઃ પલ્લવાનિ હૃદયં ચ તન્વિ મે ॥ ૧૨.૧૦॥

વર્ણનેન હૃતચક્ષુષઃ શ્રિયઃ સુપ્રસન્નમધુરાકૃતીનિ તે ।
અઙ્ગકાનિ દયિતે ભજેઽર્ભકઃ સ્વેદબિન્દુહરણેન વાઽનિલઃ ॥ ૧૨.૧૧॥

તાવદેવ મમ ચેતસો મુદે બર્હમેતદનઘાઙ્ગિ બર્હિણઃ ।
યાવદક્ષિપથમેષ વિશ્લથો ગાહતે ન કબરીભરસ્તવ ॥ ૧૨.૧૨॥

રાગવાનધર એષ સન્તતં નિર્મલદ્વિજસમીપવર્ત્યપિ ।

એભિરસ્ય સહવાસતઃ પ્રિયે નેષદપ્યપગતો નિજો ગુણઃ ॥ ૧૨.૧૩ ॥

ચક્ષુષઃ સુદતિ તે સગોત્રતા કૈરવૈર્નિશિ દિને કુશેશયૈઃ ।
કશ્યપૈરપિ વસિષ્ઠબાન્ધવૈર્ભૂસુપર્વણ ઇવ દ્વિગોત્રિણઃ ॥ ૧૨.૧૪ ॥

અલ્પયાઽપ્યતિસમર્થયા સ્મિતજ્યોત્સ્નયા ગગનગં હરત્તમઃ ।
કેવલં સુવચનામૃતં કિરચ્ચન્દ્રબિમ્બમતુષારમાનનમ્ ॥ ૧૨.૧૫ ॥

નિત્યમબ્જમુખિ તે પરસ્પરશ્લિષ્ટમશ્લથપટીકુટીરગમ્ ।
શર્વરીભયવિવર્જિતં સ્થલીચક્રવાકમિથુનં કુચદ્વયમ્ ॥ ૧૨.૧૬ ॥

લાલનીયમયિ દેવમૌલિભિઃ કોમલં ચરણપલ્લવદ્વયમ્ ।
કચ્ચિદદ્રિપુરુહૂતપુત્રિકે ન સ્થલી તુદતિ કર્કશા તવ ॥ ૧૨.૧૭ ॥

એવમાદિ વદતિ ત્રિલોચને ત્વન્મુખે લસતિ મૌનમુદ્રયા ।
આતતાન જલચારિકેતનો નર્તનં નગમહેન્દ્રબાલિકે ॥ ૧૨.૧૮ ॥

દેવિ તે પુરજિતાવતંસિતઃ પારિજાતકુસુમસ્રજા કચઃ ।
માનસં પુરજિતોઽમુના હૃતં સ્મર્યતે ક્વ મલિનાત્મના કૃતમ્ ॥ ૧૨.૧૯ ॥

બ્રહ્મચર્યનિયમાદચઞ્ચલા નાયિકા યદિ લુલાયમર્દિની ।
નાયકશ્ચ સુમબાણસૂદનો વેદ કો રતિરહસ્યમાવયોઃ ॥ ૧૨.૨૦ ॥

લોચનોત્સવવિધૌ વિશારદે વારિદાવરણદોષવર્જિતે ।
મર્દયત્યપિ નભોગતં તમઃ શ્યામિકારહિતસુન્દરાકૃતૌ ॥ ૧૨.૨૧ ॥

ભાતિ શીતકિરણસ્તનન્ધયે પ્રાણનાયકજટાકુટીજુષિ ।
શુભ્રપર્વતતટે શુભાઙ્ગિ તે સમ્મદાય ન બભૂવ કા નિશા ॥ ૧૨.૨૨ ॥

સન્તુ ભૂષણસુધાંશુદીધિતિ વ્યક્તમુગ્ધમુખશોભયોર્મિથઃ ।
તાનિ તાનિ ગિરિજાગિરીશયોઃ ક્રીડિતાનિ જગતો વિભૂતયે ॥ ૧૨.૨૩ ॥

મોદકાદનપરસ્ય સૃષ્ટયે ક્રીડિતં જનનિ વાં કિમપ્યભૂત્ ।
શક્તિભૃત્તનયરત્નજન્મને કિઞ્ચિદીશ્વરિ બભૂવ ખેલનમ્ ॥ ૧૨.૨૪ ॥

માધુરીરસપરિપ્લુતા ઇમાઃ કાવ્યકણ્ઠવિદુષો રથોદ્ધતાઃ ।
આદધત્વચલનાથનન્દિની માનસે કમપિ મોદમુત્તમમ્ ॥ ૧૨.૨૫ ॥ 300

॥ સમાપ્તં ચ તૃતીયં શતકમ્ ॥

ચતુર્થં શતકમ્

ત્રયોદશઃ સ્તબકઃ

કટાક્ષઃ (ઉપજાતિવૃત્તમ્)

ભવામ્બુધિં તારયતાદ્ભવન્તં
હાસોઽદ્ભુતઃ કુઞ્જરવક્ત્રમાતુઃ ।
યો હન્તિ બિમ્બાધરલઙ્ઘનેઽપિ
વ્યક્તાલસત્વો હરિતાં તમાંસિ ॥ ૧૩.૧॥

સક્તઃ સદા ચન્દ્રકલાકલાપે
સર્વેષુ ભૂતેષુ દયાં દધાનઃ ।
ગૌરીકટાક્ષો રમણો મુનિર્વા
મદીયમજ્ઞાનમપાકરોતુ ॥ ૧૩.૨॥

કૃપાવલોકો નગકન્યકાયાઃ
કરોતુ મે નિર્મલમન્તરઙ્ગમ્ ।
યેનાઙ્કિતઃ શઙ્કર એકતત્ત્વં
વિશ્વં લુલોકે જગતે જગૌ ચ ॥ ૧૩.૩॥

કાલીકટાક્ષો વચનાનિ મહ્યં
દદાતુ મોચામદમોચનાનિ ।
યત્પાતપૂતં રઘુવંશકારં
નરાકૃતિં પ્રાહુરજસ્ય નારીમ્ ॥ ૧૩.૪॥

યુષ્માકમગ્ર્યાં વિતનોતુ વાણી-
મેણીદૃગેષા ગિરિશસ્ય યોષા ।
યસ્યાઃ કટાક્ષસ્ય વિસારિ વીર્યં
ગિરામયં મે વિવિધો વિલાસઃ ॥ ૧૩.૫॥

નગાત્મજાયાઃ કરુણોર્મિશાલી
દૃગન્તસન્તાનધુનીપ્રવાહઃ ।
ભીષ્મેણ તપ્તાન્ભવનામકેન
ગ્રીષ્મેણ યુષ્માઁચ્છિશિરીકરોતુ ॥ ૧૩.૬॥

અજસ્રમાર્દ્રા દયયાઽન્તરઙ્ગે
યથા ભવો નિમ્નગયોત્તમાઙ્ગે ।
સન્તાપશાન્તિં ભવસુન્દરી મે

કરોતુ શીતેન વિલોકિતેન ॥ ૧૩.૭॥

પુણ્યા સદાઽપીશ્વર એવ સક્તા
પતિવ્રતાસામ્યમિતા તવેક્ષા ।
કુલાચલાધીશ્વરકન્યકે મે
સંહરમંહોવિતતેર્વિધત્તામ્ ॥ ૧૩.૮॥

શર્વસ્ય રામે નિયમેન હીના
શ્યામા તવેક્ષા ગણિકાઙ્ગનેવ ।
નીચેઽપિ મર્ત્યે નિપતત્યનર્ઘા
બિભર્તિ ના ષોડશ યઃ સુવર્ણાન્ ॥ ૧૩.૯॥

પદ્માયતાક્ષિ ક્ષિતિધારિકન્યે
કટાક્ષનામા તવ કાલસર્પઃ ।
યં સન્દશત્યેષ જગત્સમસ્તં
વિસ્મૃત્ય ચાહો ન દધાતિ મોહમ્ ॥ ૧૩.૧૦॥

ઈશદ્વિષા શૈલમહેન્દ્રકન્યે
કરોતિ મૈત્રીં વિષમાયુધેન ।
પ્રભાષતે પાતકિનશ્ચ પક્ષે
કુતઃ કટાક્ષો ન તવામ્બ મુગ્ધઃ ॥ ૧૩.૧૧॥

કૃપાન્વિતઃ કર્ણસમીપચારી
શ્રીમાન્સદા પુણ્યજનાનુકૂલઃ ।
સામ્યં કુરુણામધિપસ્ય શમ્ભોઃ
પ્રાણપ્રિયે તે ભજતે કટાક્ષઃ ॥ ૧૩.૧૨॥

કર્ણાન્તિકસ્થોઽપિ ન ધર્મવૈરી
કૃષ્ણોઽપિ મતાર્નકુલં ન પાતિ ।
શીતોઽપિ સન્દીપયતિ સ્મરાગ્નિં
હરસ્ય તે શૈલસુતે કટાક્ષઃ ॥ ૧૩.૧૩॥

અયં કટાક્ષસ્તવ તોયવાહઃ
કારુણ્યકાલે પરિજૃમ્ભમાણઃ ।
ગૃહેષુ લીનાન્ સુખિનો વિહાય
નિરાશ્રયાન્ સિઞ્ચતિ વિશ્વમાતઃ ॥ ૧૩.૧૪॥

કસ્યાપિ વાચા વપુષા બલેન
સમસ્ય સર્વૈરપિ યન્નિદેશાઃ ।
અમ્ભોધિવેલાસ્વપિ ન સ્ખલન્તિ
શમ્ભોઃ પ્રિયેઽયં તવ દૃક્પ્રસાદઃ ॥ ૧૩.૧૫॥

દ્વારેષુ તેષાં વિચરન્તિ શૂરાઃ
સૌધેષુ સારઙ્ગદૃશસ્તરુણ્યઃ ।
પ્રગલ્ભવાચઃ કવયઃ સભાસુ
શર્વાણિ તે યેષુ કૃપાકટાક્ષઃ ॥ ૧૩.૧૬॥

યત્રામ્બ તે કોઽપિ કટાક્ષલેશઃ
સ દુર્જયઃ સઙ્ગરસીમ્નિ શૂરઃ ।
પૂર્વં દિવં પૂરયતિ દ્વિષદ્ભિ-
સ્તતો યશોભિર્ભુવમિન્દુગૌરૈઃ ॥ ૧૩.૧૭॥

યં તારકાકાન્તકલાપકાન્તે
ન લોકસે કોઽપિ ન લોકતે તમ્ ।
યં લોકસે તેન વિલોકિતોઽપિ
શ્રિયં સમૃદ્ધાં સમુપૈતિ લોકઃ ॥ ૧૩.૧૮॥

સુધાં હસન્તી મધુ ચાક્ષિપન્તી
યશો હરન્તી વનિતાધરસ્ય ।
પરિષ્કરોત્યસ્ય કવિત્વધારા
મુખં હરપ્રેયસિ લોકસે યમ્ ॥ ૧૩.૧૯॥

સર્વેન્દ્રિયાનન્દકરી પુરન્ધ્રી
વિદ્યાઽનવદ્યા વિપુલા ચ લક્ષ્મીઃ ।
ઇયં ત્રિરત્ની પુરુષસ્ય યસ્ય
દુર્ગે ત્વયા દૃષ્ટમિમં તુ વિદ્મઃ ॥ ૧૩.૨૦॥

મુધા ક્ષિપસ્યદ્રિસુતે કટાક્ષાન્
કૈલાસકાન્તારમહીરુહેષુ ।
ઇતઃ કિરેષત્તવ નાસ્તિ હાનિઃ
સિદ્ધ્યત્યભીષ્ટં ચ સમસ્તમસ્ય ॥ ૧૩.૨૧॥

શીતાચલાધીશકુમારિ શીતઃ
સંરક્ષણે સંશ્રિતમાનવાનામ્ ।

દુર્ધર્ષદુષ્ટાસુરમર્દનેષુ
નિતાન્તમુષ્ણશ્ચ તવાવલોકઃ ॥ ૧૩.૨૨॥

રુષા સમેતં વિદધાતિ નાશં
કરોતિ પોષં કૃપયા સનાથમ્ ।
અમ્બૌષધસ્યેવ તવેક્ષિતસ્ય
યોગસ્ય ભેદેન ગુણસ્ય ભેદઃ ॥ ૧૩.૨૩॥

નાશાય તુલ્યોદ્ધતકામલોભ-
ક્રોધત્રિદોષસ્ય ભવામયસ્ય ।
શિવપ્રિયે વીક્ષિતભેષજં તે
ક્રીણાનિ ભક્ત્યા વદ ભોઃ કિયત્યા ॥ ૧૩.૨૪॥

અભિષ્ટુતાં ચારણસિદ્ધસઙ્ઘૈ-
સ્ત્રિષ્ટુબ્વિશેષા અપિ મર્ત્યસૂનોઃ
કૃપાકટાક્ષૈર્વિનતાન્પુનાનાં
કપર્દિનઃ સમ્મદયન્તુ કાન્તામ્ ॥ ૧૩.૨૫॥ 325

---

ચતુર્દશઃ સ્તબકઃ
કાલી ગૌરી કુણ્ડલિની ચ (ઉપગીતિવૃત્તમ્)

કારણમખિલમતીનાં વારણમન્તર્લસત્તમસઃ ।
મન્દસ્મિતં મહેશ્વરસુદૃશો મે શ્રેયસે ભવતુ ॥ ૧૪.૧॥

વિશ્વતનુસ્તનુગાત્રી વજ્રમયી પુષ્પસુકુમારી ।
સર્વસ્ય શક્તિરબલા કાલી ગૌર્યમ્બિકા જયતિ ॥ ૧૪.૨॥

તામાહુર્જગદંબાં ગૌરીં કેચિત્ પરે કાલીમ્ ।
સા ગૌરી મહિલાતનુરમ્બરતનુરુચ્યતે કાલી ॥ ૧૪.૩॥

પાચકશક્તેઃ કાલ્યાઃ કેવલલિઙ્ગેન ભિદ્યતે કાલઃ ।
યત્પાકતો ગભીરાદ્ભુવને સર્વેઽપિ પરિણામાઃ ॥ ૧૪.૪॥

સર્વભુવનાશ્રયત્વાત્ કાલી નામ્ના દિગન્યેન ।
લોકે તુ વ્યવહરણં વિદુષાં દિક્કાલયોર્ભાક્તમ્ ॥ ૧૪.૫॥

દિગદિતિરગાધખણ્ડા પરિણમયિત્રી સ્મૃતા કાલી ।

દક્ષસ્યૈકા દુહિતા સા દ્વે ગુણભેદમુગ્ધદૃશામ્ ॥ ૧૪.૬॥

દેહે દેહે સેયં કુણ્ડલિની નામ જગદમ્બા ।
સા સ્વપિતિ સંસૃતિમતાં યુઞ્જાનાનાં પ્રબુદ્ધા સ્યાત્ ॥ ૧૪.૭॥

મૂલાધારાદગ્નિર્જ્વલતિ શિરસ્તઃ શશી દ્રવતિ ।
કુણ્ડલિનીમયિ મન્યે વીણાશયનાત્પ્રબુદ્ધેયમ્ ॥ ૧૪.૮॥

યદ્દ્રવતિ તત્ર કિં ત્વં કિં તત્ર ત્વમસિ યજ્જ્વલતિ ।
કિમુ તત્રાસિ મહેશ્વરિ યદુભયમેતદ્વિજાનાતિ ॥ ૧૪.૯॥

એતાવગ્નીષોમૌ જ્વાલભિશ્ચન્દ્રિકાભિરપિ ।
આવૃણુતસ્તનુમનયોર્વ્યક્તિત્વં મે પશુર્ભવતુ ॥ ૧૪.૧૦॥

અગ્નિસ્ત્વં સોમસ્ત્વં ત્વમધો જ્વલસિ દ્રવસ્યૂર્ધ્વમ્ ।
અમૃતમનયોઃ ફલં ત્વં તસ્ય ચ ભોક્ત્રી ચિદમ્બ ત્વમ્ ॥ ૧૪.૧૧॥

કિન્નુ સુકૃતં મયા કૃતમખિલેશ્વરિ કિં તપસ્તપ્તમ્ ।
ક્રીડયસિ માં પ્રતિક્ષણમાનન્દસુધાનિધાવન્તઃ ॥ ૧૪.૧૨॥

ક્ષાન્તં કિં મમ દુરિતં શાન્તં કિં દેવિ તે સ્વાન્તમ્ ।
અનુગૃહ્ણાસિ વિચિત્રં મામપ્યપરાધિનાં પ્રથમમ્ ॥ ૧૪.૧૩॥

કાલે કાલે સન્ધ્યારૂપા નોપાસિતા ભવતી ।
વિચ્છિન્નઃ સ્માર્તાગ્નિસ્ત્રેતા કુત એવ વહ્નીનામ્ ॥ ૧૪.૧૪॥

દાતું નાર્જિતમન્નં બહુ દેવેભ્યશ્ચ ભૂતેભ્યઃ ।
યત્કિઞ્ચિદાર્જિતં વા કલત્રપુત્રાન્વિતોઽશ્નામિ ॥ ૧૪.૧૫॥

કશ્ચિદપિ પાપહારી ન પુરશ્ચરિતશ્ચ તે મન્ત્રઃ ।
કં ગુણમભિલક્ષ્ય મમ પ્રબુદ્ધ્યસેઽન્તર્જગન્માતઃ ॥ ૧૪.૧૬॥

તવ મયિ પૃથક્તનૂજપ્રેમા ચેત્પક્ષપાતોઽયમ્ ।
અથવા સતાં નિસર્ગઃ સોઽયં ત્વયિ ચાંબ સમ્ભાવ્યઃ ॥ ૧૪.૧૭॥

લક્ષ્યં વિનૈવ મન્ત્રઃ કિં સિદ્ધ્યતિ કોટિશોઽપ્યુક્તઃ ।
દગ્ધમસ્તદ્યદિ લક્ષ્યં તવ રૂપં ગલતિ હા મન્ત્રઃ ॥ ૧૪.૧૮॥

સઙ્કલ્પાનાં વાચામનુભૂતીનાં ચ યન્મૂલમ્ ।
યત્ર પ્રાણો બદ્ધસ્તલ્લક્ષ્યં દેવિ તે રૂપમ્ ॥ ૧૪.૧૯॥ ॥ ૩૪૪॥

નૈસર્ગિકસ્વવૃત્તેરહઙ્કૃતેર્મૂલમન્વિષ્ય ।
ત્વાં કિલ સાક્ષાત્કુરુતે રમણમહર્ષેરિયં દૃષ્ટિઃ ॥ ૧૪.૨૦॥

મન્યે પર્વતકન્યે મમ સેયમહઙ્કૃતિર્મહતી ।
અવતરતા વર્ષગણૈરપિ તન્મૂલં ન લબ્ધમહો ॥ ૧૪.૨૧॥

એષ પ્રૌઢો ભગવતિ બહુલં ગર્જત્યહઙ્કારઃ ।
એતસ્મિન્નયિ કાલે ભવતી ચાબોધિ કુણ્ડલિની ॥ ૧૪.૨૨॥

તવ પશ્ચાત્સમ્ભૂતિં જાનાતિ ન સોઽયમદ્યાપિ ।
પ્રાગિવ ગર્જતિ ધીરં બિભેતિ મૃત્યોર્ન નેદિષ્ઠાત્ ॥ ૧૪.૨૩॥

અતિપુષ્ટમહઙ્કારં પશુમેતં તુભ્યમર્પયતે ।
પ્રમથપતિપ્રાણેશ્વરિ ગણપતિરેકાન્તભક્તોઽયમ્ ॥ ૧૪.૨૪॥

ઉપગીતયો ગણપતેરુપતિષ્ઠન્તામિમાઃ પ્રીત્યા ।
ઉત્સવસહસ્રલોલામુકારવાચ્યસ્ય ગૃહનાથામ્ ॥ ૧૪.૨૫॥ 350

---

પઞ્ચદશઃ સ્તબકઃ

શક્તેઃ સ્વાગતમ્ (સ્વાગતાવૃત્તમ્)

આપદામપહરન્તુ તતિં નઃ
સમ્પદામપિ દિશન્તુ સમૃદ્ધિમ્ ।
દન્તકુન્દરુચિદત્તબલાનિ
વ્યોમકેશસુદૃશો હસિતાનિ ॥ ૧૫.૧॥

અલ્પમપ્યધિકશક્તિસમૃદ્ધં
મન્દમપ્યધિકસૂક્ષ્મવિસારમ્ ।
સુસ્મિતં સ્મરવિરોધિરમણ્યાઃ
કલ્પતાં મમ કુલસ્ય શુભાય ॥ ૧૫.૨॥

પુષ્કરાદ્રવિમતો ભુવમેતાં
ભૂમિતશ્શશધરં ક્રમમાણા ।
નૈવ મુઞ્ચતિ પદં બત પૂર્વં
નોત્તરં વ્રજતિ નેશપુરન્ધ્રી ॥ ૧૫.૩॥

ભૂષણેષ્વિવ સવિત્રિ સુવર્ણં

મૃત્તિકામિવ ઘટેષ્વખિલેષુ ।
વિશ્વવસ્તુષુ નિરસ્તવિશેષાં
દેવિ પશ્યતિ સતીં વિબુધસ્ત્વામ્ ॥ ૧૫.૪॥

કિટ્ટભૂતમખિલેશ્વરજાયે
દૃશ્યજાતમખિલં નિજપાકે ।
પ્રાણબુદ્ધિમનસામિહ વર્ગઃ
સારભૂત ઇતિ સૂરિજનોક્તિઃ ॥ ૧૫.૫॥

સારમીશ્વરિ તિલેષ્વિવ તૈલં
વિગ્રહેષુ નિખિલેષુ નિગૂઢમ્ ।
યે ધિયા મથનતો વિદુરેકં
તે ભવન્તિ વિબુધાસ્ત્વયિ લીનાઃ ॥ ૧૫.૬॥

આયસં ત્રિભુવનેશ્વરિ પિણ્ડં
વહ્નિનેવ તપસા તનુપિણ્ડમ્ ।
યસ્ય ચિજ્જ્વલનજાલમયં સ્યાત્
તમમમ્બ સ તવાલયભૂતઃ ॥ ૧૫.૭॥

યોઽરણેર્મથનતોઽતિપવિત્રં
વીતિહોત્રમિવ વીતકલઙ્કઃ ।
પ્રાણમુજ્જ્વલયતિ સ્વશરીરાત્
ત્વામસાવભયદેઽર્હતિ યષ્ટુમ્ ॥ ૧૫.૮॥

પ્રાણતા શ્વસિતમેવ વિચાર્યં
કુર્વતા કરણમેવ નિભાલ્યમ્ ।
ગચ્છતા ગમનમેવ વિશોધ્યં
તત્તનૌ મથનમાગમબોધ્યમ્ ॥ ૧૫.૯॥

યો રસં પિબતિ મૂર્ધસરોજાત્
સોમપોઽયમનઘઃ પ્રયતાત્મા ।
અગ્નિહોત્રમખિલેશ્વરિ નિત્યં
મૂલકુણ્ડદહનસ્થિતિરસ્ય ॥ ૧૫.૧૦॥

ચિન્મયી પિબસિ સોમમિમં કિં
સોમ એવ કિમસાવસિ માતઃ ।
પીયસે પિબસિ ચ સ્વયમેકા

પેયપાતૃયુગલં કિમુ ભૂત્વા ॥ ૧૫.૧૧॥

તૈજસં કનકમગ્નિવિતપ્તં
તેજ એવ કનકાઙ્ગિ યથા સ્યાત્ ।
મોદરૂપકલયા તવ તપ્તં
તન્મયં ભવતિ મોદજપિણ્ડમ્ ॥ ૧૫.૧૨॥

કાઽપિ મોદલહરી તવ વીચિર્-
નિર્ગતા દશશતારસુધાબ્ધેઃ ।
પૂરયત્યખિલમમ્બ શરીરં
નેહ વેદ્મિ પરમે જડભાગમ્ ॥ ૧૫.૧૩॥

સેયમુત્તમતમા નિપતન્તી
શીતલાદ્દશશતારપયોદાત્ ।
પ્રેરિતાદખિલરાજ્ઞિ ભવત્યા
બુદ્ધિસસ્યમવતાદ્રસવૃષ્ટિઃ ॥ ૧૫.૧૪॥

દુગ્ધસિન્ધુમથનાદમૃતં વા
શબ્દસિન્ધુમથનાત્પ્રણવો વા ।
લભ્યતે સુકૃતિભિસ્તવ વીચિર્-
મૂર્ધકઞ્જમથનાદ્રસ એષઃ ॥ ૧૫.૧૫॥

અસ્થિષુ પ્રવહતિ પ્રતિવેગં
મજ્જસારમમૃતં વિદધાના ।
બિભ્રતી મદમનુષ્ણમદોષં
મૂર્ધકઞ્જનિલયે તવ ધારા ॥ ૧૫.૧૬॥

તૈત્તિરીયકથિતો રસલાભઃ
સોઽયમેવ સકલાગમવર્ણ્યે
એતદેવ શશિમણ્ડલનાથે
તન્ત્રભાષિતપરામૃતપાનમ્ ॥ ૧૫.૧૭॥

મૂર્ધસોમમજરામરરૂપે
યુક્તવીક્ષણકરેણ નિપીડ્ય ।
શમ્ભુસુન્દરિ સુનોમિ ધિનોમિ
ત્વાં પ્રદીપ્તકુલકુણ્ડનિશાન્તામ્ ॥ ૧૫.૧૮॥

દૃષ્ટિરેવ રવિદીધિતિરુગ્રા
શીર્ષકઞ્જશશિનં પ્રવિશન્તી ।
શીતલામૃતમયી ખલુ ભૂત્વા
યોગિનો દ્રવતિ મોદકલા તે ॥ ૧૫.૧૯ ॥

મૂર્ધનિ દ્રવસિ યોગયુતાનાં
ચક્ષુષિ જ્વલસિ શઙ્કરભામે
તિષ્ઠસિ સ્થિરપદા કુલકુણ્ડે
બાહ્યતઃ સ્ખલસિ નૈવ કદાઽપિ ॥ ૧૫.૨૦ ॥

સા યદિ દ્રવતિ મોદકલા સ્યાત્
સા યદિ જ્વલતિ ચિત્કલિકા સ્યાત્ ।
સા પરા સ્થિરપદા યદિ તિષ્ઠ-
ત્યક્ષરા ભવતિ કાચન સત્તા ॥ ૧૫.૨૧ ॥

પશ્યતા નયનમણ્ડલવૃત્તિં
ગૃહ્યસે ત્વમચલાધિપકન્યે ।
જાનતા દશશતારવિલાસં
સ્પૃશ્યસે વિદિતમમ્બ રહસ્યમ્ ॥ ૧૫.૨૨ ॥

વ્યાપ્તશક્ત્યસુબલેન લસન્તી
ભાનુબિમ્બનયનેન તપન્તી ।
ચન્દ્રબિમ્બમનસા વિહરન્તી
સા પુનર્જયતિ મૂર્ધ્નિ વસન્તી ॥ ૧૫.૨૩ ॥

સ્વાગતં સકલલોકનુતાયૈ
સ્વાગતં ભુવનરાજમહિષ્યૈ ।
સ્વાગતં મયિ ભૃશં સદયાયૈ
સ્વાગતં દશશતારમિતાયૈ ॥ ૧૫.૨૪ ॥

સત્કવિક્ષિતિભુજો લલિતાભિઃ
સ્વાગતાભિરનઘાભિરિમાભિઃ ।
સ્વાગતં ભણિતમસ્તુ ભવાન્યૈ
ખેલનાય શિર એતદિતાયૈ ॥ ૧૫.૨૫ ॥ 375

ષોડશઃ સ્તબકઃ

અધ્યાત્મં શક્તિવૈભવમ્ (કુમારલલિતાવૃત્તમ્)

મહોવિહતમોહં મહેશમહિલાયાઃ ।
સ્મિતં વિતનુતાન્મે ગૃહેષુ મહમગ્ર્યમ્ ॥ ૧૬.૧॥

ઇયદ્બહુલગોલં જગલ્લઘુ દધાના ।
પિતામહમુખૈરપ્યખણ્ડિતવિધાના ॥ ૧૬.૨॥

અદુષ્ટચરિતેભ્યઃ શુભાન્યભિદધાના ।
કુલાનિ મલિનાનાં હતાનિ વિદધાના ॥ ૧૬.૩॥

દુકૂલમરુણાંશુપ્રભં પરિદધાના
હરસ્ય રજતાદ્રિક્ષિતીશિતુરધીના ॥ ૧૬.૪॥

મુનીન્દ્રકૃતતન્ત્રપ્રસિદ્ધબહુદાના
ઉમા બલમલં નસ્તનોત્વતુલમાના ॥ ૧૬.૫॥

નિરસ્તવિષયાં યદ્ દધાતિ મતિકીલામ્ ।
સમસ્તજગદીશે ધૃતિસ્તવ મતેયમ્ ॥ ૧૬.૬॥

શ્રુતા પ્રવણચિત્તં સ્મૃતા નરમપાપમ્ ।
ધૃતા હૃદિ વિધત્સે ગતસ્વપરભાવમ્ ॥ ૧૬.૭॥

અહંમતિતટિન્યાઃ સતામવનિમૂલમ્ ।
ત્વમેવ કિલ સેયં મહર્ષિરમણોક્તિઃ ॥ ૧૬.૮॥

અહંમતિલતાયાસ્ત્વયીશવધુ કન્દે ।
સ્થિતોઽમ્બ ભુવનસ્ય પ્રવિન્દતિ રહસ્યમ્ ॥ ૧૬.૯॥

યદેતદખિલામ્બ પ્રસિદ્ધમિવ દૃશ્યમ્ ।
તવૈવ કિલ જાલં ગતો ભણતિ મૂલમ્ ॥ ૧૬.૧૦॥

પ્રપશ્યસિ પરાચી જગદ્વિવિધભેદમ્ ।
સ્વતઃ કિમપિ નાન્યત્પ્રતીચિ પુરતસ્તે ॥ ૧૬.૧૧॥

સ્તુતા ભવસિ શશ્વત્ સ્મૃતા ચ ભજને ત્વમ્ ।
ધૃતા ભવસિ યોગે તતા ભવસિ બોધે ॥ ૧૬.૧૨॥

સ્તુતા દિશસિ કામં સ્મૃતા હરસિ પાપમ્ ।
ધૃતાઽસ્યધિકશક્ત્યૈ તતા ભવસિ મુક્ત્યૈ ॥ ૧૬.૧૩॥

વિશુધ્યતિ યતાશી પ્રમાદ્યતિ ન શુદ્ધઃ ।
પ્રમાદરહિતસ્ય સ્ફુટે લસસિ કઞ્જે ॥ ૧૬.૧૪॥

સ્ફુટં યદિ સરોજં નટીવ પટુ નાટ્યમ્ ।
કરોષિ યતબુદ્ધેર્જગજ્જનનિ શીર્ષે ॥ ૧૬.૧૫॥

શિરોગતમિદં નઃ પ્રફુલ્લમયિ પદ્મમ્ ।
અનલ્પમકરન્દં ત્વમમ્બ ભવ ભૃઙ્ગી ॥ ૧૬.૧૬॥

સરોજમતુદન્તી પિબામ્બ મકરન્દમ્ ।
મહામધુકરિ ત્વં ભજેર્મદમમન્દમ્ ॥ ૧૬.૧૭॥

અમઙ્ગલમિતઃ પ્રાઙ્ મયેશવધુ ભુક્તમ્ ।
ઇતઃ પરમમેયે સુખાન્યનુભવ ત્વમ્ ॥ ૧૬.૧૮॥

અહઙ્કૃતિવશાન્મે ચિદીશ્વરિ પુરાઽભૂત્ ।
તવાભવદિદાનીં મમાસ્તિ ન વિભુત્વમ્ ॥ ૧૬.૧૯॥

યદાઽભવદિયં મે તદાઽન્વભવદાર્તિમ્ ।
તવેશ્વરિ ભવન્તી ભુનક્તુ શમિદાનીમ્ ॥ ૧૬.૨૦॥

કરોત્વિયમહન્તા વિવાદમધુનાઽપિ ।
તથાઽપિ પુરતસ્તે મહેશ્વરિ વિવીર્યા ॥ ૧૬.૨૧॥

ઇયં ચ તવ બુદ્ધેર્યતો ભવતિ વૃત્તિઃ
ઇમામપિ કુરુ સ્વાં ક્ષમાવતિ વિશેષા ॥ ૧૬.૨૨॥

સુધાબ્ધિરિહ માતસ્તરઙ્ગશતમાલી ।
ચિદભ્રપુરમત્ર પ્રભાપદમદભ્રમ્ ॥ ૧૬.૨૩॥

કુરુ ત્વમિદમેકં નિજાલયશતેષુ ।
સવિત્રિ વિહરાસ્મિન્ યથેષ્ટમયિ દેહે ॥ ૧૬.૨૪॥

કુમારલલિતાનાં કૃતિર્ગણપતીયા ।
કરોતુ મુદમેષા કપર્દિદયિતાયાઃ ॥ ૧૬.૨૫॥ 400

॥ સમાપ્તં ચ ચતુર્થં શતકમ્ ॥

પઞ્ચમં શતકમ્

સપ્તદશઃ સ્તબકઃ

મદકરીશક્તિઃ (ચમ્પકમાલાવૃત્તમ્)

પાપવિધૂતૌ નિર્મલગઙ્ગા તાપનિરાસે ચન્દ્રમરીચિઃ ।
ભર્ગપુરન્ધ્રીહાસકલા મે ભદ્રમમિશ્રં કાઽપિ કરોતુ ॥ ૧૭.૧॥

શિષ્ટકુલાનાં સમ્મદયિત્રી દુષ્ટજનાનાં સંશમયિત્રી ।
કષ્ટમપારં પાદજુષો મે વિષ્ટપરાજ્ઞી સા વિધુનોતુ ॥ ૧૭.૨॥

નૂતનભાસ્વદ્બિમ્બનિભાઙ્ઘ્રિં શીતલરશ્મિદ્વેષિમુખાબ્જામ્ ।
ખ્યાતવિભૂતિં પુષ્પશરારેઃ પૂતચરિત્રાં યોષિતમીડે ॥ ૧૭.૩॥

ઉજ્જ્વલતારે વ્યોમ્નિ લસન્તી સારસબન્ધૌ ભાતિ તપન્તી ।
શીતલભાસા ચિન્તનકર્ત્રી પાતુ કુલં મે વિષ્ટપભર્ત્રી ॥ ૧૭.૪॥

પ્રાણમનોવાગ્વ્યસ્તવિભૂતિર્લોકવિધાતુઃ કાચન ભૂતિઃ ।
પુષ્કરપૃથ્વીપાવકરૂપા શુષ્કમઘં નઃ સા વિદધાતુ ॥ ૧૭.૫॥

ઇષ્ટફલાનામમ્બ સમૃદ્ધ્યૈ કષ્ટફલાનાં તત્ક્ષણધૂત્યૈ ।
ચેષ્ટિતલેશોદ્દીપિતશક્તિં વિષ્ટપભર્ત્રિ ત્વામહમીડે ॥ ૧૭.૬॥

ભૂમિરુહાગ્રસ્થાપિતભણ્ડાદ્યો મધુ પાયં પાયમજસ્રમ્ ।
વિસ્મૃતવિશ્વો નન્દતિ માતસ્તત્ર કિલ ત્વં ધામ દધાસિ ॥ ૧૭.૭॥

કોઽપિ સહસ્રૈરેષ મુખાનાં શેષ ઇતીડ્યઃ પન્નગરાજઃ ।
ઉદ્ગિરતીદં યદ્વદનેભ્યો દેવિ તનૌ મે તદ્વત પાસિ ॥ ૧૭.૮॥

સાકમમેયે દેવિ ભવત્યા પ્રાતુમહન્તા યાવદુદાસ્યા ।
તાવદિયં તાં મૂર્છયતીશે પન્નગરાજોદ્ગારજધારા ॥ ૧૭.૯॥

શામ્યતિચિન્તાજીવિતમસ્યામિન્દ્રિયસત્તાઽપ્યસ્તમુપૈતિ ।
યાતિ નિરુદ્ધા હા ગલદેશે સંશયમેષા માતરહન્તા ॥ ૧૭.૧૦॥

ગૌરિ મહેશપ્રાણસખી માં પાહિ વિપન્નાં માતરહન્તામ્ ।
સા યદિ જીવેદીશ્વરિ તુભ્યં દાસજનસ્તામર્પયતેઽયમ્ ॥ ૧૭.૧૧॥

ત્વત્સ્મૃતિવીર્યાચ્છાન્તિસમૃદ્ધાં માતરહન્તાં શુદ્ધતમાં મે ।
આત્મભુજિષ્યાં કર્તુમિદાનીં શાંતધિયસ્તે કોઽસ્તિ વિકલ્પઃ ॥ ૧૭.૧૨॥

મન્દરધારી નામૃતહેતુર્વાસુકિરજ્જુર્નામૃતહેતુઃ ।

મન્થનહેતુસ્સાઽમૃતહેતુઃ સર્વબલાત્મા શર્વપુરન્ધ્રી ॥ ૧૭.૧૩॥

પ્રાણિશરીરં મન્દરશૈલો મૂલસરોજં કચ્છપરાજઃ ।
પૂર્ણમનન્તં ક્ષીરસમુદ્રઃ પૃષ્ઠગવીણા વાસુકિરજ્જુઃ ॥ ૧૭.૧૪॥

દક્ષિણનાડી નિર્જરસેના વામગનાડી દાનવસેના ।
શક્તિવિલાસો મન્થનકૃત્યં શીર્ષજધારા કાઽપિ સુધોક્તા ॥ ૧૭.૧૫॥

કણ્ઠનિરુદ્ધે ભૂરિવિષાગ્નૌ તૈજસલિઙ્ગાવાસિહરેણ ।
ત્વદ્ગલજાતં સ્વાદ્વમૃત્તં કો દેવિ નિપીય પ્રેત ઇહ સ્યાત્ ॥ ૧૭.૧૬॥

યેન વિભુસ્તે માદ્યતિ શર્વો યત્ર શિવે ત્વં ક્રીડસિ હૃષ્ટા ।
સમ્મદમૂલં તં મદમાદ્યે વર્ધય પુત્રેઽનુગ્રહપાત્રે ॥ ૧૭.૧૭॥

યો મદમીદૃઙ્માર્ગમુપેક્ષ્ય સ્વર્વિભુપૂજ્યે ગર્વસમેતઃ ।
આહરતિ શ્રીબાહ્યસમૃદ્ધ્યા ના સુરયા વા સોઽસુર ઉક્તઃ ॥ ૧૭.૧૮॥

તામ્યતિ તીવ્રાફેનનિષેવી ક્લામ્યતિ સંવિત્પત્રનિષેવી ।
ભ્રામ્યતિ હાલાભાણ્ડનિષેવી શામ્યતિ શીર્ષદ્રાવનિષેવી ॥ ૧૭.૧૯॥

અસ્તુ વિરેકે પથ્યમફેનં પત્રમજીર્ણેષ્વસ્તુ નિષેવ્યમ્ ।
અસ્તુ હિતં તદ્યક્ષ્મણિ મદ્યં સંસૃતિહારી દેવિ રસસ્તે ॥ ૧૭.૨૦॥

નૈવ મહાન્તસ્સત્ત્વસમૃદ્ધાઃ સર્વમદેષ્વપ્યમ્બ ચલન્તુ ।
અલ્પજનાનાં માદકવસ્તુપ્રાશનમીશે નાશનમુક્તમ્ ॥ ૧૭.૪૨૧॥

કેઽપિ યજન્તે યન્મધુમાંસૈસ્ત્વાં ત્રિપુરારેર્જીવિતનાથે ।
અત્ર ન યાગો દૂષણભાગી દ્રવ્યસસઙ્ગો દુષ્યતિ યષ્ટા ॥ ૧૭.૨૨॥

દક્ષિણમાર્ગે સિદ્ધ્યતિ ભક્તઃ સવ્યસરણ્યાં સિદ્ધ્યતિ વીરઃ ।
નેશ્વરિ સવ્યે નાપ્યપસવ્યે સિદ્ધ્યતિ દિવ્યે ત્વધ્વનિ મૌની ॥ ૧૭.૨૩॥

નાર્ચનભારો નાપિ જપોઽસ્યાં દિવ્યસરણ્યાં ભવ્યતમાયામ્ ।
કેવલમમ્બાપાદસરોજં નિશ્ચલમત્યા મૃગ્યમજસ્રમ્ ॥ ૧૭.૨૪॥

કાચિદમૂલ્યા ચંપકમાલા વૃત્તનિબદ્ધા મઞ્જુલમાલા ।
અસ્તુ ગણેશસ્યેશ્વરકાન્તા કણ્ઠવિલોલા ચંપકમાલા ॥ ૧૭.૨૫॥ 425

અષ્ટાદશઃ સ્તબકઃ

રૂપવિશેષાઃ કુણ્ડલિનીસમુલ્લાસશ્ચ (પ્રહર્ષિણીવૃત્તમ્)

ધુન્વન્ત્યસ્તિમિરતતિં હરિત્તટીનાં
ધિન્વન્ત્યઃ પુરમથનસ્ય લોચનાનિ ।
સ્કન્દામ્બાહસિતરુચો હરન્તુ મોહં
સાન્દ્રં મે હૃદયગતં પ્રસહ્ય સદ્યઃ ॥ ૧૮.૧ ॥

તન્વાના વિનતહિતં વિરોધિવર્ગં
ધુન્વાના બુધજનમોદમાદધાના ।
સમ્રાજ્ઞી ત્રિદિવધરારસાતલાનાં
રુદ્રાણી ભણતુ શિવાની મત્કુલસ્ય ॥ ૧૮.૨ ॥

યોઽમ્બ ત્વાં હૃદિ વિદધત્તટિત્પ્રકાશાં
પીયૂષદ્યુતિમદહૃન્મુખારવિન્દામ્ ।
અન્યત્તુ સ્મૃતિપથતો ધુનોતિ સર્વં
કામારેઃ સુદતિ નતસ્ય ભુવ્યસાધ્યમ્ ॥ ૧૮.૩ ॥

કાલાભ્રદ્યુતિમસમાનવીર્યસારાં
શક્ત્યૂર્મિભ્રમકરશુક્લઘોરદંષ્ટ્રામ્ ।
યો ધીરો મનસિ દધાતિ ભર્ગપત્નિ
ત્વામસ્ય પ્રભવતિ સઙ્ગરેષુ શસ્ત્રમ્ ॥ ૧૮.૪ ॥

યઃ પ્રાજ્ઞસ્તરુણદિવાકરોજ્જ્વલાઙ્ગીં
તન્વઙ્ગિ ત્રિપુરજિતો વિચિન્તયેત્ત્વામ્ ।
તસ્યાજ્ઞાં દધતિ શિરસ્સુ ફુલ્લજાજી-
માલાં વા ધરણિજુષો વશે ભવન્તઃ ॥ ૧૮.૫ ॥

યો રાકાશશધરકાન્તિસારશુભ્રાં
બિભ્રાણાં કરકમલેન પુસ્તકં ત્વામ્ ।
ભૂતેશં પ્રભુમસ્કૃત્પ્રબોધયન્તીં
ધ્યાયેદ્વાગ્ભવતિ વશેઽસ્ય નાકદૂતી ॥ ૧૮.૬ ॥

જાનીમો ભગવતિ ભક્તચિત્તવૃત્તે-
સ્તુલ્યં ત્વં સપદિ દધાસિ રૂપમગ્ર્યમ્ ।
પ્રશ્નોઽયં ભવતિ નગાધિનાથકન્યે
રૂપં તે મદયતિ કીદૃશં સ્મરારિમ્ ॥ ૧૮.૭ ॥

ચારુ સ્યાદલમિતિ વક્તુમમ્બ શક્યં
રૂપં તે ન વદતિ કોઽપિ કીદૃશં વા ।
સમ્મોહં પરમુપયાન્તિ કાન્તિભાણ્ડે
કામારેરપિ નયનાનિ યત્ર દૃષ્ટે ॥ ૧૮.૮॥

સઙ્કલ્પૈઃ કિમુ તવ ભૂષણાન્યભૂવઁ-
શ્છિલ્પીન્દ્રાઃ કિમુ વિદધુર્યથાઽત્ર લોકે ।
તત્સ્વર્ણં ભગવતિ કીદૃશં મણીનાં
કિં રૂપં ભવતિ ચ તત્ર યોજિતાનામ્ ॥ ૧૮.૯॥

યાન્યઙ્ગાન્યખિલમનોજ્ઞસારભૂતા-
ન્યેતેષામપિ કિમુ ભૂષણૈરુમે તે ।
આહોસ્વિલ્લલિતતમાનિ ભાન્તિ ભૂયો
ભૂષાભિર્વિકૃતતમાભિરપ્યમૂનિ ॥ ૧૮.૧૦॥

મુક્તાભિર્ભવતિ તવામ્બ કિન્નુ હારઃ
પીયૂષદ્યુતિકરસારનિર્મલાભિઃ ।
મુણ્ડૈર્વા ઘલઘલશબ્દમાદધદ્ભિઃ
સઙ્ઘર્ષાત્ ત્રિભુવનસાર્વભૌમભામે ॥ ૧૮.૧૧॥

વસ્ત્રં સ્યાદ્યદિ તવ સર્વશાસ્ત્રગમ્યે
કાર્પાસં દિવિ ચ તદુદ્ભવોઽનુમેયઃ ।
ક્ષૌમં ચેદ્ભગવતિ તસ્ય હેતુભૂતાઃ
કીટાઃ સ્યુર્ગગનજગત્યપીતિ વાચ્યમ્ ॥ ૧૮.૧૨॥

રુદ્રસ્ય પ્રિયદયિતેઽથવા સુરદ્રુર્-
ભૂષાણાં મણિકનકપ્રકલ્પિતાનામ્ ।
વસ્ત્રાણામપિ મનસે પરં હિતાનાં
કામં તે ભવતિ સમર્પકઃ સમર્થઃ ॥ ૧૮.૧૩॥

સુસ્કન્ધો બહુવિટપઃ પ્રવાલશોભી
સમ્ફુલ્લપ્રસવસુગન્ધવાસિતાશઃ ।
વૃક્ષઃ કિં ભગવતિ કલ્પનામકોઽયં
સઙ્કલ્પઃ કિમુ તવ કોઽપિ દેવિ સત્યઃ ॥ ૧૮.૧૪॥

સઙ્કલ્પાન્ન ભવતિ કલ્પપાદપોઽન્યઃ
સ્વર્દોગ્ધ્રી પુનરિતરા ન કુણ્ડલિન્યાઃ ।

યઃ કુર્યાદ્ દ્વયમિદમુદ્ધતાત્મવીર્યં
કારુણ્યાત્તવ ભુવિ ચાસ્ય નાકભાગ્યમ્ ॥ ૧૮.૧૫॥

આપીનં ભવતિ સહસ્રપત્રકઞ્જં
વત્સોઽસ્યાઃ પટુતરમૂલકુણ્ડવહ્નિઃ ।
દોગ્ધાઽઽત્મા દહરસરોરુહોપવિષ્ટો
મૌનં સ્યાત્સુરસુરભેસ્તનૂષુ દોહઃ ॥ ૧૮.૧૬॥

દોગ્ધ્યાસ્તે ભગવતિ દોહનેન લબ્ધં
વત્સાગ્નિપ્રથમનિપાનસદ્દ્રવાયાઃ ।
દુગ્ધં સ્વાદ્વમૃતમયં પિબન્નમાત્મા
સન્તૃપ્તો ન ભવતિ દુર્ભરોઽસ્ય કુક્ષિઃ ॥ ૧૮.૧૭॥

વત્સોઽગ્નિઃ પિબતિ દૃઢાઙ્ઘ્રિરમ્બ પશ્ચા-
દશ્રાન્તં પિબતિ દુહન્ પુરોઽન્તરાત્મા ।
વૃદ્ધિં ચ વ્રજતિ પયઃ પ્રતિપ્રદ્રોહં
દોગ્ધ્યાસ્તે દ્રવ ઇહ કુણ્ડલિન્યપારઃ ॥ ૧૮.૧૮॥

સોમસ્ય દ્રવમિમમાહુરમ્બ કેચિદ્
દુગ્ધાબ્ધેરમૃતરસં ગદન્તિ કેઽપિ ।
બાષ્પં કેઽપ્યભિદધતે તુ કૌલકુણ્ડં
પીનોધસ્સ્રવમિતરે ભણન્તિ ધેનોઃ ॥ ૧૮.૧૯॥

મૂલે ત્વં જ્વલદલનપ્રકાશરૂપા
વીણાયાં પ્રબલમહામદોષ્મરૂપા ।
શીર્ષાબ્જે સતતગલદ્રસસ્વરૂપા
ભ્રૂમધ્યે ભવસિ લસત્તટિત્સ્વરૂપા ॥ ૧૮.૨૦॥

હાર્દે ચેદવતરસીહ પુણ્ડરીકે
છાયાવત્સકલમપિ પ્રપશ્યસિ ત્વમ્ ।
આરૂઢા દશશતપત્રમદ્રિપુત્રિ
સ્યાશ્ચેત્ત્વં ભણસિ જગત્સુધાસમુદ્રમ્ ॥ ૧૮.૨૧॥

નેત્રાભ્યાં સરસિરુહચ્છદાયતાભ્યાં
વક્ત્રેણ પ્રવિમલહાસભાસુરેણ ।
પ્રત્યક્ષા મમ મનસઃ પુરઃ પુરન્ધ્રી
કામારેઃ પરિણિતમસ્મદીયભાગ્યમ્ ॥ ૧૮.૨૨॥

પુણ્યાનાં પરિણતિરેવ ભૂતભર્તુઃ
સિદ્ધાનાં બલનિધિરેવ કોઽપિ ગૂઢઃ ।
ભક્તાનાં દૃઢતરિરેવ શોકસિન્ધૌ
મગ્નાનાં મમ જનની મહીધ્રપુત્રી ॥ ૧૮.૨૩ ॥

ઉદ્ધર્તું વિનતજનં વિષાદગર્તાત્
સંસ્કર્તું ભુવનહિતાય યોગયુક્તમ્ ।
સંહર્તું ખલકુલમુદ્ધતં ચ દર્પાદ્
ભર્ગસ્ય પ્રિયતરુણી સદા સદીક્ષા ॥ ૧૮.૨૪ ॥

મૃદ્વીકાં મધુરતયા સુધાં મહિમ્ના
ગામ્ભીર્યાત્સુરતટિનીં ચ નિર્જયન્તી ।
શર્વાણીચરિતપરા પ્રહર્ષિણીનાં
શ્રેણીયં જયતુ ગણેશ્વરેણ બદ્ધા ॥ ૧૮.૨૫ ॥ 450

---

એકોનવિંશઃ સ્તબકઃ
ધ્યેયલલિતારૂપમ્ (પ્રમાણિકાવૃત્તમ્)

પ્રફુલ્લકલ્પપાદપપ્રસૂનસદ્યશોહરમ્ ।
મહારુજં ધુનોતુ તે મહેશસુન્દરીસ્મિતમ્ ॥ ૧૯.૧ ॥

મુનીન્દ્રમૂલવેદિભૂધનઞ્જયપ્રબોધનમ્ ।
યતીન્દ્રહાર્દપેટિકા કવાટબન્ધભેદનમ્ ॥ ૧૯.૨ ॥

યથાવિધિક્રિયાપરદ્વિજાતિચિત્તશોધનમ્ ।
મમામ્બિકાસ્મિતં ભવત્વઘપ્રતાપરોધનમ્ ॥ ૧૯.૩ ॥

સુવર્ણસાલભઞ્જિકા ચરેવ શોભયાઽધિકા ।
અતીવ માર્દવાન્વિતા નવેવ પુષ્પિતા લતા ॥ ૧૯.૪ ॥

સુપર્વમૌલિરત્નભા વિરાજિહેમપાદુકા ।
મરાલિકાનિમન્ત્રકપ્રશસ્તરત્નનૂપુરા ॥ ૧૯.૫ ॥

વલક્ષદીધિતિપ્રભાવિશેષહૃન્નખાવલી ।
મુનીન્દ્રશુદ્ધમાનસપ્રમેયપાદસૌષ્ઠવા ॥ ૧૯.૬ ॥

ઘનીભવત્તટિત્પ્રભાપ્રવાહકલ્પજઙ્ઘિકા ।
મતઙ્ગજેન્દ્રનાસિકા મનોજ્ઞસક્થિશોભિની ॥ ૧૯.૭॥

પ્રસૂનસાયકાગમપ્રવાદચુઞ્ચુકાઞ્ચિકા ।
વિશાલકેશચુમ્બિતોલ્લસન્નિતમ્બમણ્ડલા ॥ ૧૯.૮॥

અજાણ્ડપિણ્ડસંહતિપ્રપૂર્ણકુક્ષિશાલિની ।
અપારદિવ્યકાન્તિવાર્નિધાનનાભિદીર્ઘિકા ॥ ૧૯.૯॥

બિસપ્રસૂનસાયકચ્છુરાભરોમરાજિકા ।
જગત્ત્રયીવસજ્જનોપજીવ્યદુગ્ધભૃત્કુચા ॥ ૧૯.૧૦॥

મહેશકણ્ઠબન્ધકપ્રશસ્તબાહુવલ્લરી ।
સમસ્તવિષ્ટપાભયપ્રદાયિપાણિપઙ્કજા ॥ ૧૯.૧૧॥

વિલોલહારમૌક્તિકપ્રતાનસંવદત્સ્મિતા ।
વિશુદ્ધસુન્દરસ્મિતપ્રકાશભાસિતામ્બરા ॥ ૧૯.૧૨॥

સુકોમલોષ્ઠકમ્પનપ્રભીતદુર્જયાસુરા ।
સુયુક્તકુન્દકુટ્મલપ્રકાશદન્તપઙ્ક્તિકા ॥ ૧૯.૧૩॥

શરત્સુધાંશુમણ્ડલપ્રભાવિગર્હણાનના ।
સુધામરન્દવજ્જપાસુમોપમાધરાધરા ॥ ૧૯.૧૪॥

તિલપ્રસૂનચારુતાઽપહાસિભાસિનાસિકા ।
નવીનભાભનાસિકાવિલમ્બિદિવ્યમૌક્તિકા ॥ ૧૯.૧૫॥

વિશુદ્ધગણ્ડબિમ્બિતસ્વરૂપરત્નકુણ્ડલા ।
મહામહસ્તરઙ્ગિતપ્રભાવશાલિલોચના ॥ ૧૯.૧૬॥

દલાન્તરસ્થયામિનીપ્રભુપ્રભાલિકસ્થલી ।
મયૂરબર્હગર્હણપ્રકૃષ્ટકેશભાસિની ॥ ૧૯.૧૭॥

દિવાકરાયુતોજ્જ્વલા હિમાંશુલક્ષશીતલા ।
તટિત્સહસ્રભાસુરા નિરઙ્કચન્દ્રશેખરા ॥ ૧૯.૧૮॥

નભોન્તરાલચારિણી મહાવિચિત્રકારિણી ।
કુલાગ્નિકુણ્ડશાયિની જગત્કથાવિધાયિની ॥ ૧૯.૧૯॥

નભસ્તલે બલેશ્વરી ધરાતલે ક્રિયેશ્વરી ।
દિવાકરે વિભેશ્વરી સુધાકરે રસેશ્વરી ॥ ૧૯.૨૦॥

મહેશવેશ્મદીપિકા જગત્ત્રયપ્રમાપિકા ।
અશેષશીર્ષશાસિની સમસ્તહૃન્નિવાસિની ॥ ૧૯.૨૧॥

ગુણસ્તવે ગુણસ્તવે ગુણપ્રકર્ષદાયિની ।
વિચિન્તને વિચિન્તને વિશિષ્ટશક્તિધાયિની ॥ ૧૯.૨૨॥

ભ્રમાકુલેન દુસ્તરા ભવાલસેન દુર્ગમા ।
અમન્ત્રકેણ દુર્ભરા જગત્ત્રયેણ દુર્જયા ॥ ૧૯.૨૩॥

સુવર્ણચેલધારિણી સમસ્તમોદકારિણી ।
વિલાસિની નિરામયા વિચિન્ત્યતાં મનસ્ત્વયા ॥ ૧૯.૨૪॥

પદાબ્જવન્દિનઃ કવેરિયં પ્રમાણિકાવલી ।
મહેશમાનસેશ્વરી ગૃહે મહાય કલ્પતામ્ ॥ ૧૯.૨૫॥ 475

---

વિંશઃ સ્તબકઃ

સર્વસારમયી (મણિબન્ધવૃત્તમ્)

પ્રીતિવિકાસે સ્વલ્પતમો રોષવિશેષે ભૂરિતરઃ ।
અદ્ભુતહાસો વિશ્વસુવો રક્ષતુ સાધું હન્તુ ખલમ્ ॥ ૨૦.૧॥

સજ્જનચિત્તાનન્દકરી સંશ્રિતપાપવ્રાતહરી ।
લોકસવિત્રી નાકચરી સ્તાન્મમ ભૂયો ભદ્રકરી ॥ ૨૦.૨॥

અર્ચનકાલે રૂપગતા સંસ્તુતિકાલે શબ્દગતા ।
ચિન્તનકાલે પ્રાણગતા તત્ત્વવિચારે સર્વગતા ॥ ૨૦.૩॥

ઉજ્જ્વલરૂપે નૃત્યકરી નિષ્પ્રભરૂપે સુપ્તિકરી ।
ગોપિતરુપે સિદ્ધિકરી ગોચરરૂપે બન્ધકરી ॥ ૨૦.૪॥

અમ્બરદેશે શબ્દવતી પાવકતાતે સ્પર્શવતી ।
કાઞ્ચનવીર્યે રૂપવતી સાગરકાઞ્ચ્યાં ગન્ધવતી ॥ ૨૦.૫॥

અપ્સ્વમલાસુ સ્પષ્ટરસા ચન્દ્રવિભાયાં ગુપ્તરસા ।
સંસૃતિભોગે સર્વરસા પૂર્ણસમાધાવેકરસા ॥ ૨૦.૬॥

ચક્ષુષિ દૃષ્ટિશ્શાતતમા ચેતસિ દૃષ્ટિશ્ચિત્રતમા ।
આત્મનિ દૃષ્ટિશ્શુદ્ધતમા બ્રહ્મણિ દૃષ્ટિઃ પૂર્ણતમા ॥ ૨૦.૭॥

શીર્ષસરોજે સોમકલા ભાલસરોજે શક્રકલા ।
હાર્દસરોજે સૂર્યકલા મૂલસરોજે વહ્નિકલા ॥ ૨૦.૮॥

સ્થૂલશરીરે કાન્તિમતી પ્રાણશરીરે શક્તિમતી ।
સ્વાન્તશરીરે ભોગવતી બુદ્ધિશરીરે યોગવતી ॥ ૨૦.૯॥

સારસબન્ધોરુજ્જ્વલભા કૈરવબન્ધોઃ સુન્દરભા ।
વૈદ્યુતવહ્નેરદ્ભુતભા ભૌમકૃશાનોર્દીપકભા ॥ ૨૦.૧૦॥

યોધવરાણામાયુધભા યોગિવરાણામીક્ષણભા ।
ભૂમિપતીનામાસનભા પ્રેમવતીનામાનનભા ॥ ૨૦.૧૧॥

શસ્ત્રધરાણાં ભીકરતા શાસ્ત્રધરાણાં બોધકતા ।
યન્ત્રધરાણાં ચાલકતા મન્ત્રધરાણાં સાધકતા ॥ ૨૦.૧૨॥

ગાનપટૂનાં રઞ્જકતા ધ્યાનપટૂનાં માપકતા ।
નીતિપટૂનાં ભેદકતા ધૂતિપટૂનાં ક્ષેપકતા ॥ ૨૦.૧૩॥

દીધિતિધારા લોકયતાં જીવિતધારા વર્તયતામ્ ।
જ્ઞાપકધારા ચિન્તયતાં માદકધારા દ્રાવયતામ્ ॥ ૨૦.૧૪॥

મન્ત્રપરાણાં વાક્યબલં યોગપરાણાં પ્રાણબલમ્ ।
આત્મપરાણાં શાન્તિબલં ધર્મપરાણાં ત્યાગબલમ્ ॥ ૨૦.૧૫॥

સૂરિવરાણાં વાદબલં વીરવરાણાં બાહુબલમ્ ।
મર્ત્યપતીનાં સૈન્યબલં રાગવતીનાં હાસબલમ્ ॥ ૨૦.૧૬॥

વૈદિકમન્ત્રે ભાવવતી તાન્ત્રિકમન્ત્રે નાદવતી ।
શાબરમન્ત્રે કલ્પવતી સન્તતમન્ત્રે સારવતી ॥ ૨૦.૧૭॥

બ્રહ્મમુખાબ્જે વાગ્વનિતા વક્ષસિ વિષ્ણોઃ શ્રીર્લલિતા ।
શમ્ભુશરીરે ભાગમિતા વિશ્વશરીરે વ્યોમ્નિ તતા ॥ ૨૦.૧૮॥

ભૂગ્રહગોલૈઃ કન્દુકિની વિષ્ટપધાને કૌતુકિની ।
યાવદનન્તં વૈભવિની પ્રાણિષુ ભૂયસ્સમ્ભવિની ॥ ૨૦.૧૯॥

કઞ્જભવાણ્ડે મણ્ડલિની પ્રાણિશરીરે કુણ્ડલિની ।
પામરભાવે સલ્લલના પણ્ડિતભાવે મોદઘના ॥ ૨૦.૨૦॥

નાર્યપિ પુંસા મૂલવતી તન્વ્યપિ શક્ત્યા વ્યાપ્તિમતી ।

વ્યાપ્તિમતીત્વે ગુપ્તિમતી ચિત્રવિચિત્રા કાઽપિ સતી ॥ ૨૦.૨૧॥

દીધિતિરૂપા ચિત્તમયી પ્રાણશરીરાઽપ્યદ્વિતયી ।
બ્રહ્મશરીરં બ્રહ્મવિભા બ્રહ્મવિભૂતિર્બ્રહ્મપરમ્ ॥ ૨૦.૨૨॥

વિષ્ટપમાતા ભૂરિકૃપા વિષ્ટપરાજ્ઞી ભૂરિબલા ।
વિષ્ટપરૂપા શિષ્ટનુતા વિષ્ટપપારે શિષ્ટમિતા ॥ ૨૦.૨૩॥

દુર્જનમૂલોચ્છેદકરી દીનજનાર્તિધ્વંસકરી ।
ધીબલલક્ષ્મીનાશકૃશં પુણ્યકુલં નઃ પાતુ શિવા ॥ ૨૦.૨૪॥

ચન્દ્રકિરીટામ્ભોજદૃશઃ શાન્તિસમૃદ્ધં સ્વાન્તમિમે ।
સમ્મદયન્તુ શ્રોત્રસુખાઃ સન્મણિબન્ધાઃ સૂરિપતેઃ ॥ ૨૦.૨૫॥ 500

॥ સમાપ્તં ચ પઞ્ચમં શતકમ્ ॥

---

ષષ્ઠં શતકમ્

એકવિંશઃ સ્તબકઃ

અર્ધનારીશ્વરઃ (અનુષ્ટુબ્વૃત્તમ્)

ઇતઃ પીત્વા કુચં સ્કન્દે પ્રસારિતકરે તતઃ ।
જયતિ સ્મિતમુદ્ભૂતં શિવયોરેકદેહયોઃ ॥ ૨૧.૧॥

એકતો મણિમઞ્જીરક્વાણાહૂતસિતચ્છદમ્ ।
અન્યતો નૂપુરાહીન્દ્રફૂત્કારકૃતતદ્ભયમ્ ॥ ૨૧.૨॥

ગીર્વાણપૃતનાપાલં બાલં લાલયદેકતઃ ।
ઉત્સઙ્ગે ગણસમ્રાજમર્ભકં બિભ્રદન્યતઃ ॥ ૨૧.૩॥

વિડમ્બિતબ્રહ્મચારિકોકૈકસ્તનમેકતઃ ।
કવાટાર્ધનિભં બિભ્રદ્વક્ષઃ કેવલમન્યતઃ ॥ ૨૧.૪॥

સેનાન્યાઽઽસ્વાદિતસ્તન્યમનુફૂત્કુર્વતૈકતઃ ।
ફૂત્કારમુખરં નાગમુગ્રં જાગ્રતમન્યતઃ ॥ ૨૧.૫॥

એકતો દોર્લતાં બિભ્રન્ મૃણાલશ્રીવિડમ્બિનીમ્ ।
શુક્રશુણ્ડાલશુણ્ડાભં ચણ્ડં દોર્દણ્ડમન્યતઃ ॥ ૨૧.૬॥

કુત્રાપ્યવિદ્યમાનેઽપિ વન્દનીયે તદા તદા ।

પરસ્પરકરસ્પર્શલોભતો વિહિતાઞ્જલિ ॥ ૨૧.૭॥

શક્રનીલસવર્ણત્વાદ્ ભાગયોરુભયોરપિ ।
ઊર્ધ્વાધરાઙ્ગસાપેક્ષસન્ધિજ્ઞાનગલસ્થલમ્ ॥ ૨૧.૮॥

એકતઃ કૈરવશ્રેણીનિદ્રામોચનલોચનમ્ ।
અન્યતઃ કમલાવાસક્ષણાધાયકવીક્ષણમ્ ॥ ૨૧.૯॥

એકતશ્ચક્ષુષા ચારુતારેણાધીતવિભ્રમમ્ ।
અન્યતઃ પાણિપાથોજે ખેલતો મૃગબાલતઃ ॥ ૨૧.૧૦॥

એકતો ભાલફલકે કાશ્મીરેણ વિશેષિતમ્ ।
અન્યતોઽર્ધેક્ષણેનૈવ રતિભ્રૂવિભ્રમદ્રુહાઃ ॥ ૨૧.૧૧॥

એકતઃ શીતલાલોકં સાધુલોકશિવઙ્કરમ્ ।
અન્યતઃ પ્રજ્વલત્પ્રેક્ષં દુષ્ટગોષ્ઠીભયઙ્કરમ્ ॥ ૨૧.૧૨॥

એકતો મણિતાટઙ્કપ્રભાધૌતકપોલકમ્ ।
અન્યતઃ કુણ્ડલીભૂતકુણ્ડલીભૂતકુણ્ડલિ ॥ ૨૧.૧૩॥

એકતઃ કુન્તલાન્ બિભ્રદિન્દ્રનીલોપમદ્યુતીન્ ।
અન્યતઃ પાવકજ્વાલાપાટલાંશુચ્છટા જટાઃ ॥ ૨૧.૧૪॥

એકતઃ કેશપાશેન કીર્ણેનોરસિ ભાસુરમ્ ।
અન્યતો લમ્બમાનસ્ય ભોગિનો હરતા શ્રિયમ્ ॥ ૨૧.૧૫॥

અવતંસિતમમ્લાનપારિજાતસ્રજૈકતઃ ।
વિમલોલ્લોલમાલિન્યા વિભુધાપગયાઽન્યતઃ ॥ ૨૧.૧૬॥

રૌપ્યાચલકૃતાવાસં પ્રાપ્યં યુક્તેન ચેતસા ।
વસ્તુ રામાપુમાકારં હૃદિ સન્નિદધાતુ મે ॥ ૨૧.૧૭॥

કાન્તાર્ધવિગ્રહે માતર્જટાર્ધાશ્ચિકુરાસ્તવ ।
દધત્યદભ્રસન્ધ્યાભ્રયુક્તકાલાભ્રવિભ્રમમ્ ॥ ૨૧.૧૮॥

દમ્પત્યોર્યુવયોરેષ લોપો યન્નાસ્તિ શૈલજે ।
વામં પાર્શ્વં વિભોઃ શેતું દાતું તે દક્ષિણઃ કરઃ ॥ ૨૧.૧૯॥

લોકે સ્ત્રી સ્તનયુગ્મેન પુષ્ણાત્યેકં સુતં ન વા ।
સ્તનેનૈકેન શર્વાણિ પુષ્ણાસિ ત્વં જગત્ત્રયમ્ ॥ ૨૧.૨૦॥

ખિદ્યન્તિ યોષિતઃ કુક્ષૌ વહન્ત્યોઽર્ભકમેકકમ્ ।
અર્ધકુક્ષૌ દધાસિ ત્વં ત્રિલોકીમમ્બ લીલયા ॥ ૨૧.૨૧॥

અનુરૂપા શિવસ્ય ત્વમનુરૂપઃ શિવસ્તવ ।
અલઙ્કારોઽનુરૂપો વામકલઙ્કોઽર્ભકઃ શશી ॥ ૨૧.૨૨॥

તવૈવ તવ દેહાંશો હરસ્યૈવ હરસ્ય યઃ ।
પ્રાણાસ્તુ જગતાં ધાત્રિ હરસ્ય ત્વં હરસ્તવ ॥ ૨૧.૨૩॥

અવિભક્તં ભવાનિ સ્વં ભવસ્ય તવ ચોભયોઃ ।
સકૃત્સકરુણં ચેતઃ સઙ્કલ્પયતુ નશ્શિવમ્ ॥ ૨૧.૨૪॥

ભવસ્ય ભાગમુત્સૃજ્ય ભવાની ભાગમાત્મનઃ ।
ભજત્વનુષ્ટુભામાસાં સૃષ્ટાનાં નારસિંહિના ॥ ૨૧.૨૫॥ 525

---

દ્વાવિંશઃ સ્તબકઃ

હરકુટુમ્બકમ્ (વિયોગિનીવૃત્તમ્)

અખિલસ્ય વિકાસકારણં વ્યસનિઙ્ગાનિજનાવનેષુ નઃ ।
વિતનોતુ વિશેષતઃ શિવં શિવરાજીવદૃશો દરસ્મિતમ્ ॥ ૨૨.૧॥

વિકલે સકલે સુરવ્રજે વ્રજતિ શ્યામલિમાનમચ્યુતે ।
જગતસ્સદયો હલાહલં ચુલુકીકૃત્ય ભયં નુનોદ યઃ ॥ ૨૨.૨॥

નિગમૈસ્તુરગી ભુવા રથી વિધિના સારથિમાન્ બિભેદ યઃ ।
કનકાદ્રિવરેણ કાર્મુકી કમલાક્ષેણ શરી પુરત્રયમ્ ॥ ૨૨.૩॥

અજિતસ્ય ચ ગાઢમત્સરૈઃ કમલાકાન્તપુરસ્સરૈસ્સુરૈઃ ।
પદજાયુધધારયા રયાદ્વધમાધત્ત જલન્ધરસ્ય યઃ ॥ ૨૨.૪॥

કમલાસનકઞ્જલોચનૌ છલલિઙ્ગસ્ય શિરોઙ્ઘ્રિ વીક્ષિતુમ્ ।
બત હંસવરાહભૂમિકૌ યતમાનાવપિ યસ્ય ન પ્રભૂ ॥ ૨૨.૫॥

નયનં નિટલાન્તરસ્થિતં વિઘટય્યેષદિવાન્વિતો રુષા ।
ભુવનત્રયનિર્જયોન્નતં મદનં ગાઢમદં દદાહ યઃ ॥ ૨૨.૬॥

સકલે ધવલઃ કલેવરે હરિનીલોપલમઞ્જુલઃ ક્વચિત્ ।
અમૃતાંશુરિવાદધાતિ યઃ પરમામક્ષિમુદં પ્રપશ્યતામ્ ॥ ૨૨.૭॥

અવતંસતુષારદીધિતિદ્યુતિભિર્યસ્ય યશોભરૈરપિ ।
સમમચ્છતરીકૃતો દિશામવકાશસ્સુતરાં પ્રકાશતે ॥ ૨૨.૮॥

ગગનાનલજીવનાનિલક્ષિતિસોમારુણસોમયાજિભિઃ ।
મહતો બત યસ્ય મૂર્તિભિર્ભુવનં ક્રાન્તમિદં સમન્તતઃ ॥ ૨૨.૯॥

સહ તેન ધવેન રાજતે વસુધાધારિણિ કાઽપિ રાજતે ।
વનિતા ભવતાપનાશિની ચરણપ્રેષ્યનિવેદિતાશિની ॥ ૨૨.૧૦॥

વનિતાપુરુષૌ પુરાતનૌ વિમલે વ્યોમનિ દેવદમ્પતી ।
ભુવનત્રિતયસ્ય તૌ વિભૂ રજતાદ્રાવિહ સિદ્ધદમ્પતી ॥ ૨૨.૧૧॥

ગજચર્મધરઃ કપાલભૃદ્ ગૃહનાથો ગૃહિણી તુ કાલિકા ।
રુધિરાવિલમુણ્ડમાલિની કથિતૌ તૌ બત પણ્ડિતૈઃ શિવૌ ॥ ૨૨.૧૨॥

સ કિમિન્દુકલાશિરોમણિઃ કિમુતાશ્લીલકપાલભૂષણઃ ।
કિમુમે ભવતી કપાલિની કિમુ વિભ્રાજિતરત્નમાલિની ॥ ૨૨.૧૩॥

રમસેઽમ્બ કપાલમાલિની ક્વચિદીશેન કપાલમાલિના ।
અતુલપ્રભનિષ્કમાલિના ક્વચિદત્યુત્તમરત્નમાલિની ॥ ૨૨.૧૪॥

યુવયોર્મરુતસ્તનૂભુવો બલવન્તો ભુવનપ્રકમ્પનાઃ ।
શશિદીધિતિહારિ યદ્યશો નિગમે પાવનમમ્બ ગીયતે ॥ ૨૨.૧૫॥

ગુરુમુત્તમમભ્રચારિણામસમબ્રહ્મનિધાનનાયકમ્ ।
તવ દેવિ શિવે તનૂભુવાં મરુતામન્યતમં પ્રચક્ષતે ॥ ૨૨.૧૬॥

દ્વિરદં વદને મહામદં સિતદન્તચ્છવિધૌતદિક્તટમ્ ।
ઇતરત્ર મુખાન્નરાકૃતિં વિદુરસ્યૈવ વિવર્તમદ્ભુતમ્ ॥ ૨૨.૧૭॥

અખિલામરનિર્જયોન્નતઃ પ્રથને તારકદાનવો બલી ।
હૃતવીર્યમદો બભૂવ યદ્ઘનશક્ત્યાયુધતેજસાઽઞ્જસા ॥ ૨૨.૧૮॥

અમલે હૃદિ નિર્મલાશનાચ્છિથિલે ગ્રન્થિચયે નરાય યઃ ।
પરિપક્વધિયે પ્રદર્શયેત્ તમસઃ પારમપારવૈભવઃ ॥ ૨૨.૧૯॥

દ્રવિડેષુ શિશુત્વમેત્ય યો ગિરિશશ્લોકવિશેષગાયિનીમ્ ।
અમૃતદ્રવસારહારિણીં નિગમાભાં નિબબન્ધ સંસ્તુતિમ્ ॥ ૨૨.૨૦॥

ભુવિ ભટ્ટકુમારિલાખ્યયા ભવમેત્યાધ્વરરક્ષણાય યઃ ।
વરજૈમિનિભાષિતાશયં બહુલાભિઃ ખલુ યુક્તિભિર્દધૌ ॥ ૨૨.૨૧॥

અધુના વિધુનોતિ યસ્તમો વિબુધપ્રેક્ષિતમાર્ગરોધકમ્ ।
રમણાખ્યમહર્ષિવેષભૃત્શ્રિતશોણાચલચારુકન્દરઃ ॥ ૨૨.૨૨॥

સ ગુહોઽતિમહો મહામહાસ્ત્રિદશાનાં પ્રથિતશ્ચમૂપતિઃ ।
જગતામધિરાજ્ઞિ કોઽપિ તે સુતરાં પ્રીતિપદં કુમારકઃ ॥ ૨૨.૨૩॥

જયતિ ત્રિપુરારિભામિની ગણપત્યાદિમરુત્પ્રસૂરુમા ।
તમસૂત સુરારિધૂતયે ત્રિદશાનામપિ યા ચમૂપતિમ્ ॥ ૨૨.૨૪॥

સ્વકુટુમ્બકથાભિધાયિનીર્ગણનાથસ્ય વિયોગિનીરિમાઃ ।
અવધારયતુ પ્રસન્નયા નગનાથપ્રિયનન્દિની ધિયા ॥ ૨૨.૨૫॥ 550

---

ત્રયોવિંશઃ સ્તબકઃ

પ્રકીર્ણકમ્ (નરમનોરમાવૃત્તમ્)

(અસ્મિન્ સ્તબકે તત્સવિતુરિતિ ગાયત્રીમન્ત્રસ્ય
ચતુર્વિંશતિવર્ણાઃ ક્રમશઃ પદ્યાનાં
તૃતીયપાદસ્ય ચતુર્થવર્ણે દૃશ્યન્તે ) ।

કિરદિવામૃતં કિરણમાલયા ।
જયતિ તત્સિતં શિવવધૂસ્મિતમ્ ॥ ૨૩.૧॥

તવ પદં પરે મમ ગુહાન્તરે ।
સ્ફુરતુ સર્વદા વિકસિતં મુદા ॥ ૨૩.૨॥

પદમધોઽમ્બુજાન્ન કિલ ભિદ્યતે ।
મદનવિદ્વિષઃ સદનરાજ્ઞિ તે ॥ ૨૩.૩॥

વિભુતયોરરીકૃતબહૂદ્ભવૌ ।
વિદધતુર્જગત્ત્રયમિદં શિવૌ ॥ ૨૩.૪॥

તવ તુ ખેલને નલિનજાણ્ડકમ્ ।
ગિરિશવલ્લભે ભવતિ કન્દુકમ્ ॥ ૨૩.૫॥

સકલમસ્ત્યુમે સદભયઙ્કરે ।
તવ કરે પરે કિમપિ નો નરે ॥ ૨૩.૬॥

કિમિવ વર્ણ્યતાં કશશિકુણ્ડલા ।

ઉડુમણિસ્રજાપ્રવિલસદ્વલા ॥ ૨૩.૭॥

ભણ નિરન્તરં બહુગુણામુમામ્ ।
ગતભયં વિધેહ્યમલવાણિ મામ્ ॥ ૨૩.૮॥

અવ જહીહિ વા નનુ ભજામ્યહમ્ ।
ભુવનભર્ત્રિ તે ચરણમન્વહમ્ ॥ ૨૩.૯॥

ગણપતેઃ શિરઃકમલચુમ્બિની ।
ભવતુ ગોપતિધ્વજકુટુમ્બિની ॥ ૨૩.૧૦॥

દહરમજ્જનં વિદધતં જનમ્ ।
પરમદેવતે નયસિ ધામ તે ॥ ૨૩.૧૧॥

જનનિ વિજ્ઞાતા ભવતુ ધીમતામ્ ।
અનુભવસ્તુ તે કરુણયા સતામ્ ॥ ૨૩.૧૨॥

અચલયા ધિયા હૃદિ ગવેષણમ્ ।
વૃષહયપ્રિયાનગરશોધનમ્ ॥ ૨૩.૧૩॥

ન વિજહામિ તે ચરણનીરજમ્ ।
અવનિ ધીમતામવ ન વા નિજમ્ ॥ ૨૩.૧૪॥

પદમુમેઽમ્બ તે હૃદિ વિચિન્વતે ।
પલિતમસ્તકાઃ પરમદેવતે ॥ ૨૩.૧૫॥

સ્વયમનામયે સકલધાત્ર્યસિ ।
નિજમહિમ્નિ સા ત્વમથિ તિષ્ઠસિ ॥ ૨૩.૧૬॥

સ્થિતિમસાદયઁસ્તવ પદામ્બુજે ।
વિધિમધિક્ષિપત્યલસનીરજે ॥ ૨૩.૧૭॥

સ્યતુ મદાપદં શિવવધૂપદમ્ ।
યદૃષયો વિધુસ્ત્રિભુવનાસ્પદમ્ ॥ ૨૩.૧૮॥

ગુણગણં ગૃણઁસ્તવ શિવે શિવમ્ ।
ગતભયોઽભવં મદમિતો નવમ્ ॥ ૨૩.૧૯॥

તવકૃપાવશાત્ તદિદમવ્યયે ।
જનનિ નઃ પ્લુતિસ્તવ યદઙ્ઘ્રયે ॥ ૨૩.૨૦॥

નયનદૃશ્યયોરયિ યદન્તરમ્ ।
તદમરસ્તુતે તવ વપુઃ પરમ્ ॥ ૨૩.૨૧॥

અહમિતિ સ્મૃતિઃ ક્વ નુ વિભાસતે ।
ઇતિ વિચોદયન્ મહતિ લીયતે ॥ ૨૩.૨૨॥

અમૃતસંજ્ઞકે સુખચિદાત્મકે ।
મતિમદર્થિતે જનનિ ધામ્નિ તે ॥ ૨૩.૨૩॥

અયિ મુદાસ્પદં સ્પૃશતિ તે પદમ્ ।
શ્વસિતયાત્રયા સતતદૃષ્ટયા ॥ ૨૩.૨૪॥

દધતુ સત્કવેર્ગણપતેરિમાઃ ।
નગભુવો મુદં નરમનોરમાઃ ॥ ૨૩.૨૫॥ 575

---

ચતુર્વિંશઃ સ્તબકઃ
પ્રકીર્ણકમ્ (સુપ્રતિષ્ઠાવૃત્તમ્)

ચન્દ્રિકાસિતં ચણ્ડિકાસ્મિતમ્ ।
ભૂતલે સતાં ભાતુ ભૂતયે ॥ ૨૪.૧॥

ભાલચક્ષુષશ્ચક્ષુષાં ધનમ્ ।
કિઞ્ચિદસ્તુ મે શસ્તવર્ધનમ્ ॥ ૨૪.૨॥

સાધુસન્તતિક્ષેમકારિણી ।
ઘોરદાનવાનીકદારિણી ॥ ૨૪.૩॥

યોગયુક્તસચ્ચિત્તચારિણી ।
પાદસેવકપ્રાજ્ઞતારિણી ॥ ૨૪.૪॥

પુષ્પબાણજિન્નેત્રહારિણી ।
પાતુ માં જગચ્ચક્રધારિણી ॥ ૨૪.૫॥

દ્વાદશાન્તભૂજાતશારિકા ।
સર્વવાઙ્મયસ્યૈકકારિકા ॥ ૨૪.૬॥

પુણ્યકર્મસુ સ્વચ્છમસ્તકા ।
યોગશાલિષુ છિન્નમસ્તકા ॥ ૨૪.૭॥

આત્મનિ સ્થિતેઃ સમ્પ્રદાયિકા ।
સર્વજન્મિનાં સમ્પ્રવર્તિકા ॥ ૨૪.૮॥

માં પુનાતુ સત્પૂજ્યપાદુકા ।
ભાલલોચનપ્રાણનાયિકા ॥ ૨૪.૯॥

દાનતો યશઃ પૌરુષાદ્રમા ।
સમ્પદો મદઃ શીલતઃ ક્ષમા ॥ ૨૪.૧૦॥

સત્યતો જગત્યત્ર ગૌરવમ્ ।
યજ્ઞતો દિવિ સ્થાનમુજ્જ્વલમ્ ॥ ૨૪.૧૧॥

સંયમાદઘવ્રાતવીતતા ।
યોગતો મહાસિદ્ધિશાલિતા ॥ ૨૪.૧૨॥

શર્વનારિ તે પાદસેવયા ।
સર્વસત્ફલાવાપ્તિરગ્ર્યયા ॥ ૨૪.૧૩॥

નોદ્યમેન યા સિદ્ધિરુત્તમા ।
વિશ્વનાયિકાવીક્ષિતેન સા ॥ ૨૪.૧૪॥

સમ્પદાં રમા ભારતી ગિરામ્ ।
ત્વં શિવે પ્રભુઃ પ્રાણસંવિદામ્ ॥ ૨૪.૧૫॥

ચક્ષુષા નભોલક્ષ્યધારિણા ।
સિદ્ધ્યતીવ તે દેવિ ધારણા ॥ ૨૪.૧૬॥

આશિરો દધન્નાભિતોઽનિલમ્ ।
દેવિ વિન્દતિ ત્વન્મુનિર્બલમ્ ॥ ૨૪.૧૭॥

હૃદ્ગૃહાન્તરે યદ્વિશોધનમ્ ।
તત્સવિત્રિ તે સ્યાદુપાસનમ્ ॥ ૨૪.૧૮॥

કાઽપ્યહમ્મતિર્ગોચરં વિના ।
લોકધાત્રિ તે રૂપભાવના ॥ ૨૪.૧૯॥

અસ્યમણ્ડનં કોઽપિ વિદ્યયા ।
ખણ્ડનં પરઃ પ્રાહ ના યયા ॥ ૨૪.૨૦॥

માતરેતયા જીયતે ત્વયા ।
એકયા તનૂભિન્નયા ધિયા ॥ ૨૪.૨૧॥

બાહ્યદર્શને વિશ્વપઙ્કિલા ।
અન્યથા ભવસ્યમ્બ કેવલા ॥ ૨૪.૨૨॥

ખણ્ડવન્નૃણાં ભાસિ ભોગિનામ્ ।
અસ્યભિન્નચિત્ કાऽપિ યોગિનામ્ ॥ ૨૪.૨૩॥

બન્ધ એષ યદ્ભાસિ ખણ્ડિતા ।
મોક્ષ એષ યદ્ભાસ્યખણ્ડિતા ॥ ૨૪.૨૪॥

એતદીશિતુઃ પત્નિ હૃન્મુદે ।
સૌપ્રતિષ્ઠસદ્ગીતમસ્તુ તે ॥ ૨૪.૨૫॥ 600

॥ સમાપ્તં ચ ષષ્ઠં શતકમ્ ॥

---

સપ્તમં શતકમ્

પઞ્ચવિંશઃ સ્તબકઃ

ક્ષેત્રમાલા (ઇન્દ્રવજ્રાવૃત્તમ્)

કન્યાકુમારી સુતરાં વદાન્યા
માન્યા સમસ્તૈઃ પ્રકૃતેરનન્યા ।
આક્ષેપકં સાગરબુદ્બુદાનાં
હાસં વિધત્તાં જગતઃ સુખાય ॥ ૨૫.૧॥

રક્ષ સ્વચેતો મદમત્સરાદેર્-
ભિક્ષસ્વ કાલે તનુરક્ષણાય ।
વીક્ષસ્વ રામેશવધૂપદાબ્જં
મોક્ષસ્વલાભે યદિ તેऽભિલાષઃ ॥ ૨૫.૨॥

લોકસ્વ દૂરીકૃતભક્તશોકં
હાલાસ્યનાથેક્ષણપુણ્યપાકમ્ ।
ભીતિઃ સખે ચેદ્ભવતઃ પવિત્રં
જ્યોતિર્વિશેષં જલચારિનેત્રમ્ ॥ ૨૫.૩॥

યો લોકતે તામખિલાણ્ડરાજ્ઞી-
મજ્ઞાનવિધ્વંસવિધાનવિજ્ઞામ્ ।
અમ્બાં પરાં જીવનલિઙ્ગશક્તિં

ભૂયઃ સ કાયં ન ભવે લભેત ॥ ૨૫.૪॥

બિભ્રત્સહસ્રં ચ મુખાનિ શક્તો
વક્તું ગુણાન્ કઃ કમલાલયસ્ય ।
જન્માપિ યત્ર પ્રભવેજ્જનાનાં
મુક્ત્યૈ મુનીનામપિ દુર્લભાયૈ ॥ ૨૫.૫॥

વ્યાઘ્રાઙ્ઘ્રિવાતાશનપૂજિતસ્ય
નાટ્યસ્થલીનાયિકયા શિવસ્ય ।
નેત્રાધ્વભાજા શિવકામયા વો
મિત્રાણિ કામાઃ ફલિનો ભવન્તુ ॥ ૨૫.૬॥

આલોકતેઽપીતકુચામયિ ત્વા-
માલોલચિત્તામરુણાચલે યઃ ।
નિર્વેદવાન્ પર્વસુધાંશુવક્ત્રે
સર્વે વશે તસ્ય ભવન્તિ કામાઃ ॥ ૨૫.૭॥

યઃ કુણ્ડલીપટ્ટણરાજધાની-
માલોકતે કામપિ કૃત્તમસ્તામ્ ।
નિસ્સારમાનન્દકથાવિહીનં
સંસારમેતં સ જહાતિ બુદ્ધ્યા ॥ ૨૫.૮॥

દૃષ્ટ્વા વધૂમાદિપુરીશ્વરસ્ય
યો લોચનારોચકમાધુનોતિ ।
તસ્યાન્તરઙ્ગં ધુતસર્વસઙ્ગં
ભૂયો ભવારોચકમાવૃણોતિ ॥ ૨૫.૯॥

કાઞ્ચી રમણ્યાઃ કુરુતાં ગૃહસ્થે
ક્વાણૈર્મુદં કામપિ કિઙ્કિણીનામ્ ।
કાઞ્ચી ભુવઃ પુણ્યપુરી યતીન્દ્ર
ત્વામમ્બિકાનામરવૈર્ધિનોતુ ॥ ૨૫.૧૦॥

શ્રીકાલહસ્તિસ્થલદર્શનસ્ય
કૈલાસવીક્ષાં પુનરુક્તિમાહુઃ ।
જ્ઞાનં પ્રદાતું ચરણાશ્રિતેભ્યો
જ્ઞાનામ્બિકા યત્ર નિબદ્ધદીક્ષા ॥ ૨૫.૧૧॥

શ્રીશૈલશ‍ૃઙ્ગસ્ય વિલોકનેન
સઙ્ગેન હીનો ભવિતા મનુષ્યઃ ।
ધામાસ્તિ યત્ર ભ્રમરાલકાયાઃ
શાન્તભ્રમં તદ્ભ્રમરામ્બિકાયાઃ ॥ ૨૫.૧૨॥

તીરે વિપશ્ચિદ્વર પશ્ચિમાબ્ધેર્-
ગોકર્ણગાં લોકય ભદ્રકર્ણીમ્ ।
બુદ્ધિં શિવાં સર્વમનોરથાનાં
સિદ્ધિં ચ યદ્યસ્તિ મનોઽધિગન્તુમ્ ॥ ૨૫.૧૩॥

ધામ્નિ પ્રસિદ્ધે કરવીરનામ્નિ
પુણ્યાભિધાનાં કૃતસન્નિધાનામ્ ।
દેવીં પરાં પશ્યતિ યો વિરક્તો
મુક્તેઃ સ પાણિગ્રહણાય શક્તઃ ॥ ૨૫.૧૪॥

જ્ઞાને દૃઢા તે યદિ કાપિ કાઙ્ક્ષા
નાનેહસં મિત્ર મુધા ક્ષિપેમમ્ ।
સેવસ્વ દેવીં તુલજાપુરસ્થાં
નૈવ સ્વરૂપાદિતરા કિલેયમ્ ॥ ૨૫.૧૫॥

ગોપાલિનીવેષભૃતં ભજસ્વ
લીલાસખીં તાં ભુવનેશ્વરસ્ય ।
ઇષ્ટં હૃદિસ્થં તવ હસ્તગં સ્યાત્
કષ્ટં ચ સંસારભવં ન ભૂયઃ ॥ ૨૫.૧૬॥

આરાધ્યતે વૈતરણીતટસ્થા
યેનેયમમ્બા વિરજોઽભિધાના ।
આરાધિતં તેન સમસ્તમન્યત્
સારો ધરાયામયમાર્યગીતઃ ॥ ૨૫.૧૭॥

સઙ્ગીયમાનં સ્થલમાર્યવૃન્દૈર્-
વૃન્દારકાણાં સરિતસ્તટેઽસ્તિ ।
યઃ કાલિકાં પશ્યતિ કાલકેશીં
તત્રાસ્ય કાલાદપિ નૈવ ભીતિઃ ॥ ૨૫.૧૮॥

નીલાચલં સિદ્ધસમૂહસેવ્યં
લીલાનિકેતં પ્રવદન્તિ યસ્યાઃ ।

ભદ્રા પરા કાચન ગુહ્યમુદ્રા
કામેશ્વરી સા ભુવનસ્ય મૂલમ્ ॥ ૨૫.૧૯॥

માઙ્ગલ્યગૌરીપદદર્શનસ્ય
કર્તા તુ ભૂત્વા સુકૃતસ્ય ભર્તા ।
આચારપૂતૈરધિગમ્યમગ્ર્યં
સ્થાનં પ્રપદ્યેત યતો ન પાતઃ ॥ ૨૫.૨૦॥

વારાણસી શુભ્રગિરેરનૂનં
ક્ષેત્રં પવિત્રં ભુવનત્રયેઽપિ ।
અર્થે પ્રજાનાં વિધૃતાન્નપાત્રા
ગૌરી સ્વયં યત્ર વિશાલનેત્રા ॥ ૨૫.૨૧॥

વૃન્દારકારાધિતપાદપદ્માં
નન્દામિમામિન્દુસમાનવક્ત્રામ્ ।
આલોક્ય વિન્ધ્યાચલવાસિનીં ના
નાલોચયેત્સંસૃતિતો ભયાનિ ॥ ૨૫.૨૨॥

આનન્દદેહામિહ મુક્તિસંજ્ઞાં
નારીં પરીરબ્ધુમના મનુષ્યઃ ।
દૂતીં વૃણોતુ પ્રમથેશ્વરસ્ય
કાન્તામવન્તીપુરનાયિકાં તામ્ ॥ ૨૫.૨૩॥

યત્રાચલચ્છિદ્રકૃતા સહાહં
ભ્રાત્રા મુહુઃ ખેલિતવાન્ વનેષુ ।
તં સિદ્ધદેવર્ષિનુતં સ્મરામિ
કૈલાસમાવાસગિરિં જનન્યાઃ ॥ ૨૫.૨૪॥

પૂર્ણાઽમ્બરે શીતકરેઽધિકારં
બિભ્રત્યગેન્દ્રે ધવલે સલીલા ।
ક્ષેત્રેષુ કાશ્યાદિષુ ગુપ્તશક્તિર્-
ગૌરીન્દ્રવજ્રાસુ ચ સન્નિધત્તામ્ ॥ ૨૫.૨૫॥ 625

---

ષડ્વિંશઃ સ્તબકઃ

અપીતકુચામ્બા (દોધકવૃત્તમ્)

આગમવિન્મતિકૈરવિણીનાં
બોધમજસ્રમસૌ વિદધાનઃ ।
પાતુ મહેશવધૂવદનાંશો
હાસશશી સકલાનિ કુલાનિ ॥ ૨૬.૧॥

આયતલોચનચુમ્બિતકર્ણા
દાનયશોજિતતોયદકર્ણા ।
શોણનગેશમનઃ પ્રિયવર્ણા
નાશયતાજ્જગદાર્તિમપર્ણા ॥ ૨૬.૨॥

વેદતુરઙ્ગવિલોચનભાગ્યં
વેદશિરોનિચયૈરપિ મૃગ્યમ્ ।
શોકવિદારિસુધાકિરણાસ્યં
શોણગિરૌ સમલોકિ રહસ્યમ્ ॥ ૨૬.૩॥

મુઞ્ચ સમસ્તમનોરથલાભે
સંશયમદ્ય કરામલકાભે ।
દૃક્પથમાપ નગેન્દ્રતનૂજા
સોઽહમિતઃ પરમન્તરરાજા ॥ ૨૬.૪॥

શિલ્પવિદઃ પ્રતિમાં પ્રવિશન્તી
સ્વલ્પવિદાં તરણાય ચકાસ્તિ ।
શોણધરાભૃતિ સમ્પ્રતિ લબ્ધા
હન્ત ચિરાદિયમેવ મમામ્બા ॥ ૨૬.૫॥

ભારતભૂવલયેઽત્ર વિશાલે
સન્ત્વનઘાનિ બહૂનિ ગૃહાણિ ।
આસ્યવિગીતસુધાકરબિમ્બા
શોણગિરૌ રમતેઽત્ર મદમ્બા ॥ ૨૬.૬॥

વારિતસંશ્રિતપાતકજાલા
વારિધિવીચિનિરઙ્કુશલીલા ।
વારિજપત્રવિડમ્બનનેત્રા
વારણરાજમુખેન સપુત્રા ॥ ૨૬.૭॥

આયતવક્રઘનાસિતકેશી
તોયજબાણરિપોર્હૃદયેશી ।

કાશસુમાચ્છયશાઃ પરમૈષા
પાશભિદસ્તુ તવેન્દુવિભૂષા ॥ ૨૬.૮॥

પઙ્કજસમ્ભવપૂજિતપાદા
પઙ્કવિનાશનપાવનનામા ।
કિઙ્કરકલ્પલતા પરમેયં
શઙ્કરનેત્રસુધા શરણં નઃ ॥ ૨૬.૯॥

ચઞ્ચલદૃગ્વિનતામરવલ્લી
પઞ્ચપૃષત્કશરાસનઝિલ્લી ।
કાઞ્ચનગર્ભમુખપ્રણુતેયં
પઞ્ચમુખપ્રમદા શરણં નઃ ॥ ૨૬.૧૦॥

અમ્બ વિધૂય ભટાન્મદનાદીન્
નૂપુરનાદબિભીષિકયૈષઃ ।
હન્ત જહાર બલેન મનો મે
શોણનગાઙ્ઘ્રિનિવાસિનિ તેઽઙ્ઘ્રિઃ ॥ ૨૬.૧૧॥

કર્ણપુટે કુરુ મુગ્ધ મમોક્તિં
મુઞ્ચ ધનાદિષુ માનસસક્તિમ્ ।
શોણગિરીન્દ્રવધૂપદભક્તિં
શીલય શીલય યાસ્યસિ મુક્તિમ્ ॥ ૨૬.૧૨॥

જીર્ણતરે જરયાઽખિલદેહે
બુદ્ધિબલં ચ વિલુમ્પતિ મોહે ।
હન્ત સવિત્રિ તપન્મતિરન્તે
સેવિતુમિચ્છતિ ના ચરણં તે ॥ ૨૬.૧૩॥

તન્ત્રવિદો નવયોનિ તુ ચક્રં
શોણધરાધરરૂપમુશન્તિ ।
અર્ધમમુષ્ય વપુર્મદનારે-
ર્ધમગેન્દ્રસુતે તવ ગાત્રમ્ ॥ ૨૬.૧૪॥

અસ્તુ નગેશ્વરનન્દિનિ લિઙ્ગં
તૈજસમેતદિહાપિ તવાંશઃ ।
વીતગુણસ્ય વિના તવ યોગં
દેવિ શિવસ્ય કુતઃ ખલુ તેજઃ ॥ ૨૬.૧૫॥

સ્થાપિતમૂર્તિરિયં તવ નમ્યા
પૂજયિતું જગદીશ્વરિ રમ્યા ।
શોણનગાર્ધમિદં તવ રૂપં
કીર્તયિતું નગજે ધુતપાપમ્ ॥ ૨૬.૧૬॥

શોણનગાર્ધતનોઽનિશમઙ્કે
ધારયસેઽપિ ગુહં રમણાખ્યમ્ ।
આગતમપ્યયિ હા મુહુરમ્બો-
ઞ્યાટયસે ગણપં નનુ કસ્માત્ ॥ ૨૬.૧૭॥

અઙ્કજુષે રમણાય નુ દાતું
માનવવેષધરાય ગુહાય ।
શોણનગાર્ધતનો બહુ દુગ્ધં
માતરપીતકુચેહ વિભાસિ ॥ ૨૬.૧૮॥

પૂર્ણસમાધિવશાત્ સ્વપિષિ ત્વં
પીતમપીતકુચેઽમ્બ ન વેત્સિ ।
અઙ્કજુષા રમણેન સુતેન
પ્રેક્ષ્ય યથેષ્ટમુરોરુહદુગ્ધમ્ ॥ ૨૬.૧૯॥

જ્ઞાનરસાહ્વયમમ્બ નિપીય
સ્તન્યમસૌ રમણો મુનિરાટ્ તે ।
જ્ઞાનમયોઽભવદીશ્વરિ સર્વઃ
પુષ્યતિ યેન તનું હિ તદાત્મા ॥ ૨૬.૨૦॥

પ્રીતિપદાય પયોધરકુમ્ભાત્
પાર્વતિ ધીમયદુગ્ધમપીતાત્ ।
અસ્તુ ગુહાય શિવે બહુ દત્તં
કિઞ્ચિદિવેશ્વરિ ધારય મહ્યમ્ ॥ ૨૬.૨૧॥

પ્રૌઢમિમં યદિ વેત્સિ તનૂજં
શૈલસુતે મદવારિ દધાનમ્ ।
માસ્તુપયો વિતરાનઘમન્નં
યેન દધાનિ મહેશ્વરિ શક્તિમ્ ॥ ૨૬.૨૨॥

સ્વાર્જિતમેવ મયા યદિ ભોજ્યં

સમ્મદ એવ મમાખિલમાતઃ ।
આશિષમગ્ર્યતમામયિ દત્ત્વા
પ્રેષય યાનિ જયાનિ ધરિત્રીમ્ ॥ ૨૬.૨૩॥

વિદ્યુતિ વિદ્યુતિ વીક્ષ્યવિલાસા
વીક્ષિતકર્મણિ લક્ષ્યરહસ્યા ।
પાર્વણચન્દ્રમુખી લલિતાઙ્ગી
તૈજસલિઙ્ગસખી શરણં નઃ ॥ ૨૬.૨૪॥

માતરપીતકુચેઽરુણશૈલા-
ધીશ્વરભામિનિ ભામહનીયે ।
સાધુ વિધાય સમર્પયતે તે
દોધકમાલ્યમિદં ગણનાથઃ ॥ ૨૬.૨૫॥ 650

---

સપ્તવિંશઃ સ્તબકઃ

પ્રચણ્ડચણ્ડી (શિખરિણીવૃત્તમ્)

વિધુન્વન્ધ્વાન્તાનિ પ્રતિદિશમધર્મં પરિહરઁ-
શ્છ્રિયં વ્યાતન્વાનસ્સપદિ શમયન્ દુઃખપટલમ્ ।
સહસ્રારામ્ભોજે દ્રવમસદૃશં મે પ્રજનયન્
પ્રચણ્ડાયાશ્ચણ્ડ્યાસ્સિતહસિતલેશો વિજયતે ॥ ૨૭.૧॥

અરીણાં શીર્ષેષુ જ્વલિતદવકીલીન્દ્રસદૃશં
વિનમ્રાણાં શીર્ષેષ્વમૃતકરબિમ્બેન તુલિતમ્ ।
વિરોધિધ્વાન્તાનાં તરુણતરણિપ્રાભવહરં
પ્રચણ્ડાયાશ્ચણ્ડ્યાશ્ચરણમસતાં હન્તુ વિભવમ્ ॥ ૨૭.૨॥

ભજે ભાસાં શાલાં નિખિલધિષણાનાં જનિભુવં
બલાનામાધાત્રીં નિખિલભુવનેન્દ્રસ્ય દયિતામ્ ।
ભજન્તે યાં ગીતૈર્મધુસમયમાદ્યાત્પિકવધૂ-
કલાલાપા હૃદ્યૈર્હયવદનપઙ્કેરુહદૃશઃ ॥ ૨૭.૩॥

જ્વલન્તી તેજોભિર્મહિષમથને યા તવ તનુર્-
લસન્તી લાવણ્યૈર્ગિરિશરમણે યા તવ તનુઃ ।
વિના ક્રોધપ્રીતિ ન કિમપિ તયોર્ભેદકમભૂત્

તયોરાદ્યા દુર્ગા ભવતિ લલિતાઽન્યા મુનિનુતે ॥ ૨૭.૪॥

સહસ્રં ભાનૂનાં ભવતિ દિવાસાનામધિપતેઃ
સહસ્રં શીર્ષાણાં ભવતિ ભુજગાનામધિપતેઃ ।
સહસ્રં નેત્રાણાં ભવતિ વિબુધાનામધિપતેઃ
સહસ્રં બાહૂનાં ભવતિ સમયે હૈમવતિ તે ॥ ૨૭.૫॥

પ્રસન્નો વક્ત્રેન્દુર્ન ચ નયનયોઃ કોઽપ્યરુણિમા
ન કમ્પો બિમ્બોષ્ઠે સ્મિતમપિ લસત્કાશવિશદમ્ ।
સરોજાભઃ પાણિઃ કિણવિરહિતઃ કોમલતમો
જ્વલચ્છૂલં ત્વાસીજ્જનનિ તાવ શુમ્ભાય ભયદમ્ ॥ ૨૭.૬॥

વધે શુમ્ભસ્યાસીત્તવ જનનિ યા કાચન તનુર્-
દધાનાઽગ્ર્યાઃ શક્તીઃ શશિકિરણસારોપમરુચિઃ ।
ઇમાં ધ્યાયં ધ્યાયં સ્મરહરસખિ વ્યાકુલમિદં
મનો મે વિશ્રાન્તિં ભજતિ ભજતાં કલ્પલતિકે ॥ ૨૭.૭॥

યદિ ત્વં સંહારે પટુરસિ સવિત્રિ ત્રિજગત-
સ્તદેતત્ત્વાં યાચે સરસિરુહગર્ભાદિવિનુતે ।
ઇમે મે પાપ્માનો ભગવતિ નદન્તો બહુવિધા-
સ્તદેષુ પ્રખ્યાતં પ્રતિભયતમં દર્શય બલમ્ ॥ ૨૭.૮॥

બિભેદોરઃ ક્રોધાત્કનકકશિપોરબ્ધિતનયા-
કુચગ્રાવોલ્લીઢૈરતિશિતશિખૈર્યઃ કિલ નખૈઃ ।
ત્વયા દત્તા શક્તિર્નરહરિશરીરાય જગતાં
વિનેત્રે પુંસેઽસ્મૈ જનનિ રણરઙ્ગસ્થલરમે ॥ ૨૭.૯॥

અજેયસ્ત્રૈલોક્યપ્રકટિતપતાકઃ પલભુજાં
બિડૌજા યત્કારાગૃહપરિચયી પઙ્ક્તિવદનઃ ।
સહસ્રારં સાક્ષાદ્ધૃતનરશરીરં તમજયત્
તવૈવાવેશેન પ્રિયપરશુરમ્બ દ્વિજશિશુઃ ॥ ૨૭.૧૦॥

ત્વદીયા સા શક્તિસ્સકલજગદન્તેઽપ્યનલસા
પુરા કાર્યસ્યાન્તે તનયમથિ હિત્વા નૃપરિપુમ્ ।
અવિક્ષત્કાકુત્સ્થં દશમુખકુલોન્માથવિધયે
સહસ્રાંશું હિત્વા શશિનમિવ ઘસ્રે ગલતિ ભા ॥ ૨૭.૧૧॥

હૃતે લોકવ્રાતે ભગવતિ ભવત્યૈવ સ પુરા-
મરિઃ કીર્તિં લબ્ધું ચતુરમતિરાયાતિ સમયે ।
ત્વયા લોકત્રાણે જનનિ રચિતે રાક્ષસબધાદ્
યશોઽવાપ્તું વિષ્ણુર્મિલતિ ચ કુતોઽપ્યેષ નિપુણઃ ॥ ૨૭.૧૨॥

સ્વરૂપં તે વજં વિયતિ રજસાં સૂક્ષ્મમહસા-
મુપાધિસ્તે સ્તોમો ભવતિ ચપલા કાઽપિ તનુભા ।
અરુદ્ધા તે વ્યાપ્તિર્બલમખિલદત્તં બલનિધેઃ
સહસ્રાંશઃ સ્વસ્ય પ્રભવસિ સમસ્તસ્ય ચ શિવે ॥ ૨૭.૧૩॥

યતઃ કાલવ્યાજાત્પચસિ ભુવનં વૈદ્યુતમહઃ-
પ્રભાવાત્કાલીં ત્વામયિ વિદુરતઃ પણ્ડિતવરાઃ ।
પ્રભોઃ શસ્ત્રં ભૂત્વા દહસિ યદરીન્વજવપુષા
પ્રચણ્ડાં ચણ્ડીં તદ્ભગવતિ ભણન્ત્યક્ષયબલે ॥ ૨૭.૧૪॥

અયિ ત્વામેવેન્દ્રં કથયતિ મુનિઃ કશ્ચિદજરે
ત્વયા શસ્ત્રાઢ્યં તં ભણતિ તુ પરસ્તત્ત્વવિદૃષિઃ ।
યુવાં માતાપુત્રૌ ભગવતિ વિભાજ્યૌ ન ભવતસ્-
તતો ધીનાં દ્વેધા વિબુધજનગોષ્ઠીષુ ગતયઃ ॥ ૨૭.૧૫॥

વિકુર્વાણા વિશ્વં વિવિધગુણભેદૈઃ પરિણમદ્
વિધુન્વાના ભાવાન્ ભુવનગતિરોધાય ભવતઃ ।
વિતન્વાના શર્વં ચલવદચલં કાચિદવિતું
વિચિન્વાના જન્તોઃ કૃતલવમપીશા વિજયતે ॥ ૨૭.૧૬॥

પ્રભા ભાનોર્યદ્વદ્ભવસિ સકલસ્યાપિ તપની
પ્રચણ્ડા શક્તિઃ સત્યખિલભુવનેશસ્ય તપતઃ ।
સુધાંશોર્જ્યોત્સ્નેવ પ્રમદયસિ ચેતઃ પ્રવિશતો
ભવન્તી ભૂતાદેર્દહરકુહરં મોદલહરી ॥ ૨૭.૧૭॥

પ્રચણ્ડા ગૌરી વા ત્વમસિ વસુરુદ્રાર્કવિનુતે
સ ભીમઃ શમ્ભુર્વા વિભુરભયદઃ પાદસુહૃદામ્ ।
તયોરેકં રૂપં તવ સહવિભોઃ ખેલતિ મહ-
ત્યમુષ્મિન્નાકાશે ધવલમહસિ ક્રીડતિ પરમ્ ॥ ૨૭.૧૮॥

વિભક્તા યા દ્વેધા ત્વમસિ ગગને શીતમહસ-
સ્તથા રમ્યે બિમ્બે જ્વલિતલલિતસ્ત્રીતનુવિધા ।

તયોર્બ્રૂહીશાને જનનિ કતમા મે જનનભૂઃ
પુરાજન્મન્યાસીદ્વિકટમથવોગ્રૈવ સુષુવે ॥ ૨૭.૧૯॥

દૃશોર્ભેદાદ્ દૃષ્ટેર્ન ભવતિ ભિદા કાઽપિ કરયોર્-
ન ભેદાદ્ભિન્નં સ્યાત્કૃતમભિવિમાનૈક્યવશતઃ ।
ભિદા તન્વોરેવં ન ભવતિ ભિદાયૈ તવ શિવે
વિયદ્દેશે ચણ્ડ્યાં સિતમહસિ ગૌર્યાં ચ ભવતિ ॥ ૨૭.૨૦॥

તવ ચ્છિન્નં શીર્ષં વિદુરખિલધાત્ર્યાગમવિદો
મનુષ્યાણાં મસ્તે બહુલતપસા યદ્વિદલિતે ।
સુષુમ્નાયાં નાડ્યાં તનુકરણસમ્પર્કરહિતા
બહિશ્શક્ત્યા યુક્તા વિગતચિરનિદ્રા વિલસસિ ॥ ૨૭.૨૧॥

ઉતાહો તન્વઙ્ગ્યાં ભૃગુકુલવિધાત્ર્યાં પિતૃગિરા
તનૂજેનચ્છિન્ને શિરસિ ભયલોલાક્ષિ નલિને ।
ન્યધાસ્તેજો ભીમં નિજમયિ યદક્ષુદ્રમનઘં
તદાહુસ્ત્વામમ્બ પ્રથિતચરિતે કૃત્તશિરસમ્ ॥ ૨૭.૨૨॥

હુતં ધારાજ્વાલાજટિલચટુલે શસ્ત્રદહને
તપસ્વિન્યાઃ કાયં ભગવતિ યદાઽમ્બ ત્વમવિશઃ ।
તદા તસ્યાઃ કણ્ઠપ્રગલદસૃજઃ કૃત્તશિરસઃ
કબન્ધેન પ્રાપ્તો ભુવનવિનુતઃ કોઽપિ મહિમા ॥ ૨૭.૨૩॥

નિધેસ્ત્વત્તો હૃત્વા ભગવતિ ન લજ્જે ભુવિ સૃજન્
રસક્ષોણીર્વાણીસ્ત્વદમલયશસ્સૌરભજુષઃ ।
નૃપોધાનાત્સૂનોત્કરમપહરન્ ભક્તિનટનં
વિતન્વાનસ્તસ્મૈ મુહુરુપહરઁત્સેવક ઇવ ॥ ૨૭.૨૪॥

દધાનાસ્સન્તોષં મનસિ સુકવીનામતિતરાં
દદાનાઃ પ્રત્યગ્રં વિબુધસદસે ભાવમલઘુમ્ ।
કુલાનામુત્સાહં સપદિ વિદધાનાશ્શિવવધૂ-
પરાણાં શોભન્તાં જગતિ શિખરિણ્યો ગણપતેઃ ॥ ૨૭.૨૫॥ 675

---

અષ્ટાવિંશઃ સ્તબકઃ

રેણુકાદિવર્ણનમ્ (વસન્તતિલકાવૃત્તમ્)

અન્તર્વલક્ષપરિધિભ્રમમાદધાનો
વક્ત્રસ્ય પૂર્ણતુહિનદ્યુતિમણ્ડલસ્ય ।
હાસઃ કરોતુ ભવતાં પરમં પ્રમોદં
શુદ્ધાન્તપઙ્કજદૃશઃ પ્રમથેશ્વરસ્ય ॥ ૨૮.૧॥

સમ્મોહનાનિ તુહિનાંશુકલાધરસ્ય
સઞ્જીવનાનિ સરસીરુહસાયકસ્ય ।
સન્દીપનાનિ વિનતેષુ જનેષુ શક્તેઃ
સંહર્ષણાનિ મમ સન્તુ શિવાસ્મિતાનિ ॥ ૨૮.૨॥

પાપાનિ મે હરતુ કાચન કૃત્તશીર્ષા
માતા પદામ્બુજભુજિષ્યવિતીર્ણહર્ષા ।
યા ભક્તલોકવરદાનવિધૌ વિનિદ્રા
વાસં કમણ્ડલુધુનીપુલિને કરોતિ ॥ ૨૮.૩॥

ષષ્ઠાવતારજનનાવનિરેકવીરા
ભીમા ધુનોતુ દુરિતાનિ ગણાધિપસ્ય ।
યા ભક્તરક્ષણવિધાવતિજાગરૂકા
પુણ્યે કમણ્ડલુધુનીપુલિને ચકાસ્તિ ॥ ૨૮.૪॥

છેદાય ચેદ્ ગતરજા મુનિરાદિદેશ
ચિચ્છેદ ચેદ્બહુગુણસ્તનયઃ સવિત્રીમ્ ।
દાહ્યં શરીરમખિલપ્રભુરીશશક્તિઃ
યદ્યાવિવેશ ચ કથા પરમાદ્ભુતેયમ્ ॥ ૨૮.૫॥

પુત્રઃ પ્રિયસ્તવ શિરઃ સહસા ચકર્ત
કૃત્તા ચ હર્ષભરિતા ભવતી નનર્ત ।
નો તસ્ય પાપમપિ નો તવ કાઽપિ હાનિઃ
નાશોઽસ્ય હા ભુજભુવામભવદ્વિપાકઃ ॥ ૨૮.૬॥

અમ્બૈવ સા સુરભિર્જુનભૂપતિર્યાં
વીર્યાજ્જહાર સ ચ ભાર્ગવ આજહાર ।
તસ્યા હતેઃ પરગૃહસ્થિતિરેવ હેતુઃ
ગન્ધર્વદર્શનકથા રિપુકલ્પિતૈવ ॥ ૨૮.૭॥

છિન્નાનિ નો કતિ શરીરભૃતાં શિરાંસિ
તત્પૂજ્યતે જગતિ રૈણુકમેવ શીર્ષમ્ ।

કૃત્તાઃ કલેવરવતાં કતિ નાભયો ન
ચેતો ધિનોતિ સુરભિર્મૃગનાભિરેકઃ ॥ ૨૮.૮॥

પ્રાણા વસન્તિ શિરસા રહિતે શરીરે
લીલાસરોજતિ શિરસ્તુ કરેઽસ્ય કૃત્તમ્ ।
તન્નિઘ્નમેતદખિલં ચ ધિયૈવ ધીરાઃ
પશ્યન્તુ નન્દનગરે તદિદં વિચિત્રમ્ ॥ ૨૮.૯॥

પ્રાણેશ્વરી વિધિપુરે લસતઃ પુરારે-
રઙ્ગીકરોતુ શરણાગતિમમ્બિકા મે ।
લબ્ધં નિપીય યદુરોરુહકુમ્ભદુગ્ધં
સમ્બન્ધમૂર્તિરભવત્કવિચક્રવર્તી ॥ ૨૮.૧૦॥

અપ્રાપ્ય લોકરચનાવનપાતનેષુ
યસ્યાસ્ત્રયોઽપિ પુરુષાઃ કરુણાકટાક્ષમ્ ।
નૈવેશતે કિમપિ સા જગદેકમાતા
ભદ્રા પરા પ્રકૃતિરસ્ત્વઘનાશિની નઃ ॥ ૨૮.૧૧॥

રાકા પ્રબોધશશિનો હૃદયોદયસ્ય
નૌકા વિપજ્જલનિધૌ પતતાં જનાનામ્ ।
વેદધ્વજસ્ય લલિતા ત્રિરુચિઃ પતાકા
કાચિન્મમાસ્તુ શરણં શિવમૂલટીકા ॥ ૨૮.૧૨॥

મૌલૌ મહેન્દ્રસુદૃશસ્સુમનોનિકાય-
સંશોભિતે સદસિ માન્ય ઇવાભિજાતઃ ।
રેણુશ્ચ યચ્ચરણભૂર્લભતેઽગ્રપીઠં
ત્રાણાય સા ભવતુ ભૂતપતેર્વધૂર્નઃ ॥ ૨૮.૧૩॥

અમ્બાવૃણોતિ પરિતોઽપ્યયમન્ધકારો
નાત્માનમેવ મમ કિં તુ કુલં ચ દેશમ્ ।
શીઘ્રં મદીયહૃદયોદયપર્વતાગ્રે
શ્રીમાનુદેતુ તવ પાદમયૂખમાલી ॥ ૨૮.૧૪॥

કષ્ટં ધુનોતુ મમ પર્વતપુત્રિકાયાઃ
પ્રત્યગ્રપઙ્કરુહબાન્ધવકાન્તિકાન્તમ્ ।
અમ્ભોરુહાસનમુખામરમૌલિરત્ન-
જ્યોતિર્વિશેષિતગુણં ચરણારવિન્દમ્ ॥ ૨૮.૧૫॥

જ્યાશિઞ્જિતાનિ સમરે ગિરિશં જિગીષોઃ
કામસ્ય હંસનિવહસ્ય નિમન્ત્રણાનિ ।
ધુન્વન્તુ મે વિપદમદ્રિકુમારિકાયાઃ
પાદારવિન્દકટકક્વણિતાનિ તાનિ ॥ ૨૮.૧૬॥

યઃ સર્વલોકમથનં મહિષં જિગાય
યસ્યૈવ કર્મ દમનં ચ તદન્તકસ્ય ।
નારીનરાકૃતિભૃતો મહસસ્તમઙ્ઘ્રિં
મઞ્જીરનાદમધુરં શરણં વ્રજામિ ॥ ૨૮.૧૭॥

આપન્મહોગ્રવિષરાશિનિમગ્નમેતં
દીનં ત્વદીયચરણં શરણં પ્રપન્નમ્ ।
ઉદ્ધર્તુમમ્બ કરુણાપરિપૂર્ણચિત્તે
વિત્તેશમિત્રકુલનારિ તવૈવ ભારઃ ॥ ૨૮.૧૮॥

લોકાધિરાજ્ઞિ પતિતં વિપદન્ધકૂપે
સંરુદ્ધદૃષ્ટિમભિતસ્તિમિરચ્છટાભિઃ ।
માતઃ સમુદ્ધર કૃપાકલિતે મૃડાનિ
પુત્રં કરેણ જગતામભયઙ્કરેણ ॥ ૨૮.૧૯॥

અસ્ય ત્વદીયપદપઙ્કજકિઙ્કરસ્ય
દુર્ભાગ્યપાકવિફલીકૃતપૌરુષસ્ય ।
પ્રાણેશ્વરિ પ્રમથલોકપતેરુપાયં
વીક્ષસ્વ તારણવિધૌ નિપુણે ત્વમેવ ॥ ૨૮.૨૦॥

મૃત્યુઞ્જયોરુમણિપીઠતટે નિષણ્ણે
તાટઙ્કકાન્તિબહુલીકૃતગણ્ડશોભે ।
માણિક્યકઙ્કણલસત્કરવારિજાતે
જાતે કુલાચલપતેર્જહિ પાતકં નઃ ॥ ૨૮.૨૧॥

કિં તે વપુર્જનનિ તપ્તસુવર્ણગૌરં
કામારિમોહિનિ કિમિન્દુકલાવલક્ષમ્ ।
પાકારિનીલમણિમેચકકાન્ત્યુતાહો
બન્ધૂકપુષ્પકલિકારુચિ વા સ્મરામિ ॥ ૨૮.૨૨॥

ત્વં સુન્દરી નૃપતિજાતિજિતસ્ત્વમમ્બા

ધૂમાવતી ત્વમજરે ભુવનેશ્વરી ત્વમ્ ।
કાલી ત્વમીશ્વરિ શુકાર્ભકધારિણી ત્વં
તારા ત્વમાશ્રિતવિપદ્દલનાસિધારા ॥ ૨૮.૨૩॥

ત્વં ભૈરવી ભગવતી બગલામુખી ત્વં
રામા ચ સા કમલકાનનચારિણી ત્વમ્ ।
કૈલાસવાસિનયનામૃતભાનુરેખે
કો વેદ તે જનનિ જન્મવતાં વિભૂતીઃ ॥ ૨૮.૨૪॥

ધુન્વન્તુ સર્વવિપદઃ સુકૃતપ્રિયાણાં
ધુન્વન્તુ ચાખિલસુખાન્યઘલાલસાનામ્ ।
આવર્જ્ય ભૂરિકરુણં પુરજિત્તરુણ્યા-
શ્ચિત્તં વસન્તતિલકાઃ કવિભર્તુરેતાઃ ॥ ૨૮.૨૫॥ 700

॥ સમાપ્તં ચ સપ્તમં શતકમ્ ॥

---

અષ્ટમં શતકમ્

એકોનત્રિંશઃ સ્તબકઃ

નવવિધભજનમ્ (મદલેખાવૃત્તમ્)

આયુષ્યા ભુવનાનાં ચક્ષુષ્યાસ્ત્રિપુરારેઃ ।
કુર્વન્તુ પ્રમદં નઃ પાર્વત્યાઃ સ્મિતલેશાઃ ॥ ૨૯.૧॥

નાત્યર્ઘાણિ નિરર્થં નેતવ્યાનિ દિનાનિ ।
અમ્બાયાશ્ચરિતાનિ શ્રોતવ્યાન્યનઘાનિ ॥ ૨૯.૨॥

ઉદ્યોગં કુરુ જિહ્વે સંહર્તું દુરિતાનિ ।
પૂતાન્યદ્રિસુતાયાઃ કીર્ત્યન્તાં ચરિતાનિ ॥ ૨૯.૩॥

શ્રીસક્તિર્વિનિવાર્યા ચિન્તા કાઽપિ ન કાર્યા ।
નિત્યં ચેતસિ ધાર્યા દીનાનાં ગતિરાર્યા ॥ ૨૯.૪॥

જ્ઞાતું યા ગદિતું યા શ્રોતું યા શ્વસિતું યા ।
દ્રષ્ટું યાઽન્તરશક્તિસ્તિષ્ઠાત્ર સ્મૃતિરેષા ॥ ૨૯.૫॥

વિભ્રાજીનશતાભં બિભ્રાણં શિરસીન્દુમ્ ।
સ્મર્તવ્યં જગદમ્બારૂપં વા ધુતપાપમ્ ॥ ૨૯.૬॥

યેષાં સ્યાત્પરિતપ્તં પ્રાયશ્ચિત્તમઘેન ।
રુદ્રાણીપદસેવા પ્રાયશ્ચિત્તમમીષામ્ ॥ ૨૯.૭॥

તદ્દીપ્તં પદયુગ્મં સેવે યત્ર ભવન્તિ ।
અઙ્ગુલ્યો દશ ભાનોર્ભાનૂનાં શતકાનિ ॥ ૨૯.૮॥

નો ચેત્ કુપ્યસિ કિઞ્ચિદ્ યાચે વાચમતીતે ।
સેવાં માતરુરીકુર્વિષ્ટં મે કુરુ મા વા ॥ ૨૯.૯॥

શર્વાણીચરણાર્ચાપીઠં પીવરકાણામ્ ।
વધ્યસ્થાનમિદં સ્યાદુગ્રાણાં દુરિતાનામ્ ॥ ૨૯.૧૦॥

સ્કન્દામ્બાપદપીઠસ્પૃષ્ટં ચેદ્દલમાપ્તમ્ ।
એકૈકં સુમમંહસ્વેકૈકં કુલિશં સ્યાત્ ॥ ૨૯.૧૧॥

અમ્ભોજોપમમઙ્ઘ્રિં શમ્ભોઃ પટ્ટમહિષ્યાઃ ।
અંહસ્સંહતિમુગ્રાં સંહર્તું પ્રણમામઃ ॥ ૨૯.૧૨॥

યે કાલીપદવેષં નાલીકં પ્રણમન્તિ ।
નૈષાં કિઞ્ચિદશક્યં નાલીકં મમ વાક્યમ્ ॥ ૨૯.૧૩॥

વાસસ્તેઽત્ર સમાપ્તઃ પઙ્કેતો વ્રજ દૂરમ્ ।
કાલીં શઙ્કરનારીં કાલેઽસ્મિન્ પ્રણમામઃ ॥ ૨૯.૧૪॥

આશા રે તદવસ્થા ભૂભાગનટતસ્તે ।
કામાનાં ક્વ નુ પારઃ કામારેર્નમ નારીમ્ ॥ ૨૯.૧૫॥

ધન્યાસ્તે તુહિનાદ્રેઃ કન્યાં યે પ્રણમન્તિ ।
અન્યાનુન્નતશીર્ષાન્ મન્યે વન્યલુલાયાન્ ॥ ૨૯.૧૬॥

પાદામ્ભોજમુમાયાઃ પ્રાજ્ઞાસ્સમ્પ્રણમન્તઃ ।
ગૃહ્ણન્તિ શ્રિયમસ્મિન્ રાજન્તીં નિજશક્ત્યા ॥ ૨૯.૧૭॥

મન્દારાદ્રિસુતાઙ્ઘ્રી દાતારૌ સદૃશૌ સ્તઃ ।
ઉત્કણ્ઠૈઃ ફલમાદ્યાદન્યસ્માન્નતકણ્ઠૈઃ ॥ ૨૯.૧૮॥

કાલસ્યાપિ વિજેતુઃ શર્વાણ્યાશ્ચરણસ્ય ।
એષોઽહં કવિલોકક્ષ્માપાલોઽસ્મિ ભુજિષ્યઃ ॥ ૨૯.૧૯॥

રક્તે દર્શય રાગઃ રુદ્રાણીપદપદ્મે ।
ચેતઃ પુષ્યતિ શોભાં સારસ્સારવતોઽગ્રે ॥ ૨૯.૨૦॥

સંશોધ્યાગમજાલં સારાંશં પ્રવદામઃ ।
સ્કન્દામ્બાપદભક્તિર્ભુક્ત્યૈ ચાથ વિમુક્ત્યૈ ॥ ૨૯.૨૧॥

વાત્સલ્યં ગતિહીનેષ્વાયુષ્યં સુકૃતસ્ય ।
ભૂયોભિઃ સહ સખ્યં શ્રીહેતુષ્વિહ મુખ્યમ્ ॥ ૨૯.૨૨॥

શ્લાઘ્યં પુષ્યતિ કામં પ્રેમા સ્વપ્રમદાયામ્ ।
શર્વાણીપદભક્તિર્નિત્યાય પ્રમદાય ॥ ૨૯.૨૩॥

એકૈવં બહુભેદા ભિન્નત્વાદ્વિષયાણામ્ ।
રત્યાખ્યા દ્રુતિરન્તઃ સા સૂતે ફલભેદાન્ ॥ ૨૯.૨૪॥

હર્ષં કઞ્ચન માતુર્મત્તો ભક્તિભરેણ ।
તન્વન્નેષ વિધત્તાં હેરમ્બો મદલેખાઃ ॥ ૨૯.૨૫॥ 725

---

ત્રિંશઃ સ્તબકઃ

માનસપૂજા (પ્રમાણિકાવૃત્તમ્)

કૃતેન સા નિસર્ગતો ધૃતેન નિત્યમાનને ।
સિતેન શીતશૈલજા સ્મિતેન શં તનોતુ મે ॥ ૩૦.૧॥

પ્રતિક્ષણં વિનશ્વરાનયે વિસૃજ્ય ગોચરાન્ ।
સમર્ચયેશ્વરીં મનો વિવિચ્ય વિશ્વશાયિનીમ્ ॥ ૩૦.૨॥

વિશુદ્ધદર્પણેન વા વિધારિતે હૃદાઽમ્બ મે ।
અયિ પ્રયચ્છ સન્નિધિં નિજે વપુષ્યગાત્મજે ॥ ૩૦.૩॥

પુરસ્ય મધ્યમાશ્રિતં સિતં યદસ્તિ પઙ્કજમ્ ।
અજાણ્ડમૂલ્યમસ્તુ તે સુરાર્ચિતે તદાસનમ્ ॥ ૩૦.૪॥

અખણ્ડધારયા દ્રવન્નવેન્દુશેખરપ્રિયે ।
મદીયભક્તિજીવનં દધાતુ તેઽમ્બ પાદ્યતામ્ ॥ ૩૦.૫॥

વિવાસનૌઘમાનસપ્રસાદતોયમમ્બ મે ।
સમસ્તરાજ્ઞિ હસ્તયોરનર્ઘમર્ઘ્યમસ્તુ તે ॥ ૩૦.૬॥

મહેન્દ્રયોનિચિન્તનાદ્ ભવન્ભવસ્ય વલ્લભે ।
મહારસો રસસ્ત્વયા નિપીયતાં વિશુદ્ધયે ॥ ૩૦.૭॥

સહસ્રપત્રપઙ્કજદ્રવત્સુધાજલેન સા ।
સહસ્રપત્રલોચના પિનાકિનોઽભિષિચ્યતે ॥ ૩૦.૮॥

મમાર્જિતં યદિન્દ્રિયૈઃ સુખં સુગાત્રિ પઞ્ચભિઃ ।
તદમ્બ તુભ્યમર્પિતં સુધાખ્યપઞ્ચકાયતામ્ ॥ ૩૦.૯॥

વસિષ્ઠગોત્રજન્મના દ્વિજેન નિર્મિતં શિવે ।
ઇદં શરીરમેવ મે તવાસ્તુ દિવ્યમંશુકમ્ ॥ ૩૦.૧૦॥

વિચિત્રસૂક્ષ્મતન્તુભૃન્મમેયમાત્મનાડિકા ।
સુખપ્રબોધવિગ્રહે મખોપવીતમસ્તુ તે ॥ ૩૦.૧૧॥

મહદ્ભિચિન્વતો મમ સ્વકીયતત્ત્વવિત્તિજમ્ ।
ઇદં તુ ચિત્તસૌરભં શિવે તવાસ્તુ ચન્દનમ્ ॥ ૩૦.૧૨॥

મહેશનારિનિઃશ્વસઁસ્તથાઽયમુચ્છ્વસઁસ્તદા ।
તવાનિશં સમર્ચકો મમાસ્તુ જીવમારુતઃ ॥ ૩૦.૧૩॥

વિપાકકાલપાવકપ્રદીપ્તપુણ્યગુગ્ગુલુઃ ।
સુવાસનાઢ્યધૂપભૃદ્ ભવત્વયં મમામ્બ તે ॥ ૩૦.૧૪॥

ગુહાવતારમૌનિના મયીશ્વરિ પ્રદીપિતા ।
ઇયં પ્રબોધદીપિકા પ્રમોદદાયિકાઽસ્તુ તે ॥ ૩૦.૧૫॥

ઇમામયિ પ્રિયાત્પ્રિયાં મહારસામહઙ્કૃતિમ્ ।
નિવેદયામિ ભુજ્યતામિયં ત્વયા નિરામયે ॥ ૩૦.૧૬॥

સરસ્વતી સુધાયતે મનો દધાતિ પૂગતામ્ ।
હૃદેવ પત્રમમ્બિકે ત્રયં સમેત્ય તેઽર્પ્યતે ॥ ૩૦.૧૭॥

વિનીલતોયદાન્તરે વિરાજમાનવિગ્રહા ।
નિજાવિભૂતિરસ્તુ તે તટિલ્લતા પ્રકાશિકા ॥ ૩૦.૧૮॥

સ્વરોઽયમન્તરમ્બિકે દ્વિરેફવત્સ્વરઁસ્તદા ।
મમાભિમન્ત્ર્ય ધીસુમં દદાતિ દેવિ તેઽઙ્ઘ્રયે ॥ ૩૦.૧૯॥

તવાર્ચનં નિરન્તરં યતો વિધાતુમસ્મ્યહમ્ ।
ન વિશ્વનાથપત્નિ તે વિસર્જનં વિધીયતે ॥ ૩૦.૨૦॥

વિયોગ ઇન્દુધારિણા ન ચેહ વિશ્વનાયિકે ।

મદમ્બ સોऽત્ર રાજતે તટિલ્લતાશિખાન્તરે ॥ ૩૦.૨૧॥

ઇદં શરીરમેકકં વિભાવ્ય નવ્યમન્દિરમ્ ।
વિહારમત્ર સેશ્વરા ભવાનિ કર્તુમર્હસિ ॥ ૩૦.૨૨॥

જડેષ્વિવાલસેષ્વિવ પ્રયોજનં ન નિદ્રયા ।
વિહર્તુમેવ યાચ્યસે હૃદીશસદ્મરાજ્ઞિ મે ॥ ૩૦.૨૩॥

અયં તવાગ્રિમઃ સુતઃ શ્રિતો મનુષ્યવિગ્રહમ્ ।
તનૂજવેશ્મસૌષ્ઠવં મૃડાનિ પશ્ય કીદૃશમ્ ॥ ૩૦.૨૪॥

ગણેશિતુર્મહાકવેરસૌ પ્રમાણિકાવલી ।
મનોમ્બુજે મહેશ્વરીપ્રપૂજનેષુ શબ્દ્યતામ્ ॥ ૩૦.૨૫॥ 750

---

એકત્રિંશઃ સ્તબકઃ

નામવૈભવમ્ (ઉપજાતિવૃત્તમ્)

દરસ્મિતશ્રીકપટા સુપર્વ-
સ્રોતસ્વિની પર્વતજાસ્યજાતા ।
પઙ્કં મમ ક્ષાલયતાદશેષં
સંસારમગ્રે હૃદયે વિલગ્નમ્ ॥ ૩૧.૧॥

હરાટ્ટહાસેન સમં મિલિત્વા
પિત્રેવ પુત્રો ગુરુણેવ શિષ્યઃ ।
વિભ્રાજમાનો મમ શં કરોતુ
હાસાઙ્કુરઃ કેસરિવાહનાયાઃ ॥ ૩૧.૨॥

નમશ્શિવાયૈ ભણત દ્વિપાદો
યુષ્માકમગ્ર્યાં ધિષણાં દધત્યૈ ।
આધારચક્રેશિતુરમ્બિકાયૈ
બ્રહ્માણ્ડચક્રસ્ય વિધાયિકાયૈ ॥ ૩૧.૩॥

નદન્તિ ગાવોऽપિ વિશિષ્ટકાલે-
ષ્વમ્બેતિ યો નાહ્વયતે સ કિં ના ।
લક્ષ્યં પુનઃ પ્રાણવદસ્તુ સર્વં
સર્વસ્ય ચાન્તર્હિ પરાऽસ્તિ શક્તિઃ ॥ ૩૧.૪॥

આત્મન્ચ્યુતાન્યત્ર વિધાય લક્ષ્યં
તાં શક્તિમાદ્યામખિલેષુ સુપ્તામ્ ।
યાવત્પ્રબોધં મુહુરાહ્વયસ્વ
પ્રબુધ્યતે સા યદિ કિન્ન્વસાધ્યમ્ ॥ ૩૧.૫॥

યે નામ શાન્તિં પરમાં વહન્તો
નામાનિ શીતાચલપુત્રિકાયાઃ ।
સઙ્કીર્તયન્તો વિજને વસન્તિ
જયન્તતાતાદપિ તે જયન્તિ ॥ ૩૧.૬॥

નામાનિ સઙ્કીર્તયતાં જનાનાં
કારુણ્યવત્યાઃ કરિવક્ત્રમાતુઃ ।
પુનર્જનન્યા જઠરે નિવાસા-
દાયાસવત્તા ભવતીતિ મિથ્યા ॥ ૩૧.૭॥

પાપૈસ્સમન્તાત્સમભિદ્રુતોઽપિ
વિશ્વસ્ય તે વિક્રમમસ્મિ ધીરઃ ।
ન ચેદ્રસજ્ઞે ભવતી બ્રવીતિ
નામાનિ શીતાંશુભૃતો હતોઽહમ્ ॥ ૩૧.૮॥

દેહીતિ સમ્પલ્લવદર્પિતાનાં
દ્વારેષુ ઘોષં કુરુષે પરેષામ્ ।
ભવાનિ ભદ્રે ભુવનામ્બ દુર્ગે
પાહીતિ નાયાતિ કિમમ્બ જિહ્વે ॥ ૩૧.૯॥

વાક્યાનિ વક્તું યદિ તે રસજ્ઞે
રસોજ્જ્વલાનિ વ્યસનં ગરીયઃ ।
કિં વા નમોન્તાનિ સુધાં કિરન્તિ
નામાનિ નો સન્તિ કુમારમાતુઃ ॥ ૩૧.૧૦॥

યદ્ ગીયતે શૈલસુતાભિધાનં
તદેવ બોધ્યં સુકૃતં પ્રધાનમ્ ।
અજ્ઞાનિલોકસ્ય કૃતે ભણન્તિ
યજ્ઞાદિપુણ્યાનિ પરાણિ વિજ્ઞાઃ ॥ ૩૧.૧૧॥

સામ્ના પ્રયુક્તેન જગદ્વશે સ્યાત્
નામ્ના સદોક્તેન જગદ્વિનેત્રી ।

વેદોભયં સમ્યગિદં કૃતી યો
ભવે ભયં તસ્ય કુતોઽપિ ન સ્યાત્ ॥ ૩૧.૧૨॥

સઙ્કીર્તનાત્તુષ્યતિ શર્વયોષા
તુષ્ટા ત્વભીષ્ટં ન દદાતિ નૈષા ।
ઇમં ત્વવિજ્ઞાય જગત્યુપાયં
બ્રજન્ત્યપાયં બહુધા મનુષ્યાઃ ॥ ૩૧.૧૩॥

ભાષે ભુજઙ્ગાભરણપ્રિયાયા
નામાનિ કામાનિતરાન્ વિહાય ।
અપિ પ્રપઞ્ચાતિગઘોરકૃત્યં
કરોતુ કિં માં તરણેરપત્યમ્ ॥ ૩૧.૧૪॥

યજ્ઞેન દાનૈઃ કઠિનવ્રતૈર્વા
સિદ્ધિં ય ઇચ્છેત્સ ગ્રહીતુમિચ્છેત્ ।
માતુઃ શયાનોઽઙ્કુતલે શશાઙ્કં
મહેશ્વરીં કીર્તયતસ્તુ સિદ્ધિઃ ॥ ૩૧.૧૫॥

રહસ્યતન્ત્રાણિ વિવિચ્ય દૂરં
વ્યાજં વિમુચ્ય પ્રવદામિ સારમ્ ।
નામૈવ કામારિપુરન્ધ્રિકાયાઃ
સિદ્ધેર્નિદાનં ન મખો ન દાનમ્ ॥ ૩૧.૧૬॥

પીયૂષમીષન્મધુરં ભણન્તિ
યે નામ રામાધરપાનલોલાઃ ।
કામારિરામાહ્વયગાનલોલાઃ
કવીશ્વરાઃ કાઞ્જિકમાલપન્તિ ॥ ૩૧.૧૭॥

સુધાઘટઃ કોઽપ્યધરો વધૂનાં
કવિસ્સુધાતોયધરોઽભિધેયઃ ।
અયં સુધાવીચિવિતાનમાલી
નામપ્રણાદો નગકન્યકાયાઃ ॥ ૩૧.૧૮॥

સુરાલયે ભાતિતરાં સુધૈકા
સુધા પરા વાચિ મહાકવીનામ્ ।
બિમ્બાધરે કઞ્જદૃશાં સુધાઽન્યા
સુધેતરા નામનિ લોકમાતુઃ ॥ ૩૧.૧૯॥

માધુર્યમાભાત્યધરે વધૂનાં
ચકોરબન્ધોઃ શકલે પ્રસાદઃ ।
ત્રિસ્રોતસો વારિણિ પાવનત્વં
ત્રયં ચ નામ્નિ ત્રિપુરામ્બિકાયાઃ ॥ ૩૧.૨૦॥

યા માધુરી પ્રેમભરેણ દષ્ટે
જાગર્તિ કાન્તાવરદન્તચેલે ।
સા દૃશ્યતે ભક્તિભરેણ ગીતે
ધરાધરાધીશસુતાભિધાને ॥ ૩૧.૨૧॥

યત્તે જગલ્લમ્પટકેઽપિ વર્ણા-
સ્તન્મેઽમૃતં નામ નગાત્મજાયાઃ ।
લાલામયો યો મમ તં બ્રવીષિ
સુધામયં સ્ત્રીદશનચ્છદં ત્વમ્ ॥ ૩૧.૨૨॥

ઉચ્ચારયોચ્ચાટિતપાતકાનિ
નામાનિ જિહ્વે ભુવનસ્ય માતુઃ ।
તદા વદામો મધુચૂતરમ્ભા-
રામાધરાસ્તે રુચયે યદિ સ્યુઃ ॥ ૩૧.૨૩॥ ॥ ॥ @@773 ॥ ॥

આક્ષેપમિક્ષોરધિકં વિધત્તે
પીયૂષદોષાનભિતોઽભિધત્તે ।
કાન્તાધરારબ્ધદુરન્તવાદઃ
કપર્દિકાન્તાવરનામનાદઃ ॥ ૩૧.૨૪॥

વિશ્વાસહીનૈઃ સુતરામબોધ્યં
નામાનુભાવં નગકન્યકાયાઃ ।
જયન્તુ સિદ્ધૈરપિ ગીયમાનં
ગાયન્ત્ય એતા ઉપજાતયો નઃ ॥ ૩૧.૨૫॥ 775

દ્વાત્રિંશઃ સ્તબકઃ
ભક્તિર્યોગશ્ચ (આર્યાગીતિવૃત્તમ્)

વિદધાતુ સમ્પદં મે

સકલજગન્નાથનયનહારિજ્યોત્સ્નઃ ।
શીતોઽન્ધકારહારી
હાસશશી કશ્ચિદઙ્કુરહિતો માતુઃ ॥ ૩૨.૧॥

કરુણારસાર્દ્રહૃદયા
હૃદયાન્તરનિર્યદચ્છવીચિસ્મેરા ।
પ્રમથેશ્વરપ્રિયતમા
પાદપ્રેષ્યસ્ય ભવતુ કલ્યાણય ॥ ૩૨.૨॥

કારણકાર્યવિભેદાદ્
રૂપદ્વિતયં તવામ્બ યદૃષિપ્રોક્તમ્ ।
તત્રૈકં ભર્તુમિદં
વિહર્તુમન્યત્તુ ભુતભર્તુર્લલને ॥ ૩૨.૩॥

શ્રોતું સ્તોત્રવિશેષં
ભક્તવિશેષં ચ બોદ્ધુમયમીદૃગિતિ ।
દાતું ચ વાઞ્છિતાર્થં
તવ માતશ્ચન્દ્રલોકરૂપં ભવતિ ॥ ૩૨.૪॥

કીશકિશોરન્યાયાત્
કારણરૂપં તવામ્બ યોગી ધત્તે ।
ઓતુકિશોરન્યાયાદ્
ભક્તં પરિપાસિ કાર્યરૂપેણ ત્વમ્ ॥ ૩૨.૫॥

દૃઢધારણા ન ચેત્ત્વ-
ય્યવતે યોગી મહેશનયનજ્યોત્સ્ને ।
નાયં મમેતિ ભાવ-
સ્તવ યદિ સદ્યઃ સવિત્રિ ભક્તં ત્યજસિ ॥ ૩૨.૬॥

શિથિલધૃતિર્યોગી સ્યાદ્
બાહ્યૈર્વિષયૈર્નિતાન્તમાકૃષ્ટો યઃ ।
સ્વીયમતિર્લુપ્યતિ તે
ભક્તેઽહન્તાપ્રસારકલુષે માતઃ ॥ ૩૨.૭॥

સાહઙ્કૃતિર્ન ભક્તિઃ
સબાહ્યવિષયા ધૃતિર્ન સર્વેશ્વરિ તે ।
અવિજાનન્તાવેતદ્

ભક્તો યોગી ચ નૈવ સિદ્ધૌ સ્યાતામ્ ॥ ૩૨.૮॥

વ્યક્તિત્વાદપિ યસ્ય
પ્રિયં ત્વદીયં સવિત્રિ પાદામ્ભોજમ્ ।
સોઽદ્ભુતશક્તિર્ભક્તો
ભગવતિ કિં કિં કરોતિ નાસ્મિન્ જગતિ ॥ ૩૨.૯॥

વ્યક્તિત્વલોભવિવશે
સિદ્ધઃ કામોઽપિ ભવતિ સમવચ્છિન્નઃ ।
પ્રાપ્તોઽપિ સલિલરાશિં
સલિલાનિ ઘટઃ કિયન્તિ સઙ્ગૃહ્ણીયાત્ ॥ ૩૨.૧૦॥

જીવન્નેવ નરો યઃ
સાયુજ્યં તે પ્રયાતિ શમ્ભોઃ પ્રમદે ।
સર્વે કામાસ્તસ્ય
પ્રયાન્તિ વશમાશુ વીતવિવિધભ્રાન્તેઃ ॥ ૩૨.૧૧॥

વ્યક્તિત્વં તુભ્યમિદં
મનીષયા મે પ્રદત્તમધિકારિણ્યા ।
બહુકાલભોગબલતો
વિવદતિ દેહો મદમ્બ કિં કરવાણિ ॥ ૩૨.૧૨॥

સ્થૂલેન વર્ષ્મણા સહ
સૂક્ષ્મા કલહં મતિર્ન કર્તું શક્તા ।
સુતરાં બલવતિ માતર્-
બલાદ્ ગૃહાણ સ્વયં ત્વમસ્માત્સ્વીયમ્ ॥ ૩૨.૧૩॥

સર્વેષાં હૃદિ યસ્માત્-
ત્વમસિ પ્રાણાત્મિકામ્બ હેતોસ્તસ્માત્ ।
અખિલપ્રાણ્યારાધન-
મારાધનનિર્વિશેષમગપુત્રિ તવ ॥ ૩૨.૧૪॥

જુહ્વતિ કેઽપિ કૃશાનૌ
તસ્માત્પ્રાપ્તિસ્તવેતિ સમ્પશ્યન્તઃ ।
અપરે પ્રાણિષુ જુહ્વતિ
સાક્ષાત્પ્રાણાત્મિકાઽસિ તેષ્વન્તરિતિ ॥ ૩૨.૧૫॥

પ્રાણિષ્વપિ યઃ પ્રાણં
ભૂતાદિમનાદિમાત્મનિ સ્થિતમનઘમ્ ।
સતતમુપાસ્તે યોગી
તસ્મિન્ હોમેન તેઽમ્બ તૃપ્તિસ્સુલભા ॥ ૩૨.૧૬॥

આત્મનિ યોઽમ્બ શ્રેષ્ઠે
પ્રાણે પ્રાણાન્ જુહોતિ દહરાભિમુખઃ ।
ત્વદ્રૂપે હતપાપે
તેન જિતં સકલમીશચિત્તારામે ॥ ૩૨.૧૭॥

ઉપસંહૃતમખિલેભ્યો
વિષયેભ્યો નિર્નિમેષમન્તઃકૃષ્ટમ્ ।
હૃદિ દૃઢપદેન ચક્ષુ-
સ્ત્વદ્રૂપે હૂયતે મદમ્બ પ્રાણે ॥ ૩૨.૧૮॥

અન્તસ્સ્વરં નિગૂઢં
શ્રેષ્ઠપ્રાણસ્ય દેવિ તવ ભાગસ્ય ।
શ઼ૃણ્વદિવ પ્રણવાખ્યં
શ્રવણં તત્રૈવ ભવતિ જગદમ્બ હુતમ્ ॥ ૩૨.૧૯॥

સર્વેષાં મન્ત્રાણાં
સ્તોત્રાણાં ચેશચિત્તનાથે પ્રકૃતૌ ।
ગૂઢં સદા સ્વરન્ત્યાં
પ્રાણન્ત્યાં ત્વયિ જુહોતિ મૌની વાચમ્ ॥ ૩૨.૨૦॥

દેહે સ્ખલતિ મનશ્ચેત્
વિષયેષુ હુતં દધાતિ વિષયાત્મત્વમ્ ।
આવૃત્તં યદિ દેહાદ્
સૂક્ષ્માયાં ત્વયિ હુતં ત્વદાકૃતિ ભવતિ ॥ ૩૨.૨૧॥

ત્વગ્રસનઘ્રાણાના-
મનુભૂતીઃ પ્રાણશક્તિસાત્કુર્વાણઃ ।
કં નાર્પયતે ભોગં
ભગવતિ તે સર્વલોકપાર્થિવવનિતે ॥ ૩૨.૨૨॥

ગચ્છન્ કુર્વન્ વિસૃજન્
રમમાણાશ્ચામ્બ સકલલોકાધીશે ।

યઃ કેવલાં ક્રિયામપિ
ચિન્તયતે તેન નિત્યયજ્ઞઃ ક્રિયતે ॥ ૩૨.૨૩॥

સર્વેષામગ્નીનાં
પ્રાણાગ્નિસ્તવ વિભૂતિરુક્તઃ શ્રેષ્ઠઃ ।
તસ્મિન્હુતં તુ સુહુતં
દ્રવ્યાણિ ધિયઃ ક્રિયાશ્ચ મન્ત્રઃ પ્રણવઃ ॥ ૩૨.૨૪॥

આર્યાગીતીનામય-
મધરીકૃતમધુસુધાધિમાધુર્યરસઃ ।
વર્ગો ગણપતિવદના-
ન્નિષ્ક્રાન્તો ભવતુ શર્વસુદૃશઃ પ્રીત્યૈ ॥ ૩૨.૨૫॥ 800

॥ સમાપ્તં ચ અષ્ટમં શતકમ્ ॥

---

નવમં શતકમ્
ત્રયસ્ત્રિંશઃ સ્તબકઃ
જપો યોગોઽર્પણં ચ (વંશસ્થવૃત્તમ્)

સુધાં કિરન્તોઽખિલતાપહારિણીં
તમો હરન્તઃ પટલેન રોચિષામ્ ।
શ્રિયં દિશન્તો દિશિ દિશ્યસઙ્ખ્યાં
જયન્તિ શીતાદ્રિસુતાસ્મિતાઙ્કુરાઃ ॥ ૩૩.૧॥

કૃપાકટાક્ષસ્તવ કેન વાઽઽપ્યતે
મહેશશુદ્ધાન્તપુરન્ધ્રિ કર્મણા ।
નિરન્તરં મન્ત્રજપેન વા મતેર્-
વિશોધનેનોત મનોર્પણેન વા ॥ ૩૩.૨॥

વિશોધનાદ્દેવિ મતેઃ પ્રગૃહ્યસે
મનોર્પણેનેશવધુ પ્રસીદસિ ।
જપેન મન્ત્રસ્ય શુભસ્ય વર્ધસે
જગત્ત્રયીધાત્રિ કલેવરાન્તરે ॥ ૩૩.૩॥

મનઃપ્રતાપસ્ય ભવત્યસંશયં
પ્રવર્ધનં વૈદિકમન્ત્રચિન્તનમ્ ।

પ્રશસ્યતે પ્રાણમહઃપ્રદીપને
દયાન્વિતે તાન્ત્રિકમન્ત્રસેવિતા ॥ ૩૩.૪॥

તવામ્બિકે તાન્ત્રિકમન્ત્રમુત્તમં
સ્તવાતિગં યઃ કનકાઙ્ગિ સેવતે ।
વિચિત્રયન્ત્રાદિવ વૈદ્યુતં મહ-
સ્તતો વિનિર્યદ્ ભુવનં વિગાહતે ॥ ૩૩.૫॥

ન તસ્ય ચેતો વિકૃતેર્વશે ભવે-
ન્ન તસ્ય દૃષ્ટિર્વિષયૈર્વિકૃષ્યતે ।
ન તસ્ય રોગૈરપકૃષ્યતે વપુઃ
સવિત્રિ યસ્તે ભજતે મહામનુમ્ ॥ ૩૩.૬॥

સ્મરન્તિ માયાં ગગનાગ્નિશાન્તિભિઃ
સહાચ્છભાસા સહિતાભિરમ્બિકે ।
તથા રસજ્ઞાં દ્રુહિણાગ્નિશાન્તિભિર્-
ભણન્તિ દોગ્ધ્રીં તુ ખષષ્ઠબિન્દુભિઃ ॥ ૩૩.૭॥

અભણ્યતાદ્યા ભુવનેશ્વરી બુધૈર્-
અનન્તરા માતરગાદિ કાલિકા ।
પ્રચણ્ડચણ્ડી પરિકીર્તિતા પરા
ત્રયોઽપ્યમી તે મનવો મહાફલાઃ ॥ ૩૩.૮॥

ઉપાધિભૂતં શુચિ નાભસં રજો
દધાતિ સાક્ષાદ્ ભુવનેશ્વરીપદમ્ ।
તદાશ્રયા વ્યાપકશક્તિરદ્ભુતા
મનસ્વિની કાચન કાલિકેરિતા ॥ ૩૩.૯॥

અમર્ત્યસામ્રાજ્યભૃતઃ પ્રવર્તિકા
વિશાલલોકત્રયરઙ્ગનર્તિકા ।
પરાક્રમાણામધિનાયિકોચ્યતે
પ્રચણ્ડચણ્ડીતિ કલા સવિત્રિ તે ॥ ૩૩.૧૦॥

સ્મરન્મનું રોદિતિ ભક્તિમાંસ્તવ
પ્રગૃહ્ય પાદં મુનિરમ્બ લમ્બતે ।
ફલં ચિરાય પ્રથમઃ સમાપ્નુયાત્
પરો મરન્દં પદ એવ વિન્દતિ ॥ ૩૩.૧૧॥

પદં તવાન્વિષ્ટમનેકદા મુદા
હૃદન્તરે સ્પૃષ્ટમિવેદમમ્બિકે ।
પલાયતેऽધોऽહમનન્તરં શુચા
પરાત્પરે રોદિમિ મન્ત્રશબ્દતઃ ॥ ૩૩.૧૨॥

ભણન્તિ સન્તો મરુતાં સવિત્રિ તે
મહામનું ત્વત્પદભાસ્કરાતપમ્ ।
તતો હિ મૂલાત્સ્વર એષ નિર્ગત-
સ્તપત્યઘૌઘં જરયન્મહોમયઃ ॥ ૩૩.૧૩॥

સવિત્રિ સાક્ષાચ્ચરણસ્ય તે પ્રભાં
વિધારયઁસ્તજ્જનિમૂલમાર્ગણે ।
મુહુર્મુહુસ્સોऽહમજે ધૃતોદ્યમઃ
પથા મહર્ષી રમણો બભાણ યમ્ ॥ ૩૩.૧૪॥

અહમ્પદાર્થો યદિ ચિલ્લતા તતા
કિમેષ દોગ્ધ્રીમનુભાવતોऽપરઃ ।
અહં યદિ પ્રાણનિનાદવૈખરી
ન કૂર્ચ આખ્યાતુમસેતિ શક્યતે ॥ ૩૩.૧૫॥

પરે તુ યાં ચેતનશક્તિમામન-
ન્ત્યભાણિ સા કુણ્ડલિનીતિ તાન્ત્રિકૈઃ ।
વિલક્ષણા નામ ચમત્કૃતિર્જડાન્
પ્રતારયત્યાગમસારદૂરગાન્ ॥ ૩૩.૧૬॥

ભવત્યખણ્ડાનુભવઃ પ્રબોધિના-
મતીવ સૂક્ષ્માનુભવશ્ચ યોગિનામ્ ।
કરં ગતાસ્સર્વવિધાશ્ચ શેરતે
મહેશ્વરીમન્ત્રપરસ્ય સિદ્ધયઃ ॥ ૩૩.૧૭॥

સહસ્રસઙ્ખ્યાનિ જનૂંષિ વા મમ
પ્રિયાણિ ભક્તિસ્તવ ચેદ્ભવે ભવે ।
તવ સ્મૃતિં ચેદ્ ગલયેન્ન સમ્મદં
કરોતિ મોક્ષોऽપિ મમેશવલ્લભે ॥ ૩૩.૧૮॥

વિનૈવ દૃષ્ટિં યદિ સત્પ્રશિષ્યતે

ન સત્તયાઽર્થઃ ફલહીનયા તયા ।
ઇદં તુ સત્ કિન્ત્વસતો વિશિષ્યતે
ન તાત મુક્તોપલયોસ્તદા ભિદા ॥ ૩૩.૧૯॥

શુચાં નિવૃત્તિર્યદિ મુક્તિરિષ્યતે
સુખપ્રવૃત્તિર્યદિ નાત્ર વિદ્યતે ।
સદેવ ચેત્તત્ર મતિર્ન ભાસતે
જડં વિમુક્તાદ્દૃચસૈવ ભિદ્યતે ॥ ૩૩.૨૦॥

મતિઃ પરાચી વ્યવહારકારણં
ભવેત્પ્રતીચી પરમાર્થસમ્પદિ ।
ઉભે દિશૌ યસ્ય મતિર્વિગાહતે
પદા ચ મૂર્ધ્ના ચ સ સિદ્ધ ઇષ્યતે ॥ ૩૩.૨૧॥

દૃઢં પદં યસ્ય મતેઃ સદાઽન્તરે
સ ના ધિયોઽગ્રેણ બહિશ્ચરન્નપિ ।
સવિત્રિ મગ્નસ્ત્વયિ સમ્પ્રકીર્ત્યતે
ન તસ્ય ભીઃ સઞ્ચરતોઽપિ સંસૃતેઃ ॥ ૩૩.૨૨॥

વિચિન્તને ચિન્તનશક્તિમદ્ભુતાં
વિલોકને લોકનશક્તિમુજ્જ્વલામ્ ।
પ્રભાષણે ભાષણશક્તિમુત્તમાં
નિભાલયંસ્ત્વાં વિષયૈર્ન જીયતે ॥ ૩૩.૨૩॥

વિલોકમાનસ્ય વિલોકનં કવેર્-
વિલોક્યમાનેષુ વિહાય સક્તતામ્ ।
વિલોચને સન્નિહિતા નિરન્તરં
વિધૂતભીતિર્વિબુધસ્તુતા શિવા ॥ ૩૩.૨૪॥

અયં ભયાનાં પરિમાર્જકસ્સતાં
સમસ્તપાપૌઘનિવારણક્ષમઃ ।
મનોજ્ઞવંશસ્થગણો ગણેશિતુર્-
મનો મહેશાબ્જદૃશો ધિનોત્વલમ્ ॥ ૩૩.૨૫॥ 825

ચતુસ્ત્રિંશઃ સ્તબકઃ

પ્રાર્થના (હરિણીવૃત્તમ્)

વિદિતમહિમા વિશ્વાધાનાદનેકવિધાદ્ભુતાત્
પ્રથિતચરિતઃ શર્વાલોકપ્રતાપવિવર્ધનાત્ ।
પ્રકટિતગુણઃ પાપધ્વાન્તપ્રસારનિરોધનાત્
પ્રદિશતુ શિવાહાસો ભાસાં નિધિઃ કુશલાનિ મે ॥ ૩૪.૧॥

હૃદિ કરુણયા પૂર્ણા બાહ્વોર્બલેન મહીયસા
પદકમલયોર્લક્ષ્મ્યા ભક્તૈર્જનૈરુપજીવ્યયા ।
મુખસિતકરે લાવણ્યેન ત્રિણેત્રદૃશાં બલં
બહુ વિદધતા કાલી માતાઽવતાત્પદસેવિનમ્ ॥ ૩૪.૨॥

જગદધિપયા સિદ્ધં દોગ્ધ્યાઽથવોત રસજ્ઞયા
મુનિજનનુતં દેવીમન્ત્રં જપેદ્યદિ માનવઃ ।
અમૃતજલદીભૂતઃ પૂતઃ વિયોગવિશેષવિત્
સ ઇહ વસુધાલોકે ધારા ગિરામભિવર્ષતિ ॥ ૩૪.૩॥

ઇમમભિમુખીભૂતા શાતોદરી કમલાલયા
હયગજઘટાપૂર્ણાઽભ્યર્ણં સમેત્ય નિષેવતે ।
સવિબુધમિદં વિશ્વં તસ્ય પ્રયાતિ પુનર્વશં
પ્રથિતયશસાં સિદ્ધીનાં ચાપ્યમું ભજતેઽષ્ટકમ્ ॥ ૩૪.૪॥

સુવિમલધિયસ્તસ્ય ક્રોધાદ્ દૃગમ્બુધુતદ્યુતી
રિપુજનવધૂગણ્ડાભોગો ભવેદુત પાણ્ડુરઃ ।
સપદિ ભુવનવ્યાપ્તં ચાપ્તૈઃ પ્રમાણપુરસ્સરં
ભણિતમજરં ભદ્રં જ્યોતિઃ પરં હૃદિ ભાસતે ॥ ૩૪.૫॥

અદયમરિભિઃ ક્રાન્તે રાષ્ટ્રે ત્વમીશ્વરિ રક્ષિકા
સુમશરમુખૈર્ધૂતે ચિત્તે ત્વમીશ્વરિ રક્ષિકા ।
પ્રબલદુરિતૈર્ગ્રસ્તે વંશે ત્વમીશ્વરિ રક્ષિકા-
ઽપ્યસૃજતિ જલં મેઘે મોઘે ત્વમીશ્વરિ રક્ષિકા ॥ ૩૪.૬॥

ભગવતિ નિજૌ સાક્ષાત્પુત્રૌ બૃહસ્પતિપાવકૌ
ગણપતિગુહાવેતૌ વેષાન્તરવ્યવહારતઃ ।
ભરતધરણીખણ્ડે હેતોઃ કુતઃ કૃતસમ્ભવૌ
કલકલયુતે કાલી દેવિ વ્યધાઃ કથય દ્રુતમ્ ॥ ૩૪.૭॥

સમયમયિ તે ધૃત્વા પાદામ્બુજં રમણઃ સુતો
ગિરિવરગુહાસ્વન્તઃ શાન્તો નયેદ્યદિ નાદ્ભુતમ્ ।
સ્થલવિરહતઃ સ્વીયસ્થાને કિમત્ર સમાગતો
ન વદસિ કુતઃ કાર્યં તસ્મૈ કુલાચલકન્યકે ॥ ૩૪.૮॥

પરિભણતિ ચેચ્છિષ્યવ્યૂહે મહાદ્ભુતસઙ્ગતીર્-
જનનિ રમણો યોગીશાનસ્તતો બહુ નો ફલમ્ ।
અમિતતમયા દૃષ્ટેઃ શક્ત્યા કદા સરણિં નયે-
દપથપતિતં ધાત્રીલોકં તદેવ વદામ્બિકે ॥ ૩૪.૯॥

અહમિહ કુતો હેતોર્જાતો વિષણ્ણતમે સ્થલે
ચરણકમલચ્છાયાં માયાધિરાજ્ઞિ વિહાય તે ।
પરમકરુણો ઘોરઃ શાપઃ કિમેષ સવિત્રિ તે
કિમપિ ભુવિ વા કાર્યં કર્તું નિયોજિતવત્યસિ ॥ ૩૪.૧૦॥

વ્રજતિ વિલયં સ્નેહો દૂરપ્રવાસવશાદિતિ
પ્રવદતિ બુધઃ કશ્ચિત્સત્યં પ્રભાતિ તદમ્બિકે ।
ભગવતિ નિજે કુક્ષૌ જાતં દિવો ધરણીગતં
સ્મૃતિસરણિતો દૂરે હા હા કરોષિ રુષા યથા ॥ ૩૪.૧૧॥

મમ તુ વિમલા હૃદ્યા વિદ્યા મહેશ્વરિ યાઽભવ-
ન્મનસિ ચ પરા ચિત્રા શક્તિશ્ચિરન્તનિ યાઽભવત્ ।
વચસિ ચ મહદ્ભાગ્યં શ્લાઘ્યં યદીઽયતમેઽભવત્
તદયિ ગલિતં મત્તો વિત્તત્રયં ભવતો ભુવિ ॥ ૩૪.૧૨॥

કૃતમયિ મયા પાપં ઘોરં સુકર્મસુ સઙ્ગિનાં
યદહમદયો વિઘ્નં નૃણાં મુહુર્મુહુરાચરમ્ ।
અતિકટુ ફલં તસ્યાશ્નામિ શ્રિતો નરવિગ્રહં
પ્રમથનૃપતેર્જાયે માયે જનન્યવ મામિમમ્ ॥ ૩૪.૧૩॥

ન ભવસિ દૃશોર્માર્ગે લોકાધિરાજ્ઞિ કુતો ગિરો
ન ચ બહુકૃપે સ્વપ્ને વા ત્વં પ્રયચ્છસિ દર્શનમ્ ।
અપનયસિ નો સન્દેહં વા પરોક્ષકૃપાવશા-
દપિ સુરનુતે લગ્ના કાર્યાન્તરે કિમુતાદયા ॥ ૩૪.૧૪॥

નિરવધિશિવે માહાત્મ્યં તે ભણન્તિ મહર્ષયો
મનસિ કરુણા ન ન્યૂના તે યથા પ્રથિતાઃ કથાઃ ।

તદિદમખિલં મિથ્યા સ્યાદિત્યસાધ્યમુદીરિતું
યદસિ વિમુખી પુત્રે કિં વા ભવેદિહ કારણમ્ ॥ ૩૪.૧૫॥

ભુવનભરણં નાલ્પં કાર્યં ન દેવિ તવ ક્ષણો
ગુરુ ચ બહુલં કૃત્યં નિત્યં તવાસ્તિ ન તન્મૃષા ।
ન તવ કઠિનં મૌનં નિન્દ્યં તથાપિ ન પાર્વતિ
સ્મર સકૃદિમં દીનં પુત્રં તદેવ મમાધિકમ્ ॥ ૩૪.૧૬॥

ન ભવતિ સુધાધારાવર્ષાદયં મુદિતસ્તનૌ
મધુમદમુષાં વાચાં સર્ગાન્ન ચાપ્યયમુદ્ધતઃ ।
તવ પદયુગે નિષ્ઠાલાભાન્ન તૃપ્યતિ ચાપ્યયં
ભગવતિ ચિરાત્ સન્દેશં તે સુતઃ પ્રતિવીક્ષતે ॥ ૩૪.૧૭॥

કિમિહ ભુવને કર્તવ્યં મે કિમર્થમિહાગતો-
ઽસ્મ્યવનિ જગતાં કં વોપાયં શ્રયે નિજશક્તયે ।
કિમપિ કિમપિ સ્વાન્તે ધ્વાન્તે યથા પરિદૃશ્યતે
સ્ફુટમભયદે વક્તું કિઞ્ચિચ્છ્રમં ત્વમુરીકુરુ ॥ ૩૪.૧૮॥

ન મમ પરમે મુક્તાવાશા ન વા વિભવાષ્ટકે
ન ચ ગજઘટાપૂર્ણાયાં વા મહેશ્વરિ સમ્પદિ ।
ન ચ મધુમુચાં વાચાં સર્ગે નિરર્ગલવૈભવે
મુનિભુવિ કુતો જાતઃ સોઽહં તદેવ સમીર્યતામ્ ॥ ૩૪.૧૯॥

પ્રથમમનઘં વાઞ્છામ્યન્નં સદારસુતાતિથેર્-
ભગવતિ તતઃ પાદદ્વન્દ્વે તવાવિચલાં સ્થિતિમ્ ।
અથ સુરજગદ્વાર્તાજ્ઞાનં સવિત્રિ તતઃ પરં
મુનિભુવિ ભવે હેતું જ્ઞાતું મૃગાક્ષિ પુરદ્વિષઃ ॥ ૩૪.૨૦॥

યદિ તવ કૃપા પુત્રે ભક્તે પદાંબુજવન્દિનિ
વ્રતશતકૃશે શીર્ષામ્ભોજામૃતં ત્વયિ જુહ્વતિ ।
ભરતધરણીસેવાલોલે ભવપ્રિયભામિનિ
સ્વયમુપદિશામુષ્મૈ યોગ્યં વિધાનમનાવિલમ્ ॥ ૩૪.૨૧॥

જનનિ જગતાં સ્વલ્પે કામેઽપ્યયં ત્વયિ લમ્બતે
પુરભિદબલે મધ્યે કામેઽપ્યયં ત્વયિ લમ્બતે ।
બહુલકરુણે શ્રેષ્ઠે કામેઽપ્યયં ત્વયિ લમ્બતે
ભગવતિ પરે વીતે કામેઽપ્યયં ત્વયિ લમ્બતે ॥ ૩૪.૨૨॥

તનુભુવિ મયિ પ્રીત્યા વાઽમ્બ ત્રિલોકવિધાયિકે
પદયુગરતે વાત્સલ્યાદ્વા પુરારિપુરન્ધ્રિકે ।
સ્વવિમલયશોગાનાસક્તે કૃપાવશતોઽથવા
પરુષમજરે મૌનં ત્યક્ત્વા સ્ફુટીકુરુ મે ગતિમ્ ॥ ૩૪.૨૩॥

જયતુ ભરતક્ષોણીખણ્ડં વિષાદવિવર્જિતં
જયતુ ગણપસ્તસ્ય ક્ષેમં વિધાતુમના મુનિઃ ।
જયતુ રમણસ્તસ્યાચાર્યો મહર્ષિકુલાચલો
જયતુ ચ તયોર્માતા પૂતા મહેશવિલાસિની ॥ ૩૪.૨૪॥

ગણપતિમુનેરેષા ભાષાવિદાં હૃદયઙ્ગમા
સુકવિસુહૃદઃ શબ્દૈરત્યુજ્જ્વલા હરિણીતતિઃ ।
લલિતચતુરૈર્ભાવૈર્યાન્તી સુરૂપવનાન્તરં
મદયતુ મનઃ કામારાતેર્નિશાન્તમૃગીદૃશઃ ॥ ૩૪.૨૫॥ 850

---

પઞ્ચત્રિંશઃ સ્તબકઃ

પ્રાર્થના (ઇન્દુવદનાવૃત્તમ્)

અન્ધતમસં શશિવિભામભિદધાના
કાન્તિમલમાસ્યકમલસ્ય વિદધાના ।
અન્ધકવિરોધિદયિતાસ્મિતલવશ્રીર્-
ભાતુ ભુવનસ્ય સકલસ્ય કુશલાય ॥ ૩૫.૧॥

ભાહિ વિવિધા કૃતિમતી દ્વિજસમૂહે
પાહિ ગતિહીનમખિલેશ્વરિ કુલં નઃ ।
દેહિ બહુકાલભજકાય વરમેતં
યાહિ નગનન્દિનિ યશઃ શશિવલક્ષમ્ ॥ ૩૫.૨॥

વારયતિ ઘોરતરપાતકસમૂહં
વર્ધયતિ ધર્મમપિ શર્મકરમન્તે ।
કિઙ્કરજનસ્ય ન કિમાવહતિ ભવ્યં
શઙ્કરપુરન્ધ્રિ તવ પાદપરિચર્યા ॥ ૩૫.૩॥

યસ્ય મનુજસ્ય હૃદયેઽસ્તિ સદયે તે

નાકચરસેવ્યમયિ પાદસરસીજમ્ ।
તં ભજતિ પદ્મમુખિ પદ્મવનવાસા
લાભભવને ભવતુ નામરપુરોધાઃ ॥ ૩૫.૪॥

યદ્યખિલમૌનિગણગીતગુણજાલં
કાલભયહારિકરુણારસમરન્દમ્ ।
અદ્રિતનયાઙ્ઘ્રિજલજન્મ હૃદયે સ્યા-
દષ્ટમગતોઽપિ વિદધાતુ રવિજઃ કિમ્ ॥ ૩૫.૫॥

લેખલલનાકચસુમૈઃ કૃતબલિં તે
યો ભજતિ પાદઘૃણિમાલિનમનન્તે ।
નિસ્તરતિ નૂનમયમસ્તમિતમોહઃ
શોકતિમિરં સકલલોકગણમાતઃ ॥ ૩૫.૬॥

શીતકરદર્પહરવક્ત્રજલજાતે
શીતગિરિનન્દિનિ તવાઙ્ઘ્રિજલજાતમ્ ।
યઃ સ્મરતિ દેવિ હૃદિ વિસ્મરતિ સોઽયં
વિષ્ટપમશેષમપિ કષ્ટતતિમુક્તઃ ॥ ૩૫.૭॥

સક્તિરયિ યસ્ય તવ પાદસરસીજે
શક્તિધરમાતરનલાક્ષગૃહનાથે ।
પૂર્ણશશિજૈત્રમુખિ પુણ્યપુરુષોઽસૌ
સ્વર્ણશિખરીવ બુધલોકશરણં સ્યાત્ ॥ ૩૫.૮॥

વૈરિગણનિર્દલનખડ્ગવરપાણે
વાસસિ પદોર્દશનવાસસિ ચ શોણે ।
નેત્રમિષપાવકવિશેષિતલલાટે
પાપમખિલં જહિ મૃગાધિપતિઘોટે ॥ ૩૫.૯॥

વેદચયવેદિજનવાદવિષયસ્ય
પ્રતિયુતલોકતતિશોકશમનસ્ય ।
વેતનવિવર્જિતભટોઽયમહમઙ્ઘ્રેઃ
શીતકરપોતધરપુણ્યવનિતે તે ॥ ૩૫.૧૦॥

કાર્યમયિ મે કિમપિ કાર્યપટુબુદ્ધેઃ
પાદસરસીજયુગલીપરિજનસ્ય ।
અમ્બ વદ જમ્ભરિપુગીતગુણજાલે

શુમ્ભકુલનાશકરિ શમ્ભુકુલયોષે ॥ ૩૫.૧૧॥

ત્વં યદિ શિલાવદયિ નો વદસિ કૃત્યં
નાસ્તિ તવ રાજ્યપટુબુદ્ધિરિતિ સત્યમ્ ।
આદિશ યથાર્હકરણીયકૃતિનિત્યં
રાજ્ઞિ ભુવનસ્ય ચરણામ્બુરુહભૃત્યમ્ ॥ ૩૫.૧૨॥

પઞ્ચસુ વિહાય મનસઃ કમપિ સઙ્ગં
પુત્રધનમિત્રજનબાન્ધવવધૂષુ ।
એષ ભજતે જનનિ પાદજલજં તે
પાલય નુ મુઞ્ચ નુ તવોપરિ સ ભારઃ ॥ ૩૫.૧૩॥

વજ્રધરમુખ્યસુરસઞ્ચયકિરીટ-
સ્થાપિતમહાર્ઘમણિરઞ્જિતનખાય ।
જીવિતમદાયિ જગદીશ્વરિ મદીયં
પાદજલજાય તવ પાલય નુ મા વા ॥ ૩૫.૧૪॥

દેહિ જગદીશ્વરિ ન વા મદભિલાષં
પાહિ કરુણાવતિ ન વા કુલમિદં નઃ ।
શૂલધરકામિનિ સુરાસુરનિષેવ્યં
પાદકમલં તવ પરે ન વિજહામિ ॥ ૩૫.૧૫॥

પાસિ કિલ પાદયુગકિઙ્કરસમૂહં
હંસિ કિલ પાપતતિમાપદિ નુતા ત્વમ્ ।
દન્તિવદનપ્રસુ વદન્તિ મતિમન્તો
નાનૃતમિદં ભવતુ નાકિજનવર્ણ્યે ॥ ૩૫.૧૬॥

શક્રમુખદેવતતિવન્દિતવિસૃષ્ટે
વક્રઘનકેશિ ચરણે તવ લુઠન્તમ્ ।
આપદિ નિમગ્નમિમમાશ્રિતમનાથં
નન્દિહયસુન્દરિ ન પાલયસિ કેન ॥ ૩૫.૧૭॥

ઘોષમયમમ્બ વિદધાતિ પદલગ્નો
નાવસિ પુરાણિ કિમુ નારિ બધિરાઽસિ ।
વન્દિસુરવૃન્દનુતિભાષિતહૃતં વા
કર્ણયુગલં તવ કપાલિકુલયોષે ॥ ૩૫.૧૮॥

અમ્બ ભવ બિમ્બફલકલ્પરદચેલે
શમ્બરસપત્નબલકારિબહુલીલે ।
પ્રાગમૃતભાનુમુકુટસ્ય મદયિત્રી
તં કુરુ તતઃ પરમુરીકૃતમદર્થમ્ ॥ ૩૫.૧૯॥

નિર્મલસુધાકરકલાકલિતમસ્તે
ધર્મરતપાલિનિ દયાવતિ નમસ્તે ।
એતમવ દેવિ ચરણામ્બુરુહબન્ધું
શીતધરણીધરસુતે ગમય નાન્ધુમ્ ॥ ૩૫.૨૦॥

અદ્રિકુલપાલકકુલધ્વજપતાકે
ભદ્રગજગામિનિ દરિદ્રમયિ મત્યા ।
ક્ષુદ્રમિવ શોચ્યમિમમઙ્ઘ્રિજલજાપ્તં
રુદ્રદયિતે જનનિ પાહિ ન જહીહિ ॥ ૩૫.૨૧॥

અસ્તુ તવ પાદકમલે સ્થિતિરજસ્રં
નાસ્તિ પરદુઃખવિવશે હૃદિ તુ શાન્તિઃ ।
અસ્તુ કરુણેઽયમસ્તુ મતિલોપઃ
કષ્ટમિદમમ્બ મમ ભૂરિ પરિશિષ્ટમ્ ॥ ૩૫.૨૨॥

દુઃખસુખભેદરહિતા ન મતિરાસીત્
સાધુખલભેદરહિતા ન મતિરાસીત્ ।
ભાગ્યમિતિમાન્યમથવા મમ તદેતન્-
માતરિહ સઙ્ઘભજને યદવકાશઃ ॥ ૩૫.૨૩॥

અસ્તુ મમ ભેદમતિરસ્તુ મમ પક્ષો
યત્નપરતાઽસ્તુ મમ માસ્તુ ચ વિમોક્ષઃ ।
મોક્ષમયિ વેદ્મિ કુલકષ્ટતતિમોક્ષં
પ્રેષય સકૃત્તવ મહેશ્વરિ કટાક્ષમ્ ॥ ૩૫.૨૪॥

શાક્વરગણેન મુખરેઽત્ર ગણનાથે
વિષ્ણુયશસીશવધુ જિષ્ણુમુખવન્દ્યે ।
અમ્બ કરુણાં કુરુ શિવઙ્કરિ નિરઙ્ક-
સ્વચ્છકિરણાર્ભકવિભૂષિતલલાટે ॥ ૩૫.૨૫॥ 875

ષટ્ત્રિંશઃ સ્તબકઃ

પ્રકીર્ણકમ્ (તૂણકવૃત્તમ્)

ઉન્નતસ્તનસ્થલીવિલોલહારમૌક્તિક-
વ્રાતદીધિતિપ્રતાનબદ્ધસૌહૃદા સદા ।
અન્ધકારિકામિનીદરસ્મિતદ્યુતિર્ધુનો-
ત્વન્ધકારમન્તરઙ્ગવાસિનં ઘનં મમ ॥ ૩૬.૧॥

અમ્બરસ્થલે પુરા પુરન્દરો દદર્શ યાં
યાં વદન્તિ પર્વતપ્રસૂતિમૈતિહાસિકાઃ ।
સા પરા પુરામરેઃ પુરન્ધ્રિકાઽખિલામ્બિકા
પુત્રકાય મજ્જતે દદાતુ દક્ષિણં કરમ્ ॥ ૩૬.૨॥

પાદપઙ્કજે ધૃતા નરૈરબાહ્યભક્તિભિઃ
પાણિપઙ્કજે ધૃતા નવેન્દુખણ્ડધારિણા ।
ચારુહેમહંસકા મનોજ્ઞરત્નકઙ્કણા
લોકજાલપાલિની પુનાતુ માં વિલાસિની ॥ ૩૬.૩॥

ઉક્ષરાજવાહનસ્ય જીવિતાદ્ ગરીયસી
પક્ષિરાજવાહનાદિવર્ણ્યમાનવૈભવા ।
કેકિલોકચક્રવર્તિવાહનેન પુત્રિણી
વારણારિસાર્વભૌમવાહના ગતિર્મમ ॥ ૩૬.૪॥

બાલકુન્દકુટ્મલાલિકાન્તદન્તપઙ્ક્તિકા
કુણ્ડલાનુબિમ્બશોભિશુદ્ધગણ્ડમણ્ડલા ।
બિભ્રતી રતીશવેત્રવિભ્રમં ભ્રુવોર્યુગં
શુભ્રભાનુશેખરસ્ય સુન્દરી પ્રણમ્યતે ॥ ૩૬.૫॥

આજિદક્ષવાહવૈરિયાતુધાનબાધિતં
યા રરક્ષ દેવવૃન્દમિન્દિરાદિવન્દિતા ।
સા કટાક્ષપાતધૂતભક્તલોકપાતકા
પાવકાક્ષસુન્દરી પરાત્પરા ગતિર્મમ ॥ ૩૬.૬॥

તારકાધિનાથચૂડચિત્તરઙ્ગનર્તકી
મન્દહાસસુન્દરાસ્યપઙ્કજા નગાત્મજા ।
દીનપોષકૃત્યનિત્યબુદ્ધબુદ્ધિરવ્યયા
ગૃહ્યતે ગણાધિપેન સર્વતો નૃણાં પદે ॥ ૩૬.૭॥

અષ્ટમીશશાઙ્કખણ્ડદર્પભઞ્જનાલિકા
વિષ્ટપત્રયાધિનાથમાનસસ્ય ડોલિકા ।
પાપપુઞ્જનાશકારિપાદકઞ્જધૂલિકા
શ્રેયસે મમાસ્તુ શૈલલોકપાલબાલિકા ॥ ૩૬.૮॥

સાનુમત્કુલાધિનાથબાલિકાલિકુન્તલા
જઙ્ગમેવ કાઽપિ તપ્તહેમસાલભઞ્જિકા ।
ભક્તિયુક્તલોકશોકવારણાય દીક્ષિતા
શીતશીતવીક્ષિતા લઘુ સ્યતાદઘં મમ ॥ ૩૬.૯॥

પુણ્યનામસંહતિઃ પુરારિચિત્તમોહિની
પુષ્પબાણચાપચારુઝિલ્લિકાઽખિલામ્બિકા ।
પુણ્યવૈરિપુષ્ટદુષ્ટદૈત્યવંશનાશિની
પુત્રકસ્ય રક્ષણં પુરાતની કરોતુ મે ॥ ૩૬.૧૦॥

ક્ષામમધ્યમસ્થલી સુધાઘટોપમસ્તની
કૃષ્ણસારલોચના કુમુદ્વતીપ્રિયાનના ।
ભ્રૂવિલાસધૂતધૈર્યકાઞ્ચનાદ્રિકાર્મુકા
કાચિદિક્ષુકાર્મુકસ્ય જીવિકા જયત્યુમા ॥ ૩૬.૧૧॥

લોહિતાચલેશ્વરસ્ય લોચનત્રયીહિતા
લોહિતપ્રભાનિમજ્જદબ્જજાણ્ડકન્દરા ।
હાસકાન્તિવર્ધ્યમાનસારસારિમણ્ડલા
વાસમત્ર મે કરોતુ માનસે મહેશ્વરી ॥ ૩૬.૧૨॥

દક્ષિણેક્ષણપ્રભાવિજૃમ્ભિતામ્બુસમ્ભવા
કામમિત્રવામનેત્રધામતૃપ્તકૈરવા ।
એકતઃ પરઃ પુમાન્પરા વરાઙ્ગનાઽન્યતઃ
શુભ્રકીર્તિરેકમૂર્તિરાદધાતુ નશ્શિવમ્ ॥ ૩૬.૧૩॥

શુમ્ભદૈત્યમારિણી સુપર્વહર્ષકારિણી
શમ્ભુચિત્તહારિણી મુનીન્દ્રચિત્તચારિણી ।
કામિતાર્થદાયિની કરિપ્રકાણ્ડગામિની
વીતકલ્કમાદધાતુ વિઘ્નરાજમમ્બિકા ॥ ૩૬.૧૪॥

દેવતાસપત્નવંશકાનનાનલચ્છટા

વારણારિસાર્વભૌમવાહના ઘનાલકા ।
નન્દિવાહનસ્ય કાઽપિ નેત્રનન્દિની સુધા
નેત્રલાઞ્છિતાલિકા સુતં પુનાતુ કાલિકા ॥ ૩૬.૧૫॥

રાજસુન્દરાનના મરાલરાજગામિની
રાજમૌલિવલ્લભા મૃગાધિરાજમધ્યમા ।
રાજમાનવિગ્રહા વિરાજમાનસદ્ગુણા
રાજતે મહીધરે મદમ્બિકા વિરાજતે ॥ ૩૬.૧૬॥

પર્વચન્દ્રમણ્ડલપ્રભાવિડમ્બનાનના
પર્વતાધિનાથવંશપાવની સનાતની ।
ગર્વગન્ધનાશિની વિભાવરીવિચારિણાં
શર્વચિત્તનાયિકા કરોતુ મઙ્ગલં મમ ॥ ૩૬.૧૭॥

ઓજસશ્ચ તેજસશ્ચ જન્મભૂમિરચ્યુતા
નીલકઞ્જબન્ધુબદ્ધમૌલિરાગમસ્તુતા ।
વીતરાગપાશજાલનાશબદ્ધકઙ્કણા
વિશ્વપાલિની મયા મહેશ્વરી વિચિન્ત્યતે ॥ ૩૬.૧૮॥

અણ્ડમણ્ડલં યયા નિરન્તરં ચ પચ્યતે
સંસ્ફુરત્યશેષભૂતહાર્દપીઠિકાસુ યા ।
શ્વાસદૃષ્ટિસંવિદૂષ્મનાદવારિવર્ત્મભિર્-
યામુપાસતે વિદો નમામિ તાં પરાત્પરામ્ ॥ ૩૬.૧૯॥

પઞ્ચયુગ્મવેષભૃત્પરાત્પરા સુરાર્ચિતા
પઞ્ચવક્ત્રવક્ત્રપદ્મચઞ્ચરીકલોકના ।
વઞ્ચકાન્તરઙ્ગશત્રુસઞ્ચયપ્રણાશિની
પ્રેતમઞ્ચશાયિની કુલં ચિરાય પાતુ મે ॥ ૩૬.૨૦॥

કર્મણા યથાવિધિ દ્વિજાતયો યજન્તિ યાં
બ્રહ્મણા યથાશ્રુતં સ્તુવન્તિ યામધીતિનઃ ।
ચેતસા યથા ગુરૂક્તિ ચિન્તયન્તિ યાં વિદઃ
સા પરા જગત્ત્રયીજનન્યજા જયત્યુમા ॥ ૩૬.૨૧॥

વાસુદેવજાયયા વિનમ્રયા નિષેવિતા
વામદેવચાટુચિત્રવાક્યબન્ધલાલિતા ।
વાસવાદિદેવતાજયપ્રણાદહર્ષિતા

વારયત્વઘાનિ મે વસુન્ધરાભૃતસ્સુતા ॥ ૩૬.૨૨॥

પૂર્ણિમાસુધામરીચિસુન્દરાસ્યમણ્ડલા
ફુલ્લપદ્મપત્રદીર્ઘસમ્પ્રસન્નલોચના ।
પુણ્યભૂનિષેવણાય પુત્રમેતમુદ્યતં
પૂર્ણકામમાદધાતુ પાદલગ્નમમ્બિકા ॥ ૩૬.૨૩॥

લાલયન્તિ બાલકં વતંસશીતદીધિતિં
શીલયન્તિ સૂક્ષ્મતાં મનાંસિ યોગિનામિવ ।
કાલયન્તુ પાપિનાં કુલાનિ સંહતીસ્સતાં
પાલયન્તુ ચ સ્મિતાનિ યોષિતઃ પુરદ્વિષઃ ॥ ૩૬.૨૪॥

પાદસેવિનઃ કવેર્મનોહરાતિશક્વરી-
વર્ગ એષ નાટ્યકારિનિર્જરીગણો યથા ।
લોકજાલચક્રવર્તિપુણ્યયોષિતો મન-
સ્સમ્મદાય સાધુકષ્ટવારણાય કલ્પતામ્ ॥ ૩૬.૨૫॥ 900

॥ સમાપ્તં ચ નવમં શતકમ્ ॥

---

દશમં શતકમ્

સપ્તત્રિંશઃ સ્તબકઃ

તત્ત્વવિચારઃ (અનુષ્ટુબ્વૃત્તમ્)

ઉદ્દીપયતુ નશ્શક્તિમાદિશક્તેર્દરસ્મિતમ્ ।
તત્ત્વં યસ્ય મહસ્સૂક્ષ્મમાનન્દો વેતિ સંશયઃ ॥ ૩૭.૧॥

પૂર્ણં પ્રજ્ઞાતૃ સદ્બ્રહ્મ તસ્ય જ્ઞાનં મહેશ્વરી ।
મહિમા તેજ આહોસ્વિચ્છક્તિર્વા પ્રાણ એવ વા ॥ ૩૭.૨॥

પ્રચક્ષતે ચિદાત્મત્વં જ્ઞાતુર્જ્ઞાનસ્ય ચોભયોઃ ।
પ્રદીપસ્ય પ્રભાયાશ્ચ જ્યોતિરાકૃતિતાં યથા ॥ ૩૭.૩॥

ચિત એકપદાર્થત્વાચ્ચિચ્ચિતા ન વિશિષ્યતે ।
તસ્માદ્ ગુણત્વં જ્ઞાનસ્ય શઙ્કરેણ નિરાકૃતમ્ ॥ ૩૭.૪॥

જ્ઞાતુર્જ્ઞાનં સ્વરૂપં સ્યાન્ન ગુણો નાપિ ચ ક્રિયા ।
યદિ સ્વસ્ય સ્વરૂપેણ વૈશિષ્ટ્યમનવસ્થિતિઃ ॥ ૩૭.૫॥

વાચૈવ શક્યતે કર્તું વિભાગસ્સ્વસ્વરૂપયોઃ ।
નાનુભૂત્યા તતો દ્વૈતં સચ્છક્ત્યોર્વ્યાવહારિકમ્ ॥ ૩૭.૬॥

બ્રહ્મજ્ઞાનસ્ય પૂર્ણસ્ય વિષયો દ્યૌરુદીર્યતે ।
સા બ્રહ્મણો વ્યાપકત્વાદ્વસ્તુતો નાતિરિચ્યતે ॥ ૩૭.૭॥

વિકાસાદપિ સઙ્કોચાત્ સર્ગપ્રલયયોર્દ્વયોઃ ।
પ્રજ્ઞાનસ્ય બુધૈરુક્તૌ જન્મનાશાવુભૌ દિવઃ ॥ ૩૭.૮॥

ધર્મભૂતં પરસ્યેદં ન કાર્યં પરમં નભઃ ।
અખણ્ડત્વાન્ન વિકૃતિર્વિશ્વસ્મિન્નપ્રકૃતિત્વતઃ ॥ ૩૭.૯॥

આકાશે પરમે દીપ્યત્ પ્રજ્ઞાનં પરમાત્મનઃ ।
એકાગ્રત્વાત્પ્રવૃદ્ધોષ્મગભીરમભવન્મહઃ ॥ ૩૭.૧૦॥

ત્રિધૈવં ધર્મભૂતસ્ય જ્ઞાનસ્ય વિકૃતિં વિના ।
શુદ્ધત્વવિષયત્વાભ્યાં મહસ્ત્વાચ્ચ દશાત્રયમ્ ॥ ૩૭.૧૧॥

વિજ્ઞાને ભાતિ યે ભાન્તિ ભાવા દ્રવ્યગુણાદયઃ ।
ન કિઞ્ચિદનુભૂયન્તે વિજ્ઞાનોપરમે તુ તે ॥ ૩૭.૧૨॥

એવં સ્વતઃ પ્રકાશત્વં વિષયાણાં ન દૃશ્યતે ।
સિદ્ધિશ્ચ પરતો ન સ્યાત્ સમ્બન્ધં કઞ્ચિદન્તરા ॥ ૩૭.૧૩॥

દૃશ્યતે વિષયાકારા ગ્રહણે સ્મરણે ચ ધીઃ ।
પ્રજ્ઞાવિષયતાદાત્મ્યમેવં સાક્ષાત્પ્રદૃશ્યતે ॥ ૩૭.૧૪॥

ન ચેત્સમષ્ટિવિજ્ઞાનવિભૂતિરખિલં જગત્ ।
વિષયવ્યષ્ટિવિજ્ઞાનતાદાત્મ્યં નોપપદ્યતે ॥ ૩૭.૧૫॥

યથાઽસ્મદાદિવિજ્ઞાને ધ્યેયં બુદ્ધિરિતિ દ્વયમ્ ।
પૂર્ણે સમષ્ટિવિજ્ઞાને વિકૃતિઃ પ્રકૃતિસ્તથા ॥ ૩૭.૧૬॥

પરિણામો યથા સ્વપ્નઃ સૂક્ષ્મસ્ય સ્થૂલરૂપતઃ ।
જાગ્રત્પ્રપઞ્ચ એષ સ્યાત્તથેશ્વરમહાચિતઃ ॥ ૩૭.૧૭॥

વિકૃતિસ્સર્વભૂતાનિ પ્રકૃતિઃ પરદેવતા ।
સતઃ પાદસ્તયોરાદ્યા ત્રિપાદી ગીયતે પરા ॥ ૩૭.૧૮॥

કબલીકૃત્ય સઙ્કલ્પાનેકાઽપિ સ્યાદ્યથા મતિઃ ।
ભૂતાનિ કબલીકૃત્ય દેવતાઽપિ તથા પરા ॥ ૩૭.૧૯॥

ભૂતાનામાત્માનસ્સર્ગે સંહૃતૌ ચ તથાઽઽત્મનિ ।
પ્રભવેદ્દેવતા શ્રેષ્ઠા સઙ્કલ્પાનાં યથા મતિઃ ॥ ૩૭.૨૦॥

અનુભૂત્યાત્મિકા સેયમીશશક્તિઃ પરાત્પરા ।
આધારચક્રે પિણ્ડેષુ વિરાજતિ વિભિન્નવત્ ॥ ૩૭.૨૧॥

સૂક્ષ્મસ્થૂલે તતઃ શાખે વિદ્યુચ્છક્તિસમીરવત્ ।
તત્રાદ્યા જ્ઞાનશક્તિસ્સ્યાત્ ક્રિયાશક્તિરનન્તરા ॥ ૩૭.૨૨॥

જ્ઞાનેન્દ્રિયાણિ પ્રથમા વિભૂતિર્મનસા સહ ।
કર્મેન્દ્રિયાણિ ત્વપરા વિભૂતિસ્સહસા સહ ॥ ૩૭.૨૩॥

ક્રિયામૂલમુત જ્ઞાનમૂલં કિમિતિ ચિન્તયન્ ।
આત્મશક્તિમિતો વિદ્વાનમૃતત્વાય કલ્પતે ॥ ૩૭.૨૪॥

ગભીરાસ્સુતરામેતાઃ કાલિકાતત્ત્વકારિકાઃ ।
ધિયો ભાસો ગણપતેર્ભવન્તુ વિદુષાં મુદે ॥ ૩૭.૨૫॥ 925

અષ્ટત્રિંશઃ સ્તબકઃ

દશમહાવિદ્યાઃ (પાદાકુલકવૃત્તમ્)

દૂરીકુરુતાદ્ દુઃખં નિખિલં દુર્ગાયાસ્તદ્દરહસિતં નઃ ।
રચિતાસ્યામ્ભોમૃદ્ભ્યાં યદભુલ્લેપનમમલં બ્રહ્માણ્ડસ્ય ॥ ૩૮.૧॥

જન્તૌ જન્તૌ ભુવિ ખેલન્તિ ભૂતે ભૂતે નભસિ લસન્તી ।
દેવે દેવે દિવિ દીપ્યન્તી પૃથગિવ પૂર્ણા સંવિજ્જયતિ ॥ ૩૮.૨॥

દહરસરોજાદ્ દ્વિદલસરોજં દ્વિદલસરોજાદ્દશશતપત્રમ્
દશશતપત્રાદ્દેહં દેહાત્ સકલં વિષયં સંવિદ્ વ્રજતિ ॥ ૩૮.૩॥

વહ્નિજ્વાલા સમિધમિવૈષા સકલં દેહં સંવિત્પ્રાપ્તા ।
પૃથગિવ ભૂતા વ્યપગતવીર્યા ભવતિ સધૂમા સંસારાય ॥ ૩૮.૪॥

અત્રાનુભવસ્સુખદુઃખાનામત્રાહઙ્કૃતિરનૃતા ભવતિ ।
અત્રૈવેદં સકલં ભિન્નં પ્રતિભાસેત પ્રજ્ઞાસ્ખલને ॥ ૩૮.૫॥

દશશતપત્રાદ્ દ્વિદલસરોજં દ્વિદલસરોજાદ્દહરસરોજમ્ ।
અવતરતીશા યેષામેષા તેષામન્તર્નિત્યા નિષ્ઠા ॥ ૩૮.૬॥

અથવા દેહાદાવૃત્તસ્સન્નન્યતમસ્યામાસુ સ્થલ્યામ્ ।
આધારસ્થે કુલકુણ્ડે વા સ્થિતધીર્નિત્યાં નિષ્ઠાં લભતે ॥ ૩૮.૭ ॥

દશશતપત્રે શક્તિર્લલિતા વજ્રવતી સા દ્વિદલસરોજે ।
દહરામ્બુરુહે ભદ્રા કાલી મૂલાધારે ભૈરવ્યાખ્યા ॥ ૩૮.૮ ॥

ખેલતિ લલિતા દ્રવતિ સ્થાને છિન્નગ્રન્થિનિ રાજત્યૈન્દ્રી ।
બદ્ધકવાટે ભદ્રા કાલી તપસા જ્વલિતે ભૈરવ્યાખ્યા ॥ ૩૮.૯ ॥

યદ્યપિ કાલીવજ્રેશ્વર્યૌ સ્યાતાં ભિન્ને ઇવ પિણ્ડેષુ ।
ઓજસ્તત્ત્વસ્યૈક્યાદણ્ડે ન દ્વૌ શક્તેર્ભેદૌ ભવતઃ ॥ ૩૮.૧૦ ॥

એવમભેદો યદ્યપિ કર્મદ્વૈધાત્ દ્વૈધં તત્રાપિ સ્યાત્ ।
સૈવ પચન્તી ભુવનં કાલી સૈવ દહન્તી શત્રૂનૈન્દ્રી ॥ ૩૮.૧૧ ॥

પિણ્ડે ચાણ્ડે જઙ્ગમસારઃ શુદ્ધા પ્રજ્ઞા સુન્દર્યુક્તા ।
વિષયદશાયાં દેશીભૂતા સેયં ભુવનેશ્વર્યાખ્યાતા ॥ ૩૮.૧૨ ॥

શૂન્યપ્રખ્યા યા ચિલ્લીના પ્રલયે બ્રહ્મણિ જન્મિષુ સુપ્તૌ
કબલિતસકલબ્રહ્માણ્ડાં તાં કવયઃ શ્રેષ્ઠાં જ્યેષ્ઠામાહુઃ ॥ ૩૮.૧૩ ॥

નિદ્રાવિસ્મૃતિમોહાલસ્યપ્રવિભેદૈસ્સા ભવમગ્નેષુ ।
એષૈવ સ્યાદ્યુઞ્જાનેષુ ધ્વસ્તવિકલ્પઃ કોઽપિ સમાધિઃ ॥ ૩૮.૧૪ ॥

ઐન્દ્રી શક્તિર્વ્યક્તબલા ચેદ્ ભિન્ને સ્યાતાં શીર્ષકપાલે ।
તસ્માદેતાં ચતુરવચસ્કાઃ પરિભાષન્તે છિન્નશિરસ્કામ્ ॥ ૩૮.૧૫ ॥

ભવતિ પરા વાગ્ભૈરવ્યાખ્યા પશ્યન્તી સા કથિતા તારા ।
રસનિધિમાપ્તા જિહ્વારઙ્ગં માતઙ્ગીતિ પ્રથિતા સેયમ્ ॥ ૩૮.૧૬ ॥

પિણ્ડે ચાણ્ડે સ્તમ્ભનશક્તિર્બગલા માત્રસ્તવ મહિમૈકઃ ।
સર્વે વ્યક્તાઃ કિરણાઃ કમલા બાહ્યો મહિમા ભુવનામ્બ તવ ॥ ૩૮.૧૭ ॥

બોધે બોધે બોદ્ધુશ્શક્તિં સઙ્કલ્પાનાં પશ્ચાદ્ભાન્તીમ્ ।
અવિમુઞ્ચન્યો મનુતે ધીરો યત્કિઞ્ચિદ્વા લલિતાઽવતિ તમ્ ॥ ૩૮.૧૮ ॥

દૃષ્ટૌ દૃષ્ટૌ દ્રષ્ટુશ્શક્તિં લોચનમણ્ડલમધ્યે ભાન્તીમ્ ।
અવિમુઞ્ચન્યઃ પશ્યતિ ધીરો યત્કિઞ્ચિદ્વા તમવત્યૈન્દ્રી ॥ ૩૮.૧૯ ॥

પ્રાણસમીરં વિદધાનમિમં નિત્યાં યાત્રામત્ર શરીરે ।

ચરણે ચરણે પરિશીલયતિ સ્થિરદૃષ્ટિર્યસ્તમવતિ કાલી ॥ ૩૮.૨૦॥

સ્થૂલવિકારાન્ પરિમુઞ્ચન્ત્યા નિર્મલનભસિ સ્થિતયા દૃષ્ટ્યા ।
મજ્જન્ત્યા વા દહરાકાશે લોકેશ્વર્યાઃ કરુણાં લભતે ॥ ૩૮.૨૧॥

સર્વવિકલ્પાન્ પરિભૂયાન્તર્વિમલં મૌનં મહદવલમ્બ્ય ।
કેવલમેકસ્તિષ્ઠતિ યોઽન્તસ્તં સા જ્યેષ્ઠા કુરુતે મુક્તમ્ ॥ ૩૮.૨૨॥

મૂલે સ્થિત્યા ભૈરવ્યાખ્યાં તારાં દેવીમુદ્ગીથેન ।
સેવેતાર્યો વિદિતરહસ્યો માતઙ્ગીં તાં ગુણગાનેન ॥ ૩૮.૨૩॥

આસનબન્ધાદચલો ભૂત્વા રુદ્ધપ્રાણો બગલાં ભજતે ।
અભિતો વ્યાપ્તં વ્યક્તં તેજઃ કલયન્ કમલાકરુણાં લભતે ॥ ૩૮.૨૪॥

એકવિધાદૌ બહુભેદાઽથો શક્તિરનન્તા પરમેશસ્ય ।
સભજનમાર્ગં ગણપતિમુનિના પાદાકુલકૈરેવં વિવૃતા ॥ ૩૮.૨૫॥ 950

---

એકોનચત્વારિંશઃ સ્તબકઃ

પ્રાયો વ્યોમશરીરા (ઇન્દ્રવજ્રાવૃત્તમ્)

વ્યાપ્યેદમિન્દોર્ભુવનં ચ યેવ
પ્રાયેણ તસ્યામલચન્દ્રિકાઽભૂત્ ।
મન્દસ્તવાર્તિં સ ધુનોતુ હાસો
નિઃશેષલોકેશ્વરવલ્લભાયાઃ ॥ ૩૯.૧॥

પૂર્ણે વિયત્યેકતટિજ્જ્વલન્તી
લોકાનશેષાનનિશં પચન્તી ।
મેઘે કદાચિન્મહસા સ્ફુરન્તી
ચણ્ડી પ્રચણ્ડા હરતાદઘં નઃ ॥ ૩૯.૨॥

ગોલાનિ કાન્યપ્યધુનોદ્ભવન્તિ
જીર્યન્તિ કાન્યપ્યખિલેશકાન્તે
યાન્ત્યમ્બિકે કાન્યપિ વૃદ્ધિમત્ર
પાકે ભવત્યાઃ પરિતઃ પ્રવૃત્તે ॥ ૩૯.૩॥

ભાસાં વિનેત્રા મહતા ગ્રહૈશ્ચ
ભૂરિપ્રમાણૈર્યુતમીશકાન્તે ।

એકૈકમણ્ડં તવ લોમવચ્ચેત્
કસ્તે મહદ્ભાગ્યમિહ બ્રવીતુ ॥ ૩૯.૪॥

નાથસ્ય તે રૂપમણોરણીયો
માતસ્ત્વદીયં મહતો મહીયઃ ।
જનાતિ યો દેવિ રહસ્યમેતદ્
વ્યાખ્યાતુમેષ પ્રભવત્યશેષમ્ ॥ ૩૯.૫॥

યદ્ ગર્જિતં વારિદઘર્ષણેષુ
શબ્દસ્તવાયં સુગભીરઘોષઃ ।
યલ્લોકરાજિ સ્ફુરિતં તદેત-
દુજ્જૃમ્ભિતં કિઞ્ચન કાન્તિવીચેઃ ॥ ૩૯.૬॥

ઇન્દ્રસ્ય વજ્રં જ્વલિતં કૃશાનોર્-
જ્યોતિસ્સહસ્રચ્છદબાન્ધવસ્ય ।
પીયૂષભાનોર્હસિતં વિસારિ
જીવસ્ય ચક્ષુર્મમ તાત દૈવમ્ ॥ ૩૯.૭॥

યસ્યૈવ તેજઃ પ્રવિભક્તમર્ક-
વિદ્યુચ્છશાઙ્કાનલલોચનેષુ ।
ગૂઢં તદાકાશગૃહે સમન્તા-
દન્તાનભિજ્ઞં પ્રણમામિ દૈવમ્ ॥ ૩૯.૮॥

જાગ્રત્સુ બુદ્ધિર્નિમિષત્સુ નિદ્રા
શુષ્કેષુ પક્તિસ્તરુણેષુ વૃદ્ધિઃ ।
ધીરેષુ નિષ્ઠા ચપલેષુ ચેષ્ટા
દેવી મમાપત્તિમપાકરોતુ ॥ ૩૯.૯॥

વિદ્યાવતો વાદવિધાનશક્તિર્-
વીરસ્ય સઙ્ગ્રામવિધાનશક્તિઃ ।
નારીમણેર્મોહવિધાનશક્તિર્-
લેશત્રયં કિઞ્ચિદપારશક્તેઃ ॥ ૩૯.૧૦॥

ઉત્સાહયન્તી તપતાં મનાંસિ
સઞ્ચોદયન્તી ચ મહાક્રિયાસુ ।
સઙ્ક્ષોભયન્તી હૃદયં ખલાનાં
સમ્મોહયન્તી ચ પરાઽવતાન્નઃ ॥ ૩૯.૧૧॥

સઞ્ચાલયન્તી સકલસ્ય દેહં
વ્યાનસ્ય શક્ત્યા પરિતો લસન્ત્યા ।
જેતુઃ પ્રતાપેઽસ્તિ પલાયનેઽસ્તિ
ભીતસ્ય ચેયં નિખિલેશશક્તિઃ ॥ ૩૯.૧૨॥

એકં સ્વરૂપં બહુચિત્રયોગાત્
સન્દર્શયન્તી વિવિધં જનેભ્યઃ ।
સમ્યગ્દૃશે સ્વં વિભુમર્પયન્તી
સર્વાદિમાયૈવ મહેશજાયા ॥ ૩૯.૧૩॥

યસ્સંશ્રયેતાખિલસઙ્ગતિસ્ત્વાં
ધ્યાનેન મન્ત્રેણ ગુણસ્તવૈર્વા ।
ત્રૈલોક્યસામ્રાજ્યધુરન્ધરસ્ય
શુદ્ધાન્તકાન્તે સ કૃતી મનુષ્યઃ ॥ ૩૯.૧૪॥

મૂલાગ્નિમુદ્દીપ્ય શિરશ્શશાઙ્કં
સન્દ્રાવ્ય યસ્તર્પયતે કૃતી ત્વામ્ ।
તસ્મિન્નગાધીશ્વરકન્યકે ત્વં
પ્રાદુર્ભવન્તી ન કિમાદધાસિ ॥ ૩૯.૧૫॥

યસ્ત્વાં સહસ્રારસરોજમધ્યે
સોમસ્વરૂપાં ભજતેઽમ્બ યોગી ।
તસ્યાન્તરઃ શાન્તિમુપૈતિ તાપો
બાહ્યસ્ય કા નામ કથાઽલ્પકસ્ય ॥ ૩૯.૧૬॥

દણ્ડેન યોઽન્તર્દહરેઽવતીર્ણઃ
પ્રાણેન વાચા મહસા ધિયા વા ।
પ્રાપ્નોતિ સોઽયં પુરમદ્વિતીયં
યત્ર ત્વમીશા સહ ચિત્રલીલા ॥ ૩૯.૧૭॥

તન્ત્રોદિતં વિશ્વવિનેત્રિ મન્ત્રં
યસ્તે નરઃ સંયમવાનુપાસ્તે ।
રુદ્રાણિ સાન્દ્રામ્બુદકેશપાશે
પાશૈર્વિમુક્તઃ સ જયત્યશેષમ્ ॥ ૩૯.૧૮॥

પદ્માસનો દ્વાદશવર્ણશાન્તી

દમ્ભોલિપાણિર્ભુવનાધિનાથા ।
ગીર્વાણમાર્ગો ભૃગુરબ્જયોનિર્-
અન્તે તથાગ્રે ચ હલાં વિરાજી ॥ ૩૯.૧૯॥

જમ્ભસ્ય હન્તાઽનલશાન્તિચન્દ્રૈઃ
સંયુક્ત ઊષ્મા ગલદેશજન્મા ।
દન્તસ્થલીસમ્ભવ ઊષ્મવર્ણો
વાણીપતિર્વજ્રધરશ્ચ લજ્જા ॥ ૩૯.૨૦॥

વિદ્યા ત્વિયં પઞ્ચદશાક્ષરાઢ્યા
સાક્ષાન્મહામૌનગુરૂપદિષ્ટા ।
ગોપ્યાસુ ગોપ્યા સુકૃતૈરવાપ્યા
શ્રેષ્ઠા વિનુત્યા પરમેષ્ઠિનાઽપિ ॥ ૩૯.૨૧॥

દેહેષ્વિયં કુણ્ડલિની ન્યગાદિ
ભૂતેષુ વિદ્યુદ્ ભુવનેષુ ચાભ્રમ્ ।
દેવાઙ્ગનામસ્તકલાલિતાઙ્ઘ્રિર્-
દેવી ભવાની ખલુ દેવતાસુ ॥ ૩૯.૨૨॥

ચક્ષુર્વિધાયાચલમન્તરેણ
પ્રાણં પ્રપશ્યન્ મનુવર્ણરૂપમ્ ।
સંસેવતે ચેત્સકલસ્ય ધાત્રીં
સર્વેષ્ટલાભો વિદુષઃ કરસ્થઃ ॥ ૩૯.૨૩॥

એકાક્ષરીઃ પઞ્ચદશાક્ષરીં વા
વિદ્યાઃ પ્રકૃષ્ટાઃ સકલેશશક્તેઃ ।
યો ભક્તિયુક્તઃ પ્રજપેદમુષ્ય
પ્રાણો વશે નિસ્તુલસિદ્ધિયોનિઃ ॥ ૩૯.૨૪॥

એતાઃ કવીનાં પદકિઙ્કરસ્ય
પૂતાઃ પ્રમોદં પરમાવહન્તુ ।
ગીતાસ્સભક્તિદ્રવમિન્દ્રવજ્રાઃ
શ્વેતાચલાધીશ્વરવલ્લભાયાઃ ॥ ૩૯.૨૫॥ 975

---

ચત્વારિંશઃ સ્તબકઃ

દૈવગીતમ્ (પાદાકુલકવૃત્તમ્)

શમયતુ પાપં દમયતુ દુઃખં હરતુ વિમોહં સ્ફુટયતુ બોધમ્ ।
પ્રથયતુ શક્તિં મન્દં હસિતં મનસિજશાસનકુલસુદૃશો નઃ ॥ ૪૦.૧॥

આર્દ્રા દયયા પૂર્ણા શક્ત્યા દૃષ્ટિવશંવદવિષ્ટપરાજા ।
અખિલપુરન્ધ્રીપૂજ્યા નારી મમ નિશ્શેષાં વિપદં હરતુ ॥ ૪૦.૨॥

શુદ્ધબ્રહ્મણિ મોદો દૈવં તત્ર સિસૃક્ષતિ કામો દૈવમ્ ।
સૃજતિ પદાર્થાન્ દૃષ્ટિર્દૈવં તાન્ બિભ્રાણે મહિમા દૈવમ્ ॥ ૪૦.૩॥

વિકૃતૌ વિકૃતૌ પ્રકૃતિર્દૈવં વિષયે વિષયે સત્તા દૈવમ્ ।
દૃષ્ટૌ દૃષ્ટૌ પ્રમિતિર્દૈવં ધ્યાને ધ્યાને નિષ્ઠા દૈવમ્ ॥ ૪૦.૪॥

સ્ફૂર્તૌ સ્ફૂર્તૌ માયા દૈવં ચલને ચલને શક્તિર્દૈવમ્ ।
તેજસિ તેજસિ લક્ષ્મીર્દૈવં શબ્દે શબ્દે વાણી દૈવમ્ ॥ ૪૦.૫॥

હૃદયે હૃદયે જીવદ્દૈવં શીર્ષે શીર્ષે ધ્યાયદ્દૈવમ્ ।
ચક્ષુષિ ચક્ષુષિ રાજદ્દૈવં મૂલે મૂલે પ્રતપદ્દૈવમ્ ॥ ૪૦.૬॥

અભિતો ગગને પ્રસરદ્દૈવં પૃથિવીલોકે રોહદ્દૈવમ્ ।
દિનકરબિમ્બે દીપ્યદ્દૈવં સિતકરબિમ્બે સિઞ્ચદ્દૈવમ્ ॥ ૪૦.૭॥

શ્રાવં શ્રાવં વેદ્યં દૈવં નામં નામં રાધ્યં દૈવમ્ ।
સ્મારં સ્મારં ધાર્યં દૈવં વારં વારં સ્તુત્યં દૈવમ્ ॥ ૪૦.૮॥

શ્રુતિષુ વટૂનાં ગ્રાહ્યં દૈવં ગૃહિણામગ્નૌ તર્પ્યં દૈવમ્ ।
તપતાં શીર્ષે પુષ્ટં દૈવં યતિનાં હૃદયે શિષ્ટં દૈવમ્ ॥ ૪૦.૯॥

નમતા પુષ્પૈઃ પૂજ્યં દૈવં કવિના પદ્યૈરાધ્યં દૈવમ્ ।
મુનિના મનસા ધ્યેયં દૈવં યતિના સ્વાત્મનિ શોધ્યં દૈવમ્ ॥ ૪૦.૧૦॥

સ્તુવતાં વાચો વિદધદ્દૈવં સ્મરતાં ચેતઃ સ્ફુટયદ્દૈવમ્ ।
જપતાં શક્તિં પ્રથયદ્દૈવં નમતાં દુરિતં દમયદ્દૈવમ્ ॥ ૪૦.૧૧॥

વાચો વિનયદ્વહ્નૌ દૈવં પ્રાણાન્ વિનયદ્વિદ્યુતિ દૈવમ્ ।
કામાન્ વિનયચ્ચન્દ્રે દૈવં બુદ્ધીર્વિનયત્સૂર્યે દૈવમ્ ॥ ૪૦.૧૨॥

હૃદયે નિવસદ્ ગૃહ્ણદ્દૈવં વસ્તૌ નિવસદ્વિસૃજદ્દૈવમ્ ।
કણ્ઠે નિવસત્પ્રવદદ્દૈવં કુક્ષૌ નિવસત્પ્રપચદ્દૈવમ્ ॥ ૪૦.૧૩॥

દેહે નિવસદ્બિલચદ્દેવં પઞ્ચપ્રાણાકારં દૈવમ્ ।
ભાગિ સમસ્તસ્યાન્ને દેવં સ્વાહાકારે તૃપ્યદ્દૈવમ્ ॥ ૪૦.૧૪॥

બિભ્રન્નારીવેષં દૈવં શુભ્રદરસ્મિતવિભ્રાડ્ દૈવમ્ ।
અભ્રમદાપહચિકુરં દૈવં વિભ્રમવાસસ્થાનં દૈવમ્ ॥ ૪૦.૧૫॥

શીતજ્યોતિર્વદનં દૈવં રુચિબિન્દૂપમરદનં દૈવમ્ ।
લાવણ્યામૃતસદનં દૈવં સ્મરરિપુલોચનમદનં દૈવમ્ ॥ ૪૦.૧૬॥

લક્ષ્મીવીચિમદલિકં દૈવં પ્રજ્ઞાવીચિમદીક્ષં દૈવમ્ ।
તેજોવીચિમદધરં દૈવં સમ્મદવીચિમદાસ્યં દૈવમ્ ॥ ૪૦.૧૭॥

કરુણોલ્લોલિતનેત્રં દૈવં શ્રીકારાભશ્રોત્રં દૈવમ્ ।
કુસુમસુકોમલગાત્રં દૈવં કવિવાગ્વૈભવપાત્રં દૈવમ્ ॥ ૪૦.૧૮॥

હિમવતિ શૈલે વ્યક્તં દૈવં સિતગિરિશિખરે ક્રીડદ્દૈવમ્ ।
તુમ્બુરુનારદગીતં દૈવં સુરમુનિસિદ્ધધ્યાતં દૈવમ્ ॥ ૪૦.૧૯॥

ક્વચિદપિ રતિશતલલિતં દૈવં ક્વચિદપિ સુતરાં ચણ્ડં દૈવમ્ ।
ભક્તમનોનુગવેષં દૈવં યોગિમનોનુગવિભવં દૈવમ્ ॥ ૪૦.૨૦॥

ચરિતે મધુરં સ્તુવતાં દૈવં ચરણે મધુરં નમતાં દૈવમ્ ।
અધરે મધુરં શમ્ભોર્દૈવં મમ તુ સ્તન્યે મધુરં દૈવમ્ ॥ ૪૦.૨૧॥

ભુજભૃતવિષ્ટપભારં દૈવં પદધૃતસમ્પત્સારં દૈવમ્ ।
લાલિતનિર્જરવીરં દૈવં રક્ષિતસાત્ત્વિકધીરં દૈવમ્ ॥ ૪૦.૨૨॥

ચિચ્છક્ત્યાત્મકમધિતનુ દૈવં તટિદાકૃત્યધિભૂતં દૈવમ્ ।
શ્રુતિષુ શિવેતિ પ્રથિતં દૈવં જયતિ જગત્ત્રયવિનુતં દૈવમ્ ॥ ૪૦.૨૩॥

રમણમહર્ષેરન્તેવાસી મધ્યમપુત્રો નરસિંહસ્ય ।
વાસિષ્ઠોઽયં મરુતાં માતુર્ગણપતિરઙ્ઘ્રિં શરણમુપૈતિ ॥ ૪૦.૨૪॥

ત્રિભુવનભર્તુઃ પરમા શક્તિસ્સકલસવિત્રી ગૌરી જયતિ ।
તન્નુતિરેષા ગણપતિરચિતા પાદાકુલકપ્રાન્તા જયતિ ॥ ૪૦.૨૫॥ 1000

॥ સમાપ્તં ચ દશમં શતકમ્ ॥

॥ ઇતિ શ્રીભગવન્મહર્ષિરમણાન્તેવાસિનો વાસિષ્ઠસ્ય નરસિંહસૂનોઃ ॥

ગણપતેઃ કૃતિઃ ઉમાસહસ્રં સમાપ્તમ્ ॥

*umAsahasram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*